Shri Raghunath Temple MSS. Library,
JAMMU

No. ४२८६

Title शास्त्र दीपिका टीका सिद्धान्त चन्द्रिका.

Author श्री रामकृष्ण भट्टः

Extent १३८ Age x

Subject पू. मीमांसा शास्त्रं

पूास्त्रदीपिकाटीकासिद्धांतचन्द्रिका प्रथमाध्याय

प्रथमपादः

४२८६

गर्क्षवादटीका सिद्धान्तचन्द्रका

[illegible]

[illegible]

रम॥ १ षा

॥ ॥जयश्रीराम॥ ॥श्रीगणपतये नमः॥ ॥आनंदोचितवदनं मदनेरघुनंदनंदयामुक्तयोः मीसलक्ष्मणरामहितं वंदे गिरि
शादिनिर्वद्यम्॥१॥ विधिश्रुतिस्मृतिद्वारमद्वारं योगिनामपिवांछितार्थपदं धर्मप्रमाणं राममाश्रये॥२॥ वाचं वंदे गिरिशतन
येजोत्रदेवीवेभक्ता वेदव्यासमुनिवरमथोत्रेमिनिसूत्रकारम्। व्याख्यातारं गहनं वचनं भाष्यकारं व पूज्यं मदाचोर्ध्वशोरिग
तितनुजनमतत्त्वानगुरुंश्च॥३॥ अस्त्यत्ररेवोत्तरतीरवर्तीदेशः प्रसिद्धो भुवि मालवाख्यः। ॐकारमाहिष्मतिकाविशालतीर्थौघ
भूषितो नकाजात्यभिख्यः॥४॥ वसिष्ठपाराशरवत्सकौत्सशाण्डिल्यसद्गोमवगौतमाद्याः। वशाः प्रसिद्धा भुवि मालवानां
बेत्रितीशाद्रसमाश्रिता नाम्॥५॥ वंशो विद्याभिन यविमलसोमुकाश्रिता सिद्धः कर्मब्रह्मप्रवरामतयः सर्वएव द्विजेन्द्राः॥ जो द्र
त्रशक्तिप्रवरमहितपत्रपाराशराख्यं न क्विर्विद्धो भुवनजननीदेवताशापुरेति॥६॥ शिवदासाभिधस्तत्र वंशे पाराशराकृ स्त
त्रशक्तिः प्रवरमहितः सा ... चावेदशास्त्रार्थसम्पन्नः सदाचारपरो भवत्॥७॥ तत्पुत्रोमित्रशर्माद्विजेन्द्रः मित्रः सान्ना ब्राह्मतेजो विशेषः॥ विद्व
चावेदशास्त्रार्थसम्पन्नः सदाचारपरो भवत्॥ ... सर्वशास्त्रव्याख्याशिरोहीरकीर्तिः पृथिव्या॥८॥ जनार्दनेत्रस्य सुतोमनीषी जनार्दमार्च्चो निरोबभूवा
देः परजितः सर्वशास्त्रव्याख्याशिरोहीरकीर्तिः पृथिव्या॥ ... कीर्तिर्महीपतीन्द्रार्थितसम्मतिः॥९॥ तस्मोत्ज्ञातानावेदशास्त्रेष्वधीतीगंदगादेव्यामैरवाख्यो रम० १
वेदेषुशास्त्रेषु यगीतकीर्तिर्महीपतीन्द्रार्थितसम्मतिः॥ ... मपत्ने शेषवंश्पा २॥१०॥ समुत्पन्नस्तस्मादतिविमलकान्तिर्द्वि
द्विजेन्द्रः। कीर्तिर्जैनोपार्जिता विश्वविद्याद्त्रिभ्याग्यो ...

स्त

स्वा जवुरः कृती पुनादेव्यां दिशिदिशि ख्यनाराध्यरास्ति।प्रासिद्धः शास्त्रो युजितिपतिसमूहार्चितपदः परंब्रह्मानंदाम्भनरमस
माच्चोरन पुरुः॥ ॥तस्माद्दुर्भूद्ुर्मरैतन्नरघाध्याश्रमाधवः पु।र्थकारत्नकीर्तिः वेदांतविस्पक्तभवत्प्रदत्तिः श्रीरामच
द्रार्चितंविन्नद्वत्तिः॥१२॥सदेशादागतः माध्यांकारस्पांशास्त्राध्यपनसिद्धये।सकलन्नकृतीमाग्पास्थितिंदतत्रवका
रह॥१३॥तस्माज्जातः प्रभावत्पोरामकृस्पाभिधः सुधीः।पितृभक्तिपरः काश्यांसर्वशास्त्रविशारदः॥१४॥तत्तद्ग्र
न्थविनिर्माणात्सविद्याप्रकटीकृता।कीर्तिश्चपेनविपुलापूर्वापरसमुद्रयोः॥१५॥राजराजाभिधश्रीमहीपीना ज्यो
थाद्द्विजोत्तमात्।विद्वन्नागरवृंदेषु प्राप्तंभद्रपदंस्थिरम्॥१६॥गजपतिसदृसि प्राप्तापदवी बलभद्रराजगुरोः।पंडित
शिरोमणिरितिप्रतापमार्तंडनिर्माणात्॥१७॥सनुश्रोतस्त्रप्रसादेनव्याचष्टेशास्त्रदीपिकां।निमित्तमात्रमत्रैषाव्याख्या
६न तारघुनंदनः॥१८॥नशास्त्रदीपिकाटीकाकृताकेनापिसूरिणा।तदपूर्वाध्वसंचारीजोपहास्यः सवलत्रपि॥१९॥ ॥ग्रंथका
रो ग्रंथारंभेतत्समाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिप्राप्तंविशिष्टेष्टदेवताप्रणतिरूपमंगलमाचरतिल[illegible] स्वा
ऽधोन्द्रराणांलक्ष्मीसौभाग्यादिप्राप्तिसूचनार्थंजगदीश्वरस्येतद्विशेषणां प्रस्तरशः कुलीन्यायेनविन्नविचैतकत्वसाम
र्थ्यप्रदर्शनार्थं द्वितीयंविशेषणान्तराणितिनुभक्तानुग्रहार्थंस्वीकृतशरीरध्यानोपपिकानि।मजान्तरप्रसिद्धप्रधानेनाचथा

त्येण गायत्र्यादेः स्वरूपा वा देवता कर्मांगभूता तस्याएव देवताधिकरणे विग्रहादिपंचकनिराकरणात् १

राम० २ सिद्धि वाक्यार्थं प्रधानात्परमित्युक्तः न चैवं देवताधिकरणविरोधः उद्देश्यपायाएव तद्धि विपर्ययात् उक्तं च नास्माकं शब्द एव देव
तानां कः सदा मिंद्रादीनां देवतात्वं गीकारादिति । अत एव वार्त्तिकं वमरे विशुद्धज्ञानदेहायेत्यादिनाग्रंथादौ महादेवानमस्कृतः ॥ त
उक्तं चामहं वै केनाग्रंथारंभे मिमत देवतानमस्कारं करोति वार्त्तिककार इति । अयं वा देवतास्तु भवे च प्रधानकर्मणए न तत्फलं न
देवतायाः तत्स्यागुणत्वं गीकाराज्ञाके विद्युनरेतलकर्मपरत्वेन व्याख्यातं तेनयाहि अनेकपद्धत्यादि मिविशुद्धपदानंतद्
2 प्यस्वरूपं पयस्या वेदत्रयसमाहाररूपं वस्तुज्ञेयकं प्रमाणं पश्यतस्मै स्वर्गादिफलप्राप्तिहेतवे सोमस्यार्द्धरसरूपं पंचसृष्टिन याये
धारयेतितस्मै नमः इतिनिषामीश्वरद्रोहिणां प्रतीयमानार्थपरित्यागेनार्थांतरं कल्पयतामनुपादेयमेव तद्व्याख्यानं । इदानीं सप्र
योजनं कर्त्तव्यं प्रतिजानीते चायाभासेति । अत्र पर्वार्द्धेन प्रभाकरगुरुवित्तम्यायाभासप्रमोनिराकरणेन शास्त्रतत्त्वार्थप्रदर्शनं 1
ग्रंथस्य प्रयोजनमुक्तं शास्त्रदीपिकाकारिष्य इतिकर्त्तव्यपतित्वा ॥ कुमारिलमततेनेतिमतांतरनिराकरणध्वनितः कर्तव्यं प्रतिज्ञा
पयं ग्रंथस्य मीमांसाशास्त्रविषयत्वं द्योतयितुं तदाद्यसूत्रं लिखति ॥ ॥अथातो धर्मजिज्ञासेति ॥ ॥एतच्च धर्मविचाररूपंमी
मांसाशास्त्रलक्षणाम्नि चास्य द्वादशप्रमाणभेदशेषप्रयुक्तिक्रमाधिकारसामान्यातिदेशविशेषातिदेशोहबाधतंत्रप्रसं राम० २
गाख्यानि प्रमाणादयः प्रसंगांताः द्वादशपदार्थाः क्रमात् द्वादशानामध्यायानां विषयाः । तत्र प्रथमाध्याये चतुर्भिः पादैः

है

क्रमेणविध्यर्थवादस्मृतिनामाधेयानि विचारितानि· द्वितीये रूपोद्भूतकर्मभेदस्तदपवादप्रयोगभेदा४तृतीये श्रुतिलिंगवा
क्यादीनि त्रिभि४पादैर्विचारितानि चतुर्थे निवीतादि क्रतुर्थपदिवला बलविचार४पंचमे प्रतिपत्तिकर्म्मषष्ठे नारभ्याधीतानि सप्रमे
बहुप्रधानोपकारकप्रयाजादीनि अष्टमे याजमानानि।प्रधानस्य प्रयोक्तृत्वमप्रधाना प्रयोक्तृता फलविनाजब्रह्मणांगाचिंते
न्यते चतुर्थगा४।पंचमस्याद्ये श्रुत्यादिभि४क्रमोनिरूपित४द्वितीये क्रमविशेष४तृतीये प्रयाजादिविवृद्धि४चतुर्थे श्रुत्या
दिवलाबलविचार४।आधिकारिणस्यधर्म्मा४प्रतिनिध्यर्थलोपनैदीक्षीसत्रदेयवन्हीषष्ठेपादेषष्ठीस्थिता४।सप्तमाद्ये प्रत्यक्षप
नातिदेश४द्वितीये तस्यैवविशेष४तृतीये नामातिदेश४चतुर्थे निर्वापोषधलिंगेन प्राकृतधर्म्मातिदेश४।सप्तमोल्लिंगादष्टमस्याद्ये
प्रबलादपवादत्त४।अतिदेशविशेषास्तु४स्थमाध्यायपादगा४।ऊहारंभोयमामोहा मंत्रोहस्तत्प्रसंगज४।नवमाध्यायपादेषु
चतुर्ष्वपि प्रकीर्तिता४।द्वारलोपोस्यविस्तार४कार्यैकत्वसमुच्चय४।ग्रहसामप्रकीर्णानि निजर्थस्त्वाष्टपादगा४।उपोद्धातस्तथा
तंत्रावापौतत्रस्यविस्तृति४।आवापविस्तृतिश्चैकादशाध्यायस्यपादगा४।प्रसंगस्तंत्रनिर्णीति४तमुच्चयविकल्पने।द्वादशाध्याय
पादार्थइतिपादार्थसंग्रह४संगतिस्त्वरूपंचात्र ग्रंथांतराद्दवगंतव्या·सूत्रतात्पर्यदर्शयति अनेनेति·प्रयोजनपरत्वेन सकलःशा
स्त्रशेषत्वमस्य ध्वन्यते।किमर्थंप्रयोजनकथनमित्यपेक्षायामाह·श्रोत्रिति·ननु नानेन प्रयोजनं कथ्यते तद्वाचकपदाभावात्त

सा

रा०म० २

3

आह यदाहीति। कर्त्तव्योऽनुतपासूत्रे कर्त्तव्यपदाध्याहारः सूचितः। कर्त्तव्यानानुपदेशोऽयाजः शब्दयोरनचयः पत्रेः॥ यथा ऊः
अथातो धर्म्मजिज्ञासा सूत्रमाद्यमिदं कृतं। धर्म्माख्यविषयं वक्तुं मीमांसायाः प्रयोजनमितिमिदं फलमेतदितिचेन्न・न・उक्तोत्तरत्वात्
अनाश्वासात्तदनुपपत्तिरितिचेत्・न・आप्तत्वेन तदुपपत्तेः・वृहस्पतिहितत्वेनोत्पादितत्वादिति॥ तथा・अपि याकारणाग्रहणो प्र
युक्तानेप्रतीयेरन्निति・उक्तं च सर्वस्यैव हि शास्त्रस्य कर्म्मणो वापि कस्यचित् यावत्प्रयोजनं नोक्तं・तावत्तत्केन गृह्यत इति
ननु प्रयोजनवत्सम्बन्धस्यागत्वात् संबंधोपि सूत्रकारेण वक्तव्यः अविदितप्रयोजनवदविदितसंबंधेपि श्रोतुरप्रवृत्तेरितिचोदयन्ति
विदितमिति・यथा・अथातो धर्म्मं व्याख्यास्याम इत्यादि बुभुत्सुशिष्यप्रश्नानन्तर्यरूपः संबंधश्श्रोतृश्रोता प्रवर्त्तते शास्त्रादौ तेन व
क्तव्यः संबंधः सप्रयोजन इति परिहरति सम्यगिति। यद्वा अस्य शास्त्रस्य द प्रयोजनमित्युक्तं तदेव तयोः धर्म्मज्ञानविचारयोः・
साध्यसाधनभावलक्षणसंबंधोर्थादुक्तो न चार्थात्त्याप्तसूत्रकाराः अक्षरैर्निबध्नन्ति・आसूचकत्वे सूत्रत्वप्रसंगादित्यर्थः・अय
माशयः नास्य शास्त्रस्य शिष्यप्रश्नानन्तर्यादिरूपसंबंधो हेतुः लोकाहितत्वेन। जैमिनिना स्वयमेव धर्म्मज्ञानसाधनीभूतस्य
शास्त्रस्यारब्धत्वात्॥ अतस्साध्यसाधनसंबंध एवात्र। स च संबंधिनोरभिधानादेवार्थात् ज्ञात इति। भाष्यकारोप्येतमेव संबंध　रा०म० २
र्म्मः प्रसिद्धो वास्यादप्रसिद्धो वेत्यादिना ज्ञेयसमाधानाभ्यामुपपादयिष्यति। अन्योन्यसंबंधानरगवेषणाकार्य्येति भावः・सएवन्न

संबंधोभिधीयते तथात्र सूत्रकारेण प्रयोजनवत्संबंधेपि वक्तव्यः अन्यथा सूत्रकारस्यासंबद्धप्रलापित्वेन तद्व
चनेनस्रद्धीरन्नित्यर्थः・उक्तं वसिद्धार्थज्ञातं दं

नेन क्रियानन्तर्यगुरुपर्वक्रमरूपसंबन्धान्तरनिराकरणं तथा हि कारणादेतैत्रेऽशिष्यप्रश्नात्क्रियानन्तर्यरूपसंबन्धो दर्शितः । गुरु
पर्वक्रमात्मकश्च संबन्धोपपात्रैवकैश्चिदुक्तः तद्यथा ब्रह्मा प्रजापतये मीमांसां प्रोवाच सोऽपीन्द्राय सोऽप्यग्नये स च वसिष्ठाय सो
ऽपि पाराशराय पाराशरः कृष्णद्वैपायनाय सोऽपि जैमिनये स च श्रौपदेशादनन्तरमिमं न्यायं ग्रथितवानिति । केचित्तु ब्रह्मा म
हेश्वराय वा प्रजापतये मीमांसां प्रोवाच प्रजापतिरिन्द्रायेन्द्र आदित्यायेत्येवमादि पाठान्तरं । तदत्र क्रियारूपस्यानन्तर्यसंबन्धो न वाच्यो नि
ःप्रयोजनत्वात् । न ह्येवंरूपसंबन्धसद्भावासद्भावयोः श्रोतॄणां शास्त्रप्रवृत्तौ निवृत्तौ वा शास्त्रगोचरे ज्ञाने वा कश्चिद्विशेषः । तथा
गुरुपर्वक्रमरूपोऽपि संबन्धो निष्फलो निर्हेतुकश्च न ह्यस्य संबन्धे किंचित्प्रमाणमस्ति अतः सप्रमाणकः सप्रयोजनश्च संबन्धो
वाच्यः स च साध्यसाधनत्वरूप एव युक्त इति भावः । न चात्र सूत्रकृता वाथशब्दं प्रयुञ्जानेनाध्ययनक्रियानन्तर्यलक्षणस्य शा
स्त्रसंबन्धस्योक्तत्वात्कथमुच्यते सूत्रकारेणानर्थकमुक्तमिति । उच्यते ॥ अत्राथशब्दोऽध्ययनजिज्ञासाक्रिययोरेव संबन्धमाह । न
शास्त्रस्य प्रयोजनेन सहानेन च क्रिये शास्त्रादर्थान्तरमित्ये । ननु जिज्ञासापदेनैव विचाररूपा शास्त्रशब्दवाच्या क्रियोपात्तैव कथ
मुच्यते शास्त्रादर्थान्तरमिति । मैवं जिज्ञासापदस्य ज्ञानेच्छार्थत्वात्क्रियावाचकस्य मीमांसापर्यायत्वाभावात् । अन्तःक्रिया
हि ज्ञानेच्छारूपा जिज्ञासा बहिःक्रिया तु विचारात्मा । सा मीमांसा कुतस्तयोरैक्यं कथं तर्हि जिज्ञासाशब्दस्य मीमांसायां प्रयो

राम० ग॥३॥ उभयोरपि मन्त्रप्रत्ययपात्रत्वसाम्येनैकार्थत्वममरादिति न्यायः॥ अयमत्राविवेकः॥ विषयोऽत्र ज्ञाप्यजन्यभेदेन द्विविधः॥
४ ज्ञाप्यो धर्म्मः॥ जन्यः पशुस्वर्गादिः संबंधस्तु धर्म्मेण सह शास्त्रस्य ज्ञाप्यज्ञापकभावलक्षणः शास्त्रज्ञानेन सह जन्यजनकलक्षणः॥ संबं
र्म्मज्ञानमवान्तरप्रयोजनं परमप्रयोजनं चाभ्युदयनि॥ अपरोक्षत्वकामोऽधिकारीत्यनुबन्धचतुष्टयं श्रोतृप्रवृत्तिसिद्ध्यर्थं सूत्रका
रेणाभ्युत्पर्थाम्यामुक्तं लोकानुग्रहश्च शास्त्रप्रारम्भ एव कारणं न त्वेतदपि शिष्टाचारपरंपराप्राप्तमंगलाचरणं सूत्रकारस्य
शिष्टत्वशंकया तच्छास्त्रप्रवृत्त्यनुपपत्तिः॥ नैष दोषः॥ सूत्रादौ मंगलार्थाथशब्दप्रयोगेण मंगलाचरणस्य कृतत्वात् मध्यका
रेणापि लोकशब्दं प्रयुञ्जता तत्त्वानुसारेण रूपं तत्कृतं वार्त्तिककारैरपि विशुद्धज्ञानदेहायेत्यनेन देवतानमस्काररूपस्य इष्टेव
मंगलमाचरितं ग्रंथकारेणापि तन्मतानुसारेणातं तन्मतमिति तत्कस्याचिदुपालंभः॥ ॥ एवमनेन सूत्रेण सकलशास्त्रशेषरूपेण स्वाद
श्रोतृप्रवृत्त्योपयिकविषयादिनिरूपणेन शास्त्रारंभे प्रतिज्ञाते तत्सिद्ध्यर्थमध्ययनविधिविचारमारभते अत्रेदमिति- इदं विचारशा
स्त्रविधिप्रयुक्तानारम्भमारभ्यं वेति मुख्यो विचारस्तत्सिद्ध्यर्थमध्ययनविधेरदृष्टार्थत्वं दृष्टार्थत्वं वेति विचार्यते- भाष्यकारेण यश
स्मादावेतत्सूत्रमध्ययनविधेर्वदृष्टार्थतामाशंक्य दृष्टार्थत्वप्रतिपादनपरमिति व्याख्यातं दृष्टो हि तस्यार्थः॥ कर्मावबोधनं नाम राम०
त्यादिना तस्यायमेव प्रसंजको विधिरित्युचितं एवादौ तद्विचारः॥ कथं पुनर्दृष्टार्थत्वकारेणोदयोपन्नोऽध्ययनकरणिका यां भावनायां ४

ता

न्नियोग॥ प्रतीयमानोऽनियोज्यविशेषं विना पर्यवस्यन्न अत्र श्रुतस्वर्गादि परित्यागेनैव फलमात्रेयो निर्देशादिति न्यायेन स्वत
कुल्यादिकामप्यवलंबते। न चार्थवादत्वं पारार्थ्यानवगमात्। न च कर्मावबोधार्थत्वेन पारार्थ्यं स्वाध्यायेन स्यतादर्थ्ये नाम्ना
वगाराज्ञातेनादृष्टार्थत्वशंकेति। उच्यते स्वाध्यायनकरणिकायां भावनायां निर्वर्त्यमानायां तावदर्थावबोधो जायते। स चा
हवनीयादिवदुपकारकत्वेन कर्मार्थो भवति अतोऽध्ययनमपि तद्द्वारा कर्मार्थमाधानवत्। एवं चाध्ययनस्य पारार्थ्यं वगतेऽ
नकुल्यादेस्तादर्थ्यवादत्वेनोपपत्तौ फलसमर्पकत्वायोगात् न चैवमपि दृष्टार्थावबोधार्थत्वेनादृष्टार्थत्वानुपपत्तिः॥ मैवं
नादृष्टे विध्यानर्थक्यापत्तेः॥ विधिं विना पितृप्राप्तेः अतो विध्यर्थवत्त्वायादृष्टार्थत्वकल्पनेति। अत्र शास्त्रारंभसिद्ध्यर्थत्वेना
ध्ययनविधेरदृष्टार्थत्वं दृष्टार्थत्वं चेति विचारकर्तॄणां ग्रंथकारस्याध्ययनानंतरं गुरुकुलात्समावर्तनमुत नेति विचारितव्यमि
तिविचारानुपपन्नः॥ तत्सिद्ध्यर्थं स्वाध्यायाध्ययनविधिदृष्टादृष्टार्थत्वविचारोऽत्यंतमनुपपन्नः॥ शास्त्रारंभसिद्ध्यर्थत्वादध्ययनविधिवि
चारस्योत्पादित्वहु ग्रंथविरोधात्। तस्मादस्मदुक्त एव विचारक्रमोनुसंधेयः॥ ग्रंथोऽपि शाब्दक्रमं बाधित्वा तत्रैव योज्यः॥ अथवास
त्रकारेणाध्ययनानंतरं धर्मजिज्ञासा कर्तव्येत्युपदेशार्थमथशब्दः॥ प्रयुक्तस्तस्य प्रयोजनं वेदमधीत्य स्नायादिति स्मृतिप्राप्तस्ना
नकालबाधः॥ वेदमधीत्य तावन्न स्नायाद्यावन्न धर्मं जिज्ञास्यन्निति। न कुर्याध्ययनविधिविचार इति ग्रंथकर्तुरभिप्रायः॥ त

अ२

राम० ५

नस्तस्येति-विचारस्येति कर्त्तव्यतारूपत्वादध्ययनविधेरेव तात्पर्यतो व्यापार४-नचैवं प्रवृत्तिभेदापत्ति४आविचारात्स्वतन्त्रे
रेकत्वात् एकाहि प्रवृत्तिरंगप्रधानयो४ वक्ष्यति च अंगप्रधानभवत्या तावनायापुगपत्सुनुषजिपोग इति-मीमांसावेतिकर्तव्य
ताल्वे नांगोत्तदुक्तं धर्म्मे प्रमीपमासोनुवेदनकारणात्मना-इतिकर्तव्यताभागमीमांसा परपिष्यजीति अतोवैधएवापंशास्त्रा
रंभइतिसिद्धान्तकोव्युपपत्ति४-नचैवं सतिनप्रयोजनस्यवाक्यार्थत्वं स्यात्-अध्ययनविधिदृष्टार्थत्वप्रतिपादनस्यैववाक्यार्थत्वा
वगमात् तत्तश्च मीमांसायां४प्रयोजनेवक्तुमेतत्सूत्रमितिवार्त्तिकेनोपपद्यते नैषदोष४-मीमांसारंभस्याध्ययनविधिदृष्टार्थत्वप्र
तिपाद्यत इति फलतः४प्रयोजनपरत्वाभिधानं तत्प्रतिपादनेचशास्त्रारंभानुपपत्ति४सूत्रस्यशास्त्रादावेवन्वयस्यैवस्यात् अतो
क्षे५ ध्ययनविधिदृष्टार्थत्वे तात्पर्ये सति विचारस्य कर्तव्यतोपपत्तौ धर्म्मजिज्ञासस्य प्रयोजनत्वं फलितं सूत्रस्य तदुक्तिर्व्वचनोपपत्ति
४अतोयत्तैश्चिदुक्तं नात्र प्रयोजनपदे नोपात्तं न चापदार्थस्य वाक्यार्थत्वं नचावाक्यार्थतात्पर्यं प्रयोजनपरत्वेव कर्तव्यतानु
पदेशानर्थक्यात्४शाब्दयोरनवयइति तदपास्तं फलतस्तस्यप्रयोजनपरत्वात् वाक्यार्थस्यैवान्यपरत्वे अनाचितपदार्थकत्व राम० ५
चाधानवकाशीदित्यलं-एवंविचारस्वरूपमुपवर्ण्य पूर्वपक्षमारभते तत्रेति प्रमाणान्तरसिद्धत्वादेवार्थत्तानार्थत्वं नपुनः
त्तिपर्य४-नचैवमानर्थक्यापत्तिरित्याहाकल्प्यत्विति-नुशब्द४सिद्धान्तापक्षेयातिशयद्योतनार्थ४सिद्धान्ते पुरुषार्थरूपस्याथ

क्ष२ क्ष१ अ३

स्वा

विवोधस्यमरत्वत्वं ग्रन्थनु पुनु बार्थं न पस्य स्वर्गास्य एवं च चेतन प्रवर्त्तनात्मकाविच्छुप पत्तिरिति पर्वोद्दृ व्यावष्टे श्री अध्ययति
नतावद् यम पर्वविधि ४ वेदाध्ययनमर्थज्ञानहेतु ४ आध्ययनलाः श्रमा रजाध्ययन वदितिप्रमाणाज्जरेणोव प्राप्नलाग्न
म्रा प्रेवं शास्त्रस्यार्थवत्वादिति पर्य ४ नाप्य वद्यातवन्निपमविधित्वमित्याह नचेति क यन खात्प येज्ञो यामाह श्रकत स्व ३
र्थत्वादिति अनारमुंधीतत्वेनाध्ययनस्याक्रत्वर्थत्वादित्यर्य ४ पर्सत्ताव हविष्यतीति चेत्र नेत्याह अनुन्याघनावादिति
ननु सर्व्वथा फलाश्रवणे विश्वजित्न्यायेन तत्कल्पनाश्र पत्ते वात्र फले यं यं क्रतुमधीतेते न तेनास्येष्टं भवतीति क्रतु फला
वाप्ति ४ यद्वचो धीते पयस ४ कुल्या अस्य पितॄन्त्स्वधा अपि च हन्ति यय आज्यस्ति मिरे वतद्देवा ४ स्तर्प्पयति ते पितगदेवास्येन
मध्येतारं प्रान्ना पुरादिभिः सर्व्वर्पतीत्यादिषु रोप्राप्ति ४ यथाय ४ स्तत्स्य विद्धिज्ञो धोतं श्राघ्यायं शक्तितोय हाम्नाहे व सन
स्वाग्रस्य ४ परसंध्यत्ते ज यदृतिज्ञ प ४ फल प्राप्ति ४ कथमर्थवादात्फल कल्पनमिति वरं निदर्शामति प्राव दितिन्मस ४ अन
परित्यागस्यापुक्तत्वार श्राज्ञोन स्वर्गा क कल्पना युक्तेतिमैवं एतन्फल श्रुतेज्जप यत्नाध्ययनगोचरत्वा रत्र हरह ४ स्वाध्या स्वा
यमधायेतेनिविध्यंतरश्रवणान्न यं यं क्रतुमधीप्रीतेत्याघुपक्रम्यानित्य श्राध्याय वाद्विज इत्युपसंहारात् वेदाज्जरस्वीक
रणार्थत्व प्रथमाध्ययनेध्ययनविधिविहितेन किंचित्फलं क्षयते यतो नद्दृशादितिस्यात् अतादृष्टार्थमेवाध्ययनमितिसि

स्तो २ ५१३

रा॰म॰ ६६ धीत्र प्रतिजानीते शास्त्रमिति · यदुक्तमध्ययनस्यार्थज्ञानार्थत्वात् प्रमाणान्तरसिद्धत्वाद्विधेरानर्थक्यमिति तन्नप
रिहरति विधेश्चेति · पूर्वपक्षोक्तदूषणमनूद्य परिहरति यदुक्तमिति स्वामित्वेन नियमं पूर्वपक्षमुपपादयति कथं त
६ र्हीति · न चाध्ययनार्थत्वे त्रैवर्णिकानुपादानात् यन्त्रैवर्णिकाधिकारनियमसिद्धिरित्याकाङ्क्षायामाह तथाहीति · अध्ययनवि
ध्येकवाक्यतया त्रैवर्णिकलाभ इति भावः । न चैवं रूपाधिकारनियमस्यापूर्वादिकरणाभ्यासित्वमीरनाध्ययनविधि
प्रयोजनत्वमित्याशङ्क्याह साचमिति । तत्राप्यध्ययनविधिविवशादेवेति नियमसिद्धिरित्यर्थः । एतच्च विभवादुक्तं · वस्तुतस्त्व
स्तो पूर्वविधिस्वीकारेणापूर्वपक्षोक्तदोषपरिहारात् नियमार्थत्वं संभवति अनारभ्याधीतस्यापि रसामर्थ्यात्क्रत्वर्थत्वोपपत्ते
ः · यावद्धि फलवत्कर्मानुष्ठानोपयोगिज्ञानोपायपर्यालोचनं किं विकल्पयितुमारभ्यते तावत्स्वाध्यायोऽध्येतव्य इति प्र
त्यज्ञया श्रुत्याध्ययनमेव तदुपायत्वेन विधीयते लिङ्गात् । श्रीब्रह्मप्रवृत्ते । तूपनयनप्रक्रमाधीनत्वात् क्रतदेकवाक्यतयाधिका
रनियमोऽपि सिध्यतीति · हन्त तर्हि पूर्वविधिरेवायं जात इति नियमभाषानुपपत्तिः । नैष दोषः फलतस्तदुपपत्तेः । अपूर्वविधि
त्वे सत्युपायान्तराणापादनात् नियमः फलतीति · परिसंख्यावत् · वाक्यार्थत्वेऽपि परिसंख्यायाः स्वार्थहानादिदोषः प्रसज्येत् रा॰म॰ ६६
अतोऽपूर्वविधित्वेनैव निस्तारः · अतोऽत्राध्ययननियमो वाक्यार्थः । किल पूर्वविधेः फलमिति न पूर्वपक्षोक्तदोषावकाशः · नचै

स्तोत्त

जावत्ताध्ययनस्य क्रत्वंगतापत्तिः॥ तद्दर्शयति ज्ञानस्यैव क्रत्वंगत्वात्· यद्देवेत्यादिना तस्यैव क्रत्वंगावबोधनात् अध्ययनंतु
ज्ञानांगमेव· यथाधानसाध्यानामग्नीनां क्रत्वर्थत्वेपि नाधानस्य क्रत्वर्थत्वं एवमिह ज्ञानस्य क्रत्वर्थत्वेपि नाध्ययनस्य क्रत्वा
पल्वमिति सर्वमसमंजसं फलितमाह· नेमति· अयं च ग्रंथकारस्याभिप्रायोस्माभिरर्थवत्त्वादिना पूर्वमेव प्रकटीकृतः॥ नन्वेवं दु
मादीनामनर्थकानामध्ययनं कथमर्थज्ञानार्थं स्यात्· नैष दोषः॥ गीतिकालोपसर्गकल्पेनैव तेषामर्थवत्त्वोपपत्तेः॥ अ स्
ध्ययनोपात्तेन स्वाध्यायेन यत्तु कृपात्तत्कुर्यादित्येकपाववचनव्यत्यासवैद्याप्रयासामर्थ्यविनियोगकल्पनात्· एतच्चा
र्थवादाधिकरणे विशेषतोस्माभिर्निरूपणीयमिति नेह प्रपञ्च्यते इतीति· एवं श्रवणमतेन पूर्वोत्तरपक्षावुपन्या
स्य एकदेशिमतेन तौ दर्शयितुमाह केचिदिति· आचार्यकस्य पुंसान्तरगामित्वेन बहिरंगत्वादध्ययनप्रयोजनत्वमेव क
ल्प्यमिति चेत् प्रथमावगतत्वादिति क्रमः॥ अध्ययनमस्वैरेणाचाध्ययनस्यैषास्तिद्धः॥ अर्थज्ञानं तु पश्चात्प्रतीतत्वान्न प्रयोजन
मन्तरांगत्वादिति अध्ययनकर्तृगामित्वेनान्तरंगत्वादित्यर्थः॥ प्रथमावगतत्वात्तत्प्रयोजनमिति चेत्· न· प्रथमावगतत्वा
दपि तस्य प्रयोजनत्वापरिकल्पनात्· अकस्मिन्नेपि तस्य प्रयोजनत्वेध्ययनानुष्ठानसंभवात्· नियोग एव शब्दादवगतः॥ प्र
योजनस्याज्ञार्थज्ञानमिति चेत्· न· अर्थज्ञानस्यापि प्रतीयमानस्यात्यागायोगात् फलकल्पनां निराकरोति आचार्येति

रा०म०
७

फलकल्पनानुपपत्तेरर्थज्ञानार्थत्वं पर्यवसास्यतीति भावः ॥ आकार्यैकरणविधिनाध्ययनस्य प्रयुक्तिमुपपादयति अ
त्रेति त्का प्रत्ययेनाध्यापनसमानकर्तृकत्वमवगम्यमानं तस्यैव प्रयोगमित्यर्थः ॥ न ह्येव तत्राज्ञेन तत्प्रयुक्तिमुचितानत्वध्ययन
स्येत्याशंक्याह तदेवमिति । उक्तरीत्या परंपरया तत्प्रयुक्तेत्यर्थः ॥ दूषयति तदिति । नियोगार्थतेवेति । नियोगस्यैव श
7 ब्देनावगम्यमानत्वादध्ययनप्रयोजनत्वमिति भावः ॥ तथापीति अर्थज्ञानस्यापि प्रतीयमानत्वात्प्रयोजनत्वमिति भावः ॥
प्रमाणान्तरेति अप्राप्ते शास्त्रमर्थवदिति न्यायात्प्रमाणान्तरासिद्धस्यैव शास्त्रविषयत्वमित्यर्थः ॥ विध्यर्थत्वापत्तिं नियमांगीका स्त्र ५
रेणासमत्यज्य प्रवेशयन्नाह नत्वेति । प्रकारान्तरेणापि वैरूप्यमाह अर्थेति । अर्थाज्ञातमिति । शास्त्रतत्स्तु नियोग एव प्रयोज
ने । नियोगार्थत्वस्यैव शास्त्रेणावबोधनादिति भावः ॥ अशास्त्रीयत्वे चार्थज्ञानस्य तन्निष्ठार्थस्य विचारस्याप्यशास्त्रीयत्वाद्रमागो
ल्कर्षकत्वं न स्यादित्याह स्मृतीति इदानीमेकदेशयुक्तानि अप्रयज्ञदूषणानि परिहरन्ति । किं वेति । प्रथमाईव्याचष्टे यत्तावदि
ति । कल्पनानुपपादयति कार्यहीति । नियोज्यकल्पनां विनापि नियोगस्वरूपासिद्धिमाशंक्याह । यद्यपीति । परप्रयुक्त अध्या
यनप्रयुक्तं यदनुष्ठानं ततस्वाध्ययनयोगस्यात्मलाभ इत्यर्थः ॥ कथं न सिध्यत्यत आह । नहीति । अध्यापनकृतस्वध्याप रा०म०
ननियोग एवोद्देश्यो नाध्ययननियोगः ॥ अनन्यपरकृत्युद्देशस्यैव कार्यत्वादिति भावः ॥ अस्त्वेवं कथमेतावता नियोज्यकल्प ७

नेत्यत आह॰ नचेति॰ अज्ञोनि योगकल्पनमावश्यकमिति भाव४ एतदेवोपपादयति अध्यापनेति॰ अध्ययनमात्रमिति॰ नेन
वि नाध्यापनविध्यनिर्वाहादित्यर्थ४॰ तस्यमाणावकस्याभावध्ययनवियोग४। प्रयाजापूर्ववत्कार्यत्वमाशंक्याह॰ प्रपा
राहीति। अर्थज्ञानोपायिकत्वमाशंक्याह। अर्थेति। अध्ययनकलत्वेन तन्मात्रापेक्षत्वमिति भाव४ निगमयति। तस्मादिति द्वि
तीयार्द्धव्याख्यानुमाह॰ यचेति॰ उपनयनस्याध्यापनांगत्वे शेषिणा शेषिप्रयुक्ति४ स्यात्‌ न त्वेवमस्तीति भाव४॰ एवमप्यंगांगि
भाव४ सेत्स्यतीत्याशंक्याह द्वितीयपचेति॰ त्वेतीयार्द्धव्याख्याने॰ चैतरः॰ वसंते ब्राह्मणमित्यादि द्वितीयपचेत्यर्थ४॰ यथाऽग्निं ग्र
हे ग्रहीत्वान्तर्वृत्तायरूपं परिवीयाग्नेपश्ववनीयं पशुमुपाकरोतीति यूपपरिव्याणं प्रधानं द्वितीयानिर्दुशान्सन्निधानाच्च एव
मुपनयनमाणवकसंस्कारार्थं नाध्यापनार्थमित्यर्थ४॰ को भुत्पाध्यो(?) मांगत्वमिति वेरनेव्याह स्म्नीति। अत्राशंकते भवलि
ति॰ परिहरति मैवमिति॰ अध्ययनसमानाधिकरणत्वा उपनयनस्याध्ययनार्थत्वमेव युक्तं न त्वहिरगाध्यापनामित्यर्थ४॰ एतदेवो
पपादयितुमाह॰ अध्ययनमिति॰ इतश्चाध्ययनांगमित्याह स्मरणादिति॰ संमानतोत्संजनाचार्यकरणज्ञानमभ्ती(?) विगणलब्ध
यं पुनियइति पाणिनीयसूत्रादित्यर्थ४॰ एतदुक्तं भवति अध्यापनांगत्वे कर्त्रभिप्रायत्वा क्रियाफलस्य स्वीतान्ति न इत्यनेनैव
सूत्रेणाज्ञित्वादेवाचार्यकमाधनेय्यर्थे वर्तमानान्नयतेरात्मने पदं प्राप्नोतीति संमाननादि सूत्रमनर्थकं स्यात्‌ अत४ सम्मानना

राम ८ दि सूत्रेणाणावार्यकरणोपदात्मनेपदविधानंतद्कर्तृगामिन्यापिक्रियाफले आत्मनेपदं यथास्यादित्येवमर्थमिति यथाह
वृत्तिकारः कर्त्रकर्त्रभिप्रायार्थः पुनरारंभ इति। त्का युत्पाउपनयनस्याध्या। पनांगत्वमाशंक्याह- उपनीयेति- सूत्रस्य
वाक्यत्वात्तदपेक्ष्य पाल्का प्रत्यय श्रुतत्वं लीयस्त्वमिति शंकामिप्रायः- कालाधंस योगेपिल्का प्रत्यया यपत्तिः इति परिहा
8 रामिप्रायः। उपनयांगत्वपर्वमर्थाः क्रमेव संमाननादिसूत्रानर्थक्यमिहादीप्रकटीकरोति- पुनरिति- वस्तुतस्तु पु
मरित्यादिग्रंथः सिद्धदित्यस्यानंतरं द्रष्टव्यः। उपनीयेत्यादिग्रंथस्तु वदित्वोत्पस्यामत्र रद्रष्टव्यः- आनार्थक्यपरिहर्तु
शंकत्तेनस्याविमियस्माद्वनयनजन्यसंस्कारो माणाकसमवायीतस्मादकर्मि यार्थः- पुनरारंभोर्थवानित्यर्थः- परिह
रतिसत्यमिति- नतदर्थः समाणावकार्थः- यदिमाणावकार्थः स्यात्तदाकर्त्रभिप्रायार्थः- पुनरारंभोर्थवान् स्याच्छंकि
तपनकर्त्रर्थः ततश्चजित्वादेवात्मनेपदं स्यादितिभावः नन्रूपनयनकर्तृप्यसमवेतस्यसंस्कारस्य कुर्यकर्त्रर्थत्वेतत्रा
हत्रात्रेयंत्वमिति इतश्चवाध्यापनांगमित्याह- इयंचेतितिगमयतितस्मादिति- फलितमाह- इतीति पर्वपज्ञीक फवराणादर रा०म० ८
मर्घपरिहरतियच्चेत्यादिनानचस्त्वध्यापनांगमेवाध्ययनं किमेतावतानिष्टः स्यादतआह इतीति- अध्यापनार्थत्वेध्यय
नस्यार्थज्ञानार्थत्वनस्यादित्यर्थः- ततः किमत आह। इतीति- इदानींतन्मतेनैवार्थज्ञानार्थत्वमाशंक्यनिराकरोति- अध्याप

श्लो ३

क्षि

दिना। तदौपयिकत्वं अध्यापनौपयिकत्वं केनेति। अध्यापनविधेरर्थज्ञानार्थं न याविद्यापकत्वस्योक्तत्वादिति भावः॥ अध्ये-
तव्य इत्यस्याविधायकत्वमाशंक्याह अशक्य इत्यादिति। प्रकारान्तरेणाध्यापनप्रयुक्तिमाशंक्यानिराकरोति यदीति। तत्र प्रयुक्ति-
रिति। तेनाध्यापनेन विहितस्यैव प्रयुक्तिर्न लभ्यत इत्यर्थः॥ विहितप्रयुक्तत्वाभावप्रतीयमानस्य व्यर्थस्याविवक्षितत्वा-
द् अविवक्षितस्य च विचारानर्हत्वाद् अनारभ्यमेव शास्त्रं स्याद् कथं विदर्थविवक्षायां वा विधेरतत्परत्वाद् न वैधत्वं विचारस-
सिध्यति अवैधश्चन वैधस्थाने युक्तश्च प्रहर्तीति भावः॥ कथं न सो स यज्ञा यामाह। तदिति। लौकिकोपि जीवनोपि प्रयुक्तिसंभवादि-
त्यर्थः॥ इतो प्यवाप्तिन्याह विहितामिति। अध्यापनादिविधिप्रयुक्त्यभावे च लौकिकमेवार्जियेदित्याह। तस्मादिति। अस्त्वेवं चाक-
मेतावता निष्टं स्यादत आह। विधीति। परेणाध्यापनेन या प्रयुक्तिः सा विधिविहितस्य न लभ्यत इति कृत्वा विधिविहितम-
ध्ययने स्वतंत्रमाधिकारं कल्पयेदित्यर्थः॥ इतोपि नाध्यापनांगमुपनयनमित्याह। किं चेति। न चाश्रुनामैन दर्सवद्धमिव
अध्यापनांगत्वं रूपनयनस्यासिद्धं। तत्राह तत्र श्रवेति। अध्यापनांगत्वे सतीत्यर्थः॥ अध्यापनांगत्वे तु नैतद्दूषणमित्या-
ह। तस्मादिति। यदा त्वध्यापनांगमेवोपनयनं तदानंतद्वारेणाध्ययनस्य प्रवृत्तिसंभवति न वांगमाकृष्यमाणां प्रधान
माकर्षति। प्रधानतानामनंगवशवर्तित्वादिति। ननु नात्र मुख्यत्वेनाध्यापनविधिप्रयुक्तिर्निराकृतानां व्यध्ययनस्य स्वावि-

सि

हे

राम· ९ विधिप्रयुक्तिर्नुपपादिता। तदध्ययनस्याध्यापनांगत्वमात्रनिराकरणादिति। आह। प्रपंचेनेति विनिराकरणं ग्रंथांतरप्रयुज्यते
क्वाप्यतस्तत्रत्यमेवैतत्संक्षेपेणोच्यते। अयमाशयः। यद्येतन्नियोज्याश्रवणान्नाध्ययनविधिरध्ययनस्य प्रयोजकोमीवमुंजमस्तस्मा
दध्यापनविधिप्रयुक्तिरंगीक्रियत इति मैवं अध्यापनेऽपि तुल्यत्वात्। न ह्यष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेत्यत्र नियोज्य
१ । कश्चिच्छ्रुतः। तदश्रवणे वाध्यापनप्रयोजकत्वमपि न संभवति। दूरेऽध्ययनप्रयुक्तिः। तत्रापि अर्थककामस्येति नियोज्यत्वकल्पने अध्यय
नविधावर्थज्ञानकामस्येति नियोज्यत्वकल्पनं तुल्यं। ननु ज्ञाते अर्थे कामनास्यादज्ञाते वा नाद्यः। ज्ञाते तदनुपपत्तेः। न हि ज्ञाते एवार्थे
ज्ञानमिष्यते न द्वितीयः। सर्वथाबुद्धेनार्थे रूढैर्योजकस्य तदनुपपत्तेः। अतो नार्थज्ञानकामस्येति नियोज्यता संभवतीति चेत्। केनचिद्रूपे दोष
णावगतस्य केनचिद्रूपेण जिज्ञासादर्शनात्। अत्र च धर्माधर्मयोरर्थानर्थहेतुत्वमात्रेणावगतयोर्विशेषरूपेणापरिज्ञातयोर्हानो
स्वा८ पादानाशक्तेस्तत्परिज्ञानेच्छा संभवतीति धर्माधर्मज्ञानकामः। अध्ययमधीयीतेति नियोज्यलाभः। नैमित्तिकनिषेधाधिकारयो
र्यद्यपीष्टानिष्टप्राप्तिपरिहारार्थता नास्ति तथापि विध्यर्थानुष्ठानसिध्यर्थमेवतदुच्छा कार्यज्ञानमपेक्षितव्यम्। हंत तर्हि प्रागपि वेदा
ध्ययनाद्धर्मजिज्ञासोपपत्तेस्तदानंतर्यमनुपपन्नं। न जिज्ञासामेदाद्यापथाद्युः। जिज्ञासैकापनीतस्याद्वितीयापाठिवश्रुतेः। ज्ञातवि राम° ९
घातरस्याम्नायामीमांसापुरस्सरेति। अतिम जिज्ञासायावेदाध्ययनानंतर्यमुपपत्तिः। अत एवाह भाष्यकारस्तादृशीं तु धर्मजि

हि

न्नासामर्थिकत्वाधशब्दं प्र युक्तवानाचार्यो यावेदाध्ययनमंत्तरेणन संभवतीति तावि ष यभूताध्ययनफलं ज्ञानं । ननियोग
जन्यमितिन तत्कामस्यानियोज्यत्वविचोगफलस्यैव नियोज्यावच्छेदकत्वादितिचेन्न नहि स्वार्थोपेक्षमपि न नियोज्यविशेष
णस्याद्गतस्यापि विषयफलत्वात् । कस्मात्सावध्यापनविधिर्यत्स्य पुत्रस्य मध्ययनेस्यात् । उपनीय तु य ऽ शिष्यमित्यादि स्मृत्य
नुमितमुपनीयाध्यापयेदाचार्यकसिध्यर्थमित्येवं रूपं वचनमितिचेन्न । न । एतस्याध्ययनविधिपरत्वात् । यघेवाचार्याघकाम
याजयेदित्यादिषु याजयतेः पर ऽ अयमारोपिवि न । एतस्याध्ययनविधिपरत्वात् । यघ्यवाचार्य को मेधी यो
गविधिपर एव । याजयेदिति प्रयोजकव्यापारवचनशब्दस्य द्रव्यार्जनार्थप्राप्तत्वे व्यापारानुवादत्वस्य कल्पमानत्वात् ।
एवमध्यापयेदित्यध्ययनविधिपर एव नाध्यापनविधिपर ऽ द्रव्योपायत्वेनैवतस्य प्राप्तत्वात् यथाह ऽ नाध्यापनमिदं वा क्वविद्या
र्जनमतेयत ऽ । द्रव्यार्जनार्थप्राप्तत्वाच्च द्वेन च संगते ऽ । एवमष्टवर्षब्राह्मणमुपनयीतमध्यापयितेत्यत्रापि । अष्टवर्षो
ब्राह्मणमुपगच्छेत्सोधीयीतेध्ययनविधिरेव नाध्यापकविधि ऽ । किंचात्रस्मात्तेवाक्यसद्रूपं मूलमनुमीयते षष्ठाष्टधाका ऽ
कर्तव्यादितिदृष्टा श्रुतिरपि कर्तव्यताविषयैवानुमीयते । इह पुनरध्यापनकर्तरि कौकिका आचार्यशब्दं प्रयुंजत इतिसिद्धानु
वादस्य कर्तव्यताश्रुतिरनुमातुं शक्यते । उपनीयदद्ददमाचार्यं ऽ सउदाहृतइत्यप्यनुवादो नात्र क्वचिदपि विधिगंध ऽ

सु

लो

राम० १० किंचाप्रवृत्तप्रवर्त्तनं विधेरर्थः। आचार्यकमनुवदताध्ययनस्य स्वरूपमेव प्रवृत्तमिति किं न द्विविनियुक्तमेव। यद्यपि विद्यादानेन सुम
ति ब्रह्मलोके महीयत इत्यादिभिर्विद्यादानात्मकमध्यापनं फलान्तरशेषतया विहितं भवेत्। तथापि नाध्ययनस्य तत्प्रयुक्तिः।
तत्र सर्वत्र नियोज्यापेक्षत्वात्। नियोज्यतापि फलसाधनत्वश्रवणाद्भविष्यतीति चेत्। न। एवं तूपाधिकारमात्रस्याध्ययनेपि स
द्भावात्। अत्र कश्चिदाह। आचार्यज्ञाने स्वरूपमपुरुषार्थत्वान्नाध्ययनस्य प्रयोजकं ज्ञानसाध्यानि त्वग्निहोत्राद्यपूर्वाणि तद्द्वारेणाध्य
यनस्य प्रयोजकानि भवन्ति। न च तेषां ज्ञानमंगं श्रुत्याद्यभावात्। उपकारकमात्रं तु भवति आचार्यकस्य त्वध्यापनमंगमेव। आ
अतस्तत्स्वांगद्वारेण प्रयोजकं तस्मादध्यापनविधिप्रयुक्तमध्ययनमित्याह। तदयुक्तं। यद्यपि न कर्मांगज्ञानेऽध्ययनं तु ज्ञाना
गमेव तेन च प्रयुज्यमानमध्ययनं शेषिप्रयुक्तमेव भवति। अध्यापनप्रयुक्तं तु न शेषिप्रयुक्तं भवति। अध्ययनस्य तदनंगत्वात्।
उपकारकमात्रत्वे नैवांगीकारात्। यद्यपि ज्ञानं स्वरूपेण पुरुषार्थं तथापि कर्मानुष्ठानोपायिकतया पुरुषैरर्थ्यमानत्वात् पुरुषा
र्थो भवति। आचार्यकमपि न स्वरूपेणाभिलषितं दक्षिणालाभसिध्यर्थमेव तु पुरुषेणार्थ्यन्ते। अतो यथा तस्य प्रयोजकत्वमेवं
ज्ञानस्यापि। अश्रुवाग्निहोत्राद्यपूर्वमेव ज्ञानद्वारेण प्रयोजकमन्तरंगत्वात्। न त्वध्यापनं पुरुषान्तरगामित्वात्। वस्तुतस्तु तदपि राम०
न प्रयोजकमन्तरविधिप्रयुक्तत्वे फलार्थित्वेव प्रवृत्तिकल्पापत्तेः। अदृष्टादेरप्यधिकारे प्रसज्येत फलाश्रितत्वापत्तेर्विशेषा १०

ध्ययने न स्वाध्यायं भावयेदिति वाक्यार्थः स्यात्। ततश्च स्वाध्यायस्याध्ययनं प्रत्युद्देश्यत्वानुवाद्यत्वप्रधानत्वादि
सु। अध्ययनस्य तु तं प्रत्युपादेयत्वविधेयः।

छं२ हे

र्थ-विद्यादानेऽस्मतिरिक्तेत्यपि पुरुषार्थप्रापकविद्यादानानामिप्रायेण वाध्ययनस्य पूर्वं पर्वपदे पुरुषार्थतास्तीति न तत्र सत्वो
कप्राप्तिफलविद्यादानविधिवशादपि तस्य प्रयुक्तिः। सम्भवति। ततश्च नाध्यापनविधिप्रयुक्तमध्ययनमित्यपलमति विस्तरेण।
स्व३ एवमेकदेशिमतं निराकृत्य पूर्वोक्तं स्वाभिप्रेतमेव विचारं प्रयोजनरूपमुपसंहरति। तस्मादिति। विचारस्य पौनरुक्त्यमाशंक्याह। अ
यं भाव इति। न त्वध्ययनस्य स्वाध्यायार्थत्वे फलगुणत्वानीति विरुद्धत्रिकद्वयं अध्ययनस्य पुनरर्थज्ञानार्थत्वे ऽध्ययनेनार्थज्ञानं भा
वयेद् अध्ययनेन स्वाध्यायेनेति वाक्यार्थः। ततश्च स्वाध्यायस्याध्ययनं प्रत्युपादेयत्वादीनि सु। अध्ययनस्य तु तं प्रत्युद्देश्यत्वा
दीनीति तथा स्वाध्यायस्यार्थज्ञानं प्रत्युपादेयत्वादीनि अध्ययनं प्रति संस्कार्यत्वेनोद्देश्यत्वादीनीति। अत्रोच्यते न स्वाध्यायोद्दे
शेनाध्ययनं विधीयते नाप्यध्ययनोद्देशेन स्वाध्यायविधिः। किन्तु स्वाध्यायाध्ययनेन विशिष्टतरापेक्षितं संपादयेदित्येकरूपे वाक्यो
क्यप्रवृत्तिः। अपेक्षितसंपादनं चाध्ययनस्य स्वाध्यायसंस्कारमुखेनैवेति स्वाध्यायस्य प्राधान्यमध्ययनस्य च तत्कृतं फलमिति न
वैरूप्यं। एवं स्वाध्यायस्यापि न वैरूप्यं। अधीतेन स्वाध्यायेनार्थज्ञानं भावयेदित्येकयैव वचनव्यक्त्या तत्परिहारात्। अत एव स्वाध्या
यस्य संस्कार्यत्वेऽप्यर्थज्ञानं प्रत्युपादेयत्वान्नैकत्वस्याविवक्षितत्वादेकशाखाध्ययनेऽपि अध्ययनशास्त्रार्थनिवृत्तिः। सध्य
नीतिशास्त्रान्तराधिकरणादर्शितं। कथमेकेनैव वाक्येनोभयसिद्धिरित्यत्र। सामवदिति क्रम। यथा साम्नामुद्गीतेति सूत्रो।

छि२

स्स
रा॰म॰ विनियुक्तस्यापि मात्रस्य स्वाभाविकाच्चैरसंस्कारत्वेन हापतेन द्वारेणैव स्तुतिसाधनत्वात् नहितत्र वर्णवाक्यांतरे णविनियोगो
११ ऽस्ति अथ यजत्संस्कारत्वमेव सामानोभवति एवमध्ययनस्यापि स्वाध्यायसंस्कृत्त्वेन एवार्थज्ञानजनकत्वनान्यथा अतएवंजाती
सि॰२ यकस्वभावतः संस्कारेरूपमपि संस्कार्थचोदृशेनाविवाजादर्थकर्माभिधानमपि लभते ननु सामेतिगीतिमात्रविनियोग
नवर्णास्तुताविनियोगात् अनेगभूतानांव संस्कार्यत्वानुपपत्तिः मैवं मामविनियोगेनैव साम र्थ्यादृग्मपि स्तोत्रविनियो
गोपपत्तेः अतोदृष्टार्थत्वेप्यध्ययनविधेरर्थ्यमार्थत्वान्नानर्थक्यमितिसिद्धं नचक्रतुर्थ एवनियमविधिरिति पुरुष
र्थेऽस्तितिवाच्यं पुरुषार्थस्यापिद्रव्यार्जनादिहि पुरुनियमविध्यभ्युपगमात् अत्रनु पूर्वोक्त्या पेनापूर्वविधित्वसिद्धेः फलत्व
तवनियमो नवतितस्याजपयत्तयाराधपराक्रतु ज्ञानसिद्धिप्रयोजनमध्ययनं अतएवनित्यं अवश्यानुष्ठेयं जपयपत्तादि
साधनत्वात् नावमिकमेवत्या पंविदृत्ताति मनवमेहोति नचयमर्थश्रवमेवमएवसिद्धः साहिकिमर्थोत्रसूत्रारंभइत्यत
आह इतिसिद्धमेवेतदितिप्रयोजनकथनार्थएवात्रसूत्रारंभोव ननुतद्विचारार्थ इत्यर्थः आम्नित्र्येवार्त्तिककृत्समतिमा
हतदाङ्करितानान्नवेदवाक्यस्यार्थविचारार्थत इत्यत्रापि सम्मतिमाहतदपीपि एतच्चग्रन्थारभ्भानपकृते भाष्ययोजनार्थंवा रा॰म॰
र्त्तिकं नचात्रेत्यादि अपव्याख्यायांहि पतनगौरवमुक्तं नचात्रचोदनाकापि व्याख्यायते सूत्रमपिचेन्नव्याख्यायतेनिर्विष ११

यमेवमाध्यंस्यात्। अतो युक्तैव सूत्रव्याख्येत्यर्थः। अन्ततो गौरवमपाद्य तत्व्याख्यानेन चोदनाव्याख्यायामिति भावः
तस्माद् अर्थज्ञानार्थत्वाद् अध्ययनस्यार्थज्ञानस्य च विचारमन्तरेणासंभवाद् अध्ययनानन्तरं धर्मजिज्ञासा कर्तव्येत्युपपादितम
इति गमपति। तत्सिद्धमिति। अयमत्र सूत्रार्थः। तत्राथशब्दस्य चत्वारोऽर्थाः आनन्तर्यमधिकारः पूर्ववृत्तकनादर्थाद
र्थान्तरत्वं मंगलं च। न तावदधिकारार्थः। इच्छाया अनधिकार्यत्वात्। लाप्यपंतिराख्यार्थः। तस्यानन्तर्येणानुबंगि
त्वात्। आनन्तर्यप्रक्रियपैव तानुशक्यत्वाच्च। नापि मंगलार्थः। तस्य द्योत्यत्वात्। अतश्चानन्तर्यार्थः। आनन्तर्यं च पूर्ववृत्तं
वेदाध्ययनादपेतस्मात्किन्नं तस्यैव धर्मजिज्ञासावकल्प्यते वेदवाक्यगतज्ञानकविधिविचाराशातदुक्तं येन इत्येन जिज्ञासा
विनाभेवोपपद्यते तदानन्तर्यमुक्तं हि दृष्टार्थमेव कल्प्यते संकल्पादिनिरपेक्षाविनाशस्यानन्तर्यस्य साधारणत्वात्तत्प्यन्तरो
पदेश्यापः कथं च न। तस्माद्धर्मबुभुत्सायामसाधारणाकारत्वानिर्वर्तकसूत्रकारेष्टतत्तु नाध्ययनादन्तं। तथा चोक्तं। वेदाध्ययनप
मेववेदार्थविचारात्मिकायां धर्मजिज्ञासायां दृष्टार्थं। तेन विनानत्तदनुपपत्तेरिति न चाक्रियाप्रीतोऽनुपादानेऽबुद्धिपूर्वकमुपाद
नस्याशस्मातोऽध्ययनात्प्रागेव जिज्ञासा युक्तेति। केनोक्तं बुद्धिपूर्वकमुपादत्त इति कुमारहि जैमिनिः पित्रादिभिरेवाध्ययनेनतस्य
प्रवर्तितत्वात्। विचार्यार्थाधीयानश्रुविचारस्यानेककालसाध्यत्वादध्ययनकालातिपातात्रत्रान्त्यतामापद्येतान्चेव सति वेदमधी

त्यसन्नायादिति स्मृतिर्वाधितास्यात्। नेति ब्रूमः पूर्वकालतामात्रेत्क्वाप्रत्ययस्मरणात्। अतो वेदाध्ययनानन्तरं धर्मो विचार्य इत्य
स्यतानपूर्वकालता वाधिता भवति। उक्तं वनत्प्यत्रानेनतर्यस्यवक्त्वाकिकश्चिद्दोस्ति। पूर्वकालतायां त्क्वास्मर्यते वानेन्तर्ये इ
ति। अथ वा इत्युगतावितिगत्यर्थस्य धातोर्ज्ञानार्थत्वमपि प्रत्यवेदमर्थता ज्ञात्वात्स्नायादिति व्याख्येयं। यथाहुः अथग्र
हणमात्रे च कृतेस्नानं विनुध्यते॥ अधीत्येत्याधिगम्येति व्याख्यानेत्त्वविरोधिता। अत्रेदं वक्तव्यं अस्तु तावत्पूर्वकालता
मात्रेत्क्वाप्रत्ययस्मरणं तथापि लोकेनुत्क्वा व्रजतीत्यादौ पौर्वापर्यावच्छेदविशेषकरूपमानन्तर्यमेव प्रतीयते तेन दृष्टाध्ययनानन्त
रमनेककालमध्याविचारानुष्ठाने पौर्वापर्यमेव वाधितं स्यात् किमुवक्तव्यमानन्तर्यं वाधितमिति। अतोध्ययनानन्तरमे
वक्रमप्रमितिगमनुकूलात् समावर्त्तनं वेदवाक्यविचारश्चैतत्स्यैव विरोधः। तथा (धीत्येतीडोरूपस्यैव विरोधा) इडोहि नि
त्यसहचरितोधिशब्दः एकदेशाभ्युतोनहि इङः केवलस्य प्रयोगो दृष्टपूर्वः। अतइडोरूपसमुदायप्रसिद्धिः इणोरूपेत्वव
यवप्रसिद्धिः सा च समुदायप्रसिद्धेर्दुर्बला। अधीत्येति चस्नाध्यायाध्ययनाधिकारेश्रुतत्वात् तद्विषयमेवावगम्यत इति
धिगमार्थत्वकल्पना पुक्तेति। अथोच्यतगुरुमहादनात् तत्रप्येवतानमात्रमेनदृष्टार्थनरसंस्काररूपं विधीयते अ
जोगुर्ह्णीह एवाव स्वाध्यायानन्तरं विचारः कर्त्तव्य इति नास्ति विरोधः। तत्रोच्यते व्रह्मचारिणो हि न स्नायादिप्यसमानादिनिय

मउक्तं ॥ तस्यावध्यपेक्षायामधीत्य स्नायादिति विहितं स्नानमग्न्याधानादिनियमनिवृत्तिलक्षणं पतितं तस्य हि चरितान्नस्य गुरुकुलवासादय
इति तन्निवृत्त्या तेषामपि निवृत्तिरित्येवमधीत्येत्यत्र त्वाप्रत्ययार्थविधानेऽस्मृते दृष्टार्थत्वमितरथा त्वदृष्टार्थं स्नानविधानस्यादृष्टेन च दृष्टे संभव
ति लघुत्वं ॥ यथा लोके भोजनकाले स्थालमात्रसंमार्जनोपदेशोपि तस्य हि चरितसकलभोजनोपकरणसंमार्जनोपदेश एवमत्रापि
ति ननु लोके कर्मार्थत्वं क्षणंश्रुतिस्मृत्योस्तु यावदुपात्तमात्रविषयत्वात्सह वृत्तिग्रहणामन्याय्यं ॥ मा हैवं यद्यधीत्य स्नायादि
ति स्मृतिः ॥ श्रुतिस्मृत्योस्त्वनयोर्यमस्तावेतद्या । न्याय एव सकलब्रह्मचारिधर्मनिवृत्तौ समानः ॥ ब्रह्मचारिधर्मा हि गुरुकुलवासा
दयो ऽध्ययनाङ्गमध्ययनसमाप्तौ समाप्यन्ते इष्टिसमाप्ताविव व्रतानि तत्साप ॥ अतो । स्नानं निवृत्तौ न तस्य हेतुरिनानां सर्वेषां निवृत्तिः ॥
न नु भवतु तावद्गुरुकुलनिवृत्तिरेवमस्तु त्वपर्थः ॥ न चापि तदुत्तरकालमध्ययनविध्याक्षिप्तस्य विचारस्यकरणान्नैव विरोधः ॥ सत्त्व म
वेदापि स्मृत्यनुरोधेनानंतरं स्नानं यादिनावस्मात्रमेव स्मर्यते किंतु स्नानोत्तरकालमपि नानाविधानि कर्माणि स्मर्यंते पदिना
प्यन्यनुष्ठेयं ते तत्रोत्पन्नवेदवाधः ॥ स्यात् ॥ न चाविदितवेदार्थः ॥ कर्माण्यनुष्ठानुमीष्टे ॥ तत ॥ किय दूरमपि गत्वावश्यस्मार्तस्यक
स्यविल्पदार्थस्य वाधोगीकर्तव्यस्तदध्ययनानंतरं प्रथमोपनिपातिनो विरोधिनः ॥ स्नानस्यैव वाधनं युक्तं ॥ ननु सत्यपि विरोध
वाचनिकत्वेन स्नानस्य वलीयस्त्वात्तद्वाधो युक्तः ॥ धर्मजिज्ञासैवतु न्यायप्राप्तादुर्वलत्वाद्वाधितव्या मैवं ॥ स्वाध्यायोध्येतव्य इ

राम० १२ तिकरणेति कर्त्तव्यतयोर्यौ पापस्नाविधानेनाध्ययनविधिविरोधाद् स्नायादिति स्मृतेरेव बाधः अत एवाह भाष्यकारः आतिक्र
मिष्यामः समाम्नायमित्यादि । किञ्च कस्यापि वेदवाक्यस्याबाधे स्मृतिरप्रमाणीभवति किं पुनः समस्तस्यैवानर्थक्यापत्तौ । ए
वं चाविरोधानुसारित्वाद्बाधस्य यन्मात्रमेव विरुध्यते तद्बाधितव्यं गुरुगृहपरित्यागमात्रं च धर्मजिज्ञासाविरोधि तस्मात्ताव
13 न्मात्रमेव बाधितव्यं न तु मधुमांसादिभक्षणवर्ज्जनमपीति मतद्बाधः यथाहुः । तस्माद्गुरुकुले तिष्ठन्मधुमांसादिवर्ज्जं पठेत् । जिज्ञा
सेतापि तु कृत्वा धर्ममित्यवगम्यते ॥ ननु मधुमांसादिभक्षणवद्दारसंग्रहोऽपि विरोधाभावात्सानुपादेयो नास्तात्वाभाव्यमधिग
च्छेदिति स्नातकस्यैव दारसंग्रहस्मरणात् । संकल्पप्रोह्मवाधिधर्मनिवृत्तौ स्नातकव्यपदेशात् । तदुक्तं । गुरुगेहादनावृत्तः स्नातको
हि निकथ्यते । तत्परत्वविधानाच्च न तावद्दारसंग्रहः सूत्रकारेणापि पापमिथशब्देन समनन्तर्यबाधः उक्तः सदृष्टार्थत्वेन गुरुकुल
निवृत्त्यंशमात्रस्य नादिनुद्धस्यापि मधुमांसभक्षणादेरिति । एतच्च प्रौढिमात्रेणोक्तं यः स्नातस्य मधुमांसादिभक्षणनिषेधात् समावर्त्तनात्पू
र्वं ब्रह्मचारिव्रतपरित्यागेचावकाशित्वापत्तेः अतो यावद्विचारसमाप्तिब्रह्मचारिव्रतं युक्तमेव भवितव्यमिति युक्तं । ननु वेदमधीत्य स्ना राम०
यादितिवाक्यादध्ययनानन्तरं गुरुगृहान्निवृत्तस्य स्वाध्यायोऽध्येतव्य इत्यस्माच्च पुनः प्रविश्य धर्मजिज्ञासमानो विरोधाभावात्रैवमस्मै १२
त्यर्थबाधेनामैवाध्ययनविधिविरोधापत्तेरकृतार्थस्य स्नानस्यानवर्त्तयितुमशक्यत्वात् । विचारसहितमध्ययनं हि विध्यर्थस्त

स्मिन्ननुष्ठित एव कृतार्थो भवति। अकृतार्थस्य निर्गमो दृष्टार्थः स त्वनर्थक एव स्यात्। कृतार्थस्य त्वाश्रमान्तरनिवेशाय
गुरुगृहान्निर्गमो दृष्ट इत्युक्तं वा। निर्गमो हि कृतार्थस्य दृष्टार्थो गुरुशुश्रूषमतः। समर्थ्यते तस्य नार्थः स्यात् कृतार्थस्य निर्ग-
मो ऽत्र। अतःशब्दोऽत्र हेत्वर्थो यस्मादधीतो वेदो धर्मजिज्ञासायां हेतुर्जातस्तस्मात्तदध्ययनानन्तरं धर्मो जिज्ञासितव्य इति
आनन्तर्योपदेशात् दृष्टार्थतामपास्य शब्देनैवाध्ययनस्य जिज्ञासां प्रति हेतुयुक्तं किमतःशब्देनेति चेदुच्यते। आनन्त-
र्योपदेशाद्धि अध्ययनेन धर्मजिज्ञासायोग्यो भवतीत्येतावदेवाथशब्देनोक्तं स्यात् न त्वनुष्ठानहेतुत्वम् अतस्तदुक्तमतः
शब्द इति। तथा चाहुः। योग्यत्वमथशब्देन यद्यपि प्रतिपादितं तदेव हेतुरित्येतन्नातःशब्दाद्विना भवेत्। अथ च योग्यताकामप्र-
यः। स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिरेवेति कर्तव्यतामतस्य धर्मविचारस्योत्पादकोऽनुष्ठापकश्च। तत्रोत्पत्तावथ
शब्देनाध्ययनस्य हेतुत्वमुक्तं दर्शितं चेतरत्। तस्मिन्हि सति सावकल्पत इति। अतःशब्दोऽप्यध्ययनविधेरेव धर्मजिज्ञासां प्रति अ-
नुष्ठापकत्वलक्षणं प्रयोजकहेतुत्वमाहेति। अकथ्यमाने तु धर्मजिज्ञासां प्रत्यध्ययनविधेरनुष्ठापकत्वे फलार्थतापत्त्या स्वा-
पकत्वेनाशङ्क्येत सा च यद्यपि संभवात्तस्यापायविचारं प्रयुञ्जीत। अतोऽध्ययनविधिरेव विचारस्य प्रयोजक इति वक्तुमतःश-
ब्द इति। अथवा जिज्ञासाहेतुत्वेऽप्यध्ययनस्याथशब्देनैव प्रतिपादिते अध्ययनविधिप्रयुक्तोऽयं विचारोऽनन्तरमेव कस्मात्पर्यवा-

राम० धेन कर्त्तव्यम् इत्यत्र न किंचित्प्रमाणमित्याशंक्याध्यायप्रयोगवचनचोदितयौगपद्यपर्यालोचनपारध्ययनस्यैव स्नानबाध-
१४ कतिहेतुत्वमत॥ शाब्दस्त्वाह। अध्ययनानन्तरं स्नानं न कर्त्तव्यमतः ईक्षित्वा विचारकरणावरोधादिति। धर्मस्य जिज्ञासा धर्मजि-
15 ज्ञासा न चात्र धर्माय जिज्ञासा धर्मजिज्ञासेति भाष्यकारस्त्वाह तत्कथं षष्ठीसमासः॥ उच्यते। तात्र भाष्यकारस्य चतुर्थी-
समासोऽभिप्रेतः॥ किंतु षष्ठीसमास एव चतुर्थीसमासानुपपत्तेः॥ यत्राहि तादर्थ्ये चतुर्थीसमासो भवति तत्र विकृतिरेव च-
तुर्थ्यन्तया प्रकृत्या समस्यते। यथा यूपाय दार्विति। अप्रकृतिविकारयोस्तु न समासो यथा रंधनाय स्थाली अवहननायो-
लूखलमिति अत एवाह वार्त्तिककारस्तादर्थ्यसमासे प्रकृतिग्रहणं कर्त्तव्यमिति। न चेदं सामर्थ्यप्रदर्शनपरं अतोऽप्रकृति-
विकारयोरपि यत्र सामर्थ्यं तत्र समासो भवत्येव। धर्मजिज्ञासापदेऽपि सामर्थ्यस्य विद्यमानत्वात् युक्तस्तादर्थ्यसमास इ-
ति वाच्यं। समर्थः॥ पदविधिरित्यनेनैवाभिहितत्वात्। वाक्ति हितसुखरक्षितग्रहणानर्थक्यप्रसंगाच्च। रंधनाय स्थाल्या-
दिषु समासप्रसंगाच्च। न चात्र धर्मो जिज्ञासाविकारस्तस्मात् समासः॥ तदुक्तं प्रकृत्या विकृतिर्यस्माच्चतुर्थ्यन्ता समस्यते। तादर्थ्ये
यूपदार्वादौ तेनाप्यत्र समासता। अतो नात्र चतुर्थीसमासः॥ किंत्वश्वघासादिवत्षष्ठीसमास एव। अत एव भाष्यकारः॥ सा- राम०
क्षात्स्य ज्ञातुमिच्छति यस्यां तेन विगृह्णाति कथं तर्हि धर्माय जिज्ञासेति विग्रहवचनं नेदं विग्रहवचनं किंतु अर्थविशेष १४

प्रदर्शनार्थः तदुक्तं साहित्यस्येत्यनेनोक्तो धर्म्मस्येत्येष विग्रहः। धर्म्मायेति तु तादर्थ्ये षष्ठी इत्येतत्कथ्यते· पदार्थमहो
वेक। धर्म्माय जिज्ञासेति विग्रहीतस्य षष्ठ्यर्थकथनपरं भाष्यं न तु तादर्थ्यलक्षणसंबंधविशेषविवक्षायां तादर्थ्ये चतु
र्थ्युपसंख्यानमिति चतुर्थ्येव प्राप्नोतीति तत्र च समासानुपपत्तिः। संबंधमात्रविवक्षायां तु तादर्थ्यकथनमसंबद्धः· अत्राप्य
ते· मन्त्रकारेणात्र संबंधसामान्यविवक्षयैव धर्म्मजिज्ञासेति चतुर्थ्येव प्राप्नोतीति तत्र च समासानुपपत्तिः। संबंधमात्र।
तद्वीयानुता षष्ठीसमासः। स प्रयुक्तो निर्विशेषसामान्यानुपपत्तेस्तु तादर्थ्यरूपविशेषाभिधानं धर्म्मायेति भाष्येणाद
र्शितेति न कश्चिद्दोषः। धर्म्मजिज्ञासापत्र कर्त्तव्यातिशेषः। अत्र केचित् न चात्र ज्ञातुमिच्छा जिज्ञासा इच्छायाश्च कर्त्तव्यत्वा
र रामात्यत्तो ज्ञाते विशेषजिज्ञासा विचारं विना न सम्भवतीत्यनन्तर्मात्रविचारजिज्ञासापदसामर्थ्याद्धृदाध्यपेनानन्त
रं तद्धेतुको धर्म्मविचारः। कर्त्तव्य इति प्रतिज्ञासूत्रार्थः। संपद्यत इत्याह सततयुक्तमिव साहित्यस्य ज्ञातुमिच्छेति भाष्य
विरोधाद्· न चेच्छायाः। कर्त्तव्यतानुपपत्तिः। बुभुक्षावदुपपत्तेः। दृश्यते च मन्दाग्नीनामपि भोजनादिना तत्कर्त्तव्यता:
न चेच्छाया इच्छाविषयत्वाभावात्कर्त्तव्यत्वानुपपत्तिः। मदग्नीनां भोजनेच्छायामिच्छादर्शनात्· अत एव तत्राप्यकारो
नाधर्म्मजिज्ञासामनुतिष्ठेदिति धर्म्मजिज्ञासां कर्त्तुमिच्छेदिति धर्म्मज्ञानेच्छानिवृत्त्यर्थं द्विनीयेऽध्यापाता· इच्छोपदेशेना

राम १५ पिचकर्तव्यतोपदिष्टा भवन्त्येव तत्पूर्वं माविलादिष्टायाः॥ उक्तं च व्याख्यातृभिः॥ आनुपात्वमपीछांतरं सत्र कृता सत्रि
तेछामिनिर्वृत्य चैभाष्यकृतोक्तं इछादिति॥ तदाह सत्रितेछामिनिर्वृत्यै द्वितीये छात्र सत्रिता। जिज्ञासापदस्य विचारवाचि
त्वे तु न काचिदनुपपत्तिः॥ एवं तावत्सूत्रार्थमुपपाद्य संप्रति सूत्रोपात्तजिज्ञासाभेदं दर्शयति सेति। यदाह भाष्यकारः॥ स कथं जि
15 ज्ञासितव्यः॥ को धर्मः॥ कथं लक्षणकः॥ कान्यस्य साधनानि कानि साधनाभासानि किं परश्चेति॥ साधनाभासश्चात्र वार्त्तिककारैर्व्याख्या
तः॥ तथाहि॥ अन्यसाधनमन्यस्य साधनाभासमुच्यते॥ क्रत्वर्थं पुरुषार्थस्य तदर्थं क्रतोरिति॥ प्रसंगात्तावादाद्ये जिज्ञासाद्वयमाक्षि
पति नन्विति॥ समाधत्ते उच्यत इति॥ उपोद्घातत्वं विदर्शयति॥ यदीति॥ प्रसंगाद्धर्मजिज्ञासामप्युपक्षिपति॥ धर्मेति॥ एतस्य प्रतिज्ञा
स्वा सूत्रत्वेपि ग्रंथांतरोक्तरीत्याधिकरणत्वं व्याख्येयं॥ तथाहि स्वाध्यायोध्येय इत्यस्य विधानस्य प्रयुक्तितः॥ विचारशास्त्रं नारभ्य
मारभ्यं वेति संशयः॥ अर्थधीहेतुताधीते र्लोकासिद्धादवातवत्॥ नियामकं न चेत्रातात्वैधारंभो न संभवी। दर्शपूर्णवदस्यत्र हेतु
पूर्वं नियामकं अर्थनिर्णायकं शास्त्रमतत आरभ्यतां विधेरिति॥ ननु प्रसिद्धश्चेद्धर्मो न जिज्ञास्यः प्रसिद्धत्वान्नछाभावाः॥ अथा
प्रसिद्धो न तरां तदेतदनर्थकं धर्मजिज्ञासाप्रकरणं॥ उक्तं च प्रसिद्धः॥ शक्यते तोनुप्रसिद्धत्वान्नुनेष्यते॥ अप्रसिद्धत्वशकात्वा राम°
त्त्रत्तरामित्यत्तोनवीन्॥ उच्यते॥ सांदिग्धत्वं सप्रयोजनत्वं च विचाराक्षेपकारणं द्वयमप्युक्तं धर्मस्य तथा तस्माद्दूपमपि जिज्ञास्यः॥ १५

रघा

केचिच्चैत्यवंदनादिकं धर्मा— ननानन्त्र परेऽस्मिहोत्रादिरूपं तत्र विचाराधिनैव प्रवर्त्तमानो यं कंचिद्देवोपाददानो विहन्ये
जानर्थं वप्राप्नुयादि। ४ अपससाधनता तत्र सप्रयोजनत्वं धर्मस्य सकलजनसिद्धं तस्माद्धर्मो जिज्ञास्य इति तदुक्तं· जिज्ञास्य
४ संशयादुक्तं ४ अपस्फुरत्तयापि चास्य संदिग्धोत्थजिज्ञास्योपयोवास्यान्नि ४ प्रयोजन ४। अत स्तन्निर्णयार्थे शास्त्रमार
ब्धव्यं· एवमयाजनो धर्मजिज्ञासेत्यनेन शास्त्रारंभमनुपपाद्येदानीं शास्त्रमारभते॥ ॥चोदनालक्षणोऽर्थो धर्म इति॥ ॥सू
त्रतात्पर्यमाह प्रथममिति· एतद्रूपं धर्मस्य स्वरूपं प्रमाणं वेत्यर्थः ४· किमुत्पादितं चार्थाद्विचार्य्यत इत्याकांक्षायां व
चनव्यक्तिभेदेन तद्दर्शयति यो धर्म इति· ननु स्वरूपविशेषेऽपेक्षिते प्रमाणविशेषविधानमसंगतमत आह स्वरूप
मपीति॥ धर्मपदार्थस्येदं प्रमाणमित्युक्तं प्रमाणयत्नलात्मत्वमेपासिद्धेरर्थादिदमुक्तं भवति यच्चोदनाप्रवेदितं तद्धर्मो अ
रूपमितिति ननु पदि प्रमाणांतरानवगम्यो धर्मः ४ कथमनूद्यते· अप्रमाणासिद्धस्यानुवादासंभवात्· प्रमाणांतरप्राप्तत्वे नु
वादेनैव प्रमाणमेवेति वि— — — — न·सामान्यतः·सिद्धस्यानुवाद इति चेन्न निर्मूलायाः ४ सामान्यासिद्धेरसंभवात्·
लोकप्रसिद्धिर्मूलमिति चेन्न· प्रत्यक्षादे प्रमाणानितिरिक्ताया लोकप्रसिद्धेरनंगीकारात् विविधानेकप्रकारत्वाच्च लो
कप्रसिद्धेस्तत्तया धर्मसिद्धिः ४ नाप्यर्थापत्तिः ४ जगद्वैचित्र्यस्य स्वभावादेवोपपत्तेः ४ प्रमाणांतरसिद्धवस्तुनि चोदना

राम० १६ प्रमाणं चात्वानापत्ते ४ धर्म्मानुवादेन चोदनाप्रमाणविध्यौ चार्थपदस्यानर्थक्यप्रसंग ४ · नहि तदानर्थस्य धर्म्मत्वं प्रा
प्तं यपत्ति वर्त्पेत · नापि सामान्यतो धर्म्मचोदना प्रमाणादिनुशक्यते तस्मा ४ शब्दालरावसित मेदाग्निहोत्रादि धर्म्मवि
शेषविषयत्वात् · अत्रोच्यते · ज्योतिष्टोमादपस्तावक्र्येपाविशेषाधर्म्मत्वेन कार्यत्तयालोकप्रसिद्धः लोके च यो
16 यागमनुतिष्ठति तं धार्म्मिकमिति हि समाचक्षते तत्र निर्मूलमेव देस्मरणमिति वाच्यं का ४ योगिप्रत्यक्षमूलमिति वै
शेषिकादय ४ · एवं दानेकवादिविप्रतिपत्तौ प्रत्यक्षाद्यनुप्रवेशाच्च वेदेन चोदनाप्रमाणत्वेन प्रतिज्ञायते चोद
नैव तत्र प्रमाणमिति चोदनापा एव विधानान्नात्र प्रमाणान्तरसिद्धता संभवात · अतो यथा मन्वादिस्मरणं प्रतिभासि
न्यष्टकादौ चोदनामूलमिति वक्ष्यति तत्र येहापि दृष्टव्यं। मूलविशेषानवधारणाभिप्रायं वैतद्वार्त्तिकं। धर्म्म — मात्र
त ४ सिद्धे प्रमाणं चोदनाख्यान इति। नवार्थपदानर्थक्य ४ · एतद्वचनव्यक्तिसाधकत्वेनार्थवत्वात् अर्थपदाभावे हि · यश्चोदनालक्षण ४
स धर्म्म इत्यपि वचनव्यक्ति ४ संभाव्येत · अस्यां च स्येनादेरनर्थस्यापि धर्म्मत्वमापद्येत चोदनालक्षणत्वात् · तिन्मानुवादमनत्वेलर्थग्रहणे
नैपवचनव्यक्ति ४ संभवति। प्रसंगादेकदेशिकृतं सूत्रार्थवर्णनं दूषयितुमुपन्यस्यति · कश्चिदिति · कथमनेन सूत्रेण यमर्थ राम० १६
उच्यतेत्तमाह चोदनेति · दूषयति न दिति · गूढाभिप्रायमाशंकयानिराकरोति अपि चेति येषां कार्यार्थत्वानुपपत्तिस्तेषामप्रामाण्य

मेवस्सूत्रकारस्याभिमतमितिभावः एतदेव द्रढयितुमनौतिकस्यामिति उत्तरमाहतत्रैवेति। व्युत्पत्तेः संकेतग्रहाद्·एतदेवोपपा
दयति प्रवृत्त्यधीनेति·उक्तंनिराकरोति नावश्यमिति·विशेषशंकते प्रथमेति। परिहरति अस्त्विति·इतश्चनकार्य्यएवव्युत्प
त्तिरित्याह किंचेति·इतश्चनकार्य्यएव प्रथमव्युत्पत्तिरित्याह·किंचेति·दृष्टस्यानुपसंहरति तस्मादिति·वचनव्यक्तसंभवेना
पितद्यागत्वानंद्य प्रतीकावेति। ततइति·सूत्रगतधर्म्मशब्दस्यवेदार्थपरत्वादेवेवचनव्यक्तिः पर्यवस्यतीत्यर्थः·ततः
किमतआह·तत्रेति·अभ्युदयः प्रयोजनंश्येनादीनामपिवेदार्थत्वेनोद्दृश्यत्वात्तत्राप्यर्थत्वविधेयमित्यर्थः·ततश्चेति·
ता ध चार्थत्वपावेदार्थेस्यैवकर्यत्वाविधानादितिभावः। इष्टापत्तिंशंकते माभूदिति। तेषामपीति। श्येनादीनियोगात्तेनामपीत्य
र्थः कार्यत्वानंगीकारदोषमाह·असन्नीति·सिद्धेचेतितन्अतेव्युत्पत्तिविरहादित्यर्थः·प्रकारान्तरेणशंकांनिराकरोति·अथे
ति·अप्रतीतत्वात्तस्येति प्रतीतत्वात्सूत्रगतधर्म्मपदस्यवेदार्थपरत्वात्स्वेदार्थस्यैवतत्रप्रतीतेर्नधर्म्मस्येतिभावः। धर्म्मत्वमुच्यत
इति·धर्म्मशब्देनप्रतीतत्वात् वेदार्थमुद्दिश्यचोदनालक्षणशब्देनतस्यकार्यत्वमुक्तंकस्मात्कार्यइत्यपेक्षायांतस्यकार्यत्वसि क्षा
द्ध्यर्थंपदेनधर्म्ममुच्यतइत्यर्थः अथातइति·धर्म्मरूपोवेदार्थोजिज्ञास्यइत्यत्रधर्म्मस्यानिर्द्यत्वात्स एवजिज्ञास्यएवंसूत्रार्थो
रविनाशोनभवतिवेदार्थपरत्वेतुधर्म्मपदस्यतद्विनाशइत्यर्थः·आनर्थक्यांगीकारेचभाष्यविरोधइत्याह अनर्थेतिनने

राम० १७ श्चेति॰ नियमाभाव इत्यर्थः॥॰ अत्रोक्तमुक्त एव सूत्रार्थे युक्त इत्याह न स्यादिति॰ उक्तं द्वयमेकेन सूत्रेणानुत्पत्त्यायां निरूप्यते
स्वरूपविहितस्योक्ते प्रमाणे कथ्यते र्थतध्यंतः॥ एवं तावत्सूत्रतात्पर्यमुक्त्वा से प्रतिसूत्रे सूचितं विचारस्वरूपं दर्शयति। तदि
हेति। ननु प्रतिज्ञासूत्रेनुपपन्नोपपत्तिविचारः॥ पुनरुक्तश्च संदेहोत्पत्तिकसूत्राभ्यामस्यार्थस्य वक्ष्यमाणत्वादिनापि प्रतिज्ञोपपत्तेः॥
17 सम्भवदर्थविषयं हि वाक्यं प्रतिज्ञो व्यतेन चायमर्थः॥ संभवतिपत्रेन सूत्राधयोगं स्तु तत्र वाक्यं प्रमाणमिति। उच्यते॰ वक्ष्यमा न४
णोप्यर्थः॥ प्रतिज्ञासमर्थतार्थमत्रोच्यमानो न दुष्यति न चात्र पूर्वपक्षापरपक्षयुक्त्युक्ता॥ विचारस्वरूपमात्रं कथ
नाशं संभवदर्थविषयत्वेवागएवोपपादयिष्यति॰ आधेविहरणोति तत्रेति एवं सूत्रसूचितं विचारं संक्षिप्य सूत्रार्थमुपसंह
रति। तदिहेति। इदानीमुत्तरसूत्राणि संगमयन्भाष्यकारमतेन तावदेतस्यादेशत पदार्थाननुक्रामति। निमित्तेति॰ अयोनि
गदव्याख्यातं॰ प्रतिज्ञातार्थमुपपादयितुमाह प्रकृतमिति। शब्दस्येति॰ यथाद्॥ प्रमाणान्तरदृष्टं हि शब्दोर्थं प्रापयेत्स
दा स्मृतिवद्स्वयं तस्य प्रामाण्यं नोपपद्यत इति। ननु फलसाधनस्य द्रव्यादेरेव धर्मत्वांगीकारात्तेषां चेन्द्रियकलादृप
ष्टृ यं न धर्मस्य प्रत्यज्ञविषयत्वमित्याशंक्य निराकरोति। यद्यपीति॰ य एव श्रेयस्करः॥॰ स एव धर्मशब्देनोच्यते कथमवग राम०
म्यते। यो हि यागमनुतिष्ठति तं धार्मिक इति हि समावक्षते यश्च यस्य कर्ता स तेन व्यपदिश्यते॰ यथा पाचको लावक इति तेन १७

नय८पुनुषंनिदश्रेयसेनसंयुनक्तिसधर्म्मशब्देनोच्यतेनकेवलंलोकेवेदेपियज्ञेनयज्ञमयजन्तदेवास्तानिधर्मा
णिप्रथमान्यासन्नितियजतिशब्दवाच्यएवधर्म्मःसमा—यत्तोऽग्नि८श्रेयस्करभाष्येवप्यन्तइत्यर्थः८·तथापीति·नो
दुक्तंद्रव्यक्रियागुणादीनांधर्म्मत्वंस्थापयिष्यन्तेतिषामैन्द्रियकत्वेपिनसाक्षूप्येणधर्म्मता।श्रेयस्साधनतयैवदनि
त्यंवेदाख्यतीयतेताक्षूप्येणसुधर्म्मत्वंतस्मान्नेन्द्रियगोचरा।भावनेति·योगाभ्यासजनित८संस्कारविशेषाभावना॥
तजनितेनुत्तानेस्फुतिरूपवेवमवतीत्यर्थः८वास्तवमतेनशंकतेनैन्द्रियेति।कस्मान्नेति।नामजात्यादियोजनारहितत्व
मित्यर्थः८·अविकल्पेति।फलसाधनत्वेनरूपेणधर्म्मत्वंनचतेनरूपेणनिर्विकल्पकेनग्रहणंसंभवतिवस्तुस्वरूपमात्रा
वगाहित्वात्तस्येत्यर्थः८·प्रातिभमितिप्रातिभाधर्म्मविशेषस्तत्जन्यमित्यर्थः८·तत्रचेति·नतुप्रमाणमेवतन्नभवतिकिंपुनर्द्धर्म
इतिसर्वत्र८·याहच्छिकत्वेनलिङ्गाघाभासकल्पत्वादित्यर्थः८·शब्दस्यतुधर्म्मेयुक्तंप्रामाण्यंसंभाव्यमानत्वात्·अर्थ
गोचरस्तानजननशक्तिर्हिप्रमाणानांप्रामाण्यमपसावशब्देसंभवतियतोऽस्यज्ञानस्यापिगगनकुसुमसंसर्गोदोषोपिपसुप
जनयतीत्यर्थः८·नचैवंसतिमद्धदेवाप्रामाण्यमापद्यतेबुद्धिजनकत्वाविशेषात्·एवंचप्रामाण्यंसाधयतो·प्रामा
ण्यमापतितमित्याशङ्कतेनचेति·परिहरतिसत्यमित्यभिप्रायःआशयः·असंसर्गोहिताननजननेनप्रामाण्यंतत्यो

राम० १८ तुषेपेयुर्वध्यासुतो यातीत्यादि बुद्धोबोदयो घातापि · अपोदुखेपेतु शब्दे पुंदोषाभावात्स्वयमदुष्टत्वाच्च प्रमाणत्वेनैवान
१८ योदितासत्त्वस्पतीति · यथाहुः · अत्यंतासत्यपि ज्ञानमर्थं शब्दः करोति हि · तेनोत्सर्गे स्थिते तस्य दोषाभावात्प्रमाण
ता उक्तं वात्र्येः · प्रमाणं त्रयः संशयः स्मरणं संवाद इति पंचधा ज्ञानं विभजामहे तत्र समास्तसर्वमेव शाब्दमर्थगोचरं प्र
18 माणम प्रमाणं च दोषसद्सद्भावनिबंधनश्च प्रमाणेतरविभागः प्रत्यक्षादिवदेवेति · ननु चोदना प्रामाण्यसद्स
द्भावविचाराधिकारेन तत्प्रामाण्याक्षेपपरिहारप्रतिसमाधानेव क्व व्यसर्वविज्ञानप्रामाण्यप्रतिज्ञावचनमसेव द्धमप्रस्तु
ताभिधानादित्याशंक्य चोदनाप्रामाण्यसिध्यर्थमेव सर्वविज्ञानप्रामाण्यविं तैत्याह · तदर्थमिति · अयमाशयः य
दाहि सर्वसंविदामौत्सर्गिके प्रामाण्यं बाधकारणदोषापत्रे चाप्रामाण्यमितितासिद्धं भविष्यति वेदे चापोढुषेयेत दुभया
भावात्स्वतः सिद्धमेव प्रामाण्यमिति · तदेवं वादिविप्रतिपत्त्या मशाय्य द्धंयं स्वतस्त्वाख्य पक्षं परिगृह्णाति तत्रेति · स्व
यमतदात्मनो देवैरपि तादात्म्यापत्तेः कनुमशक्यत्वात्र द्धयं स्वतः नहि सिकतासु तैलादिकमाधातुं शक्यमिति । एतच्च स
त्कार्यवादिमते तन्मते हि सर्वमेव कार्यं जातं सत्त्वे दुत्पद्यते इति प्रामाण्यमप्रामाण्यात्मकमपि स्वतः एव · यस्वतोऽसत राम०
त्त्वसाध्यं यथा शशविषाणं असदुत्पत्तौ चमत्त्रिकाबटस्पवीरणं कः स्यात्तु पादाननियमो न स्यात् असत्त्वाविशेषणाहि १८

सर्वं सर्वस्मादस्तु दुत्पद्येताऽयस्य यदुत्पत्तिशक्तिरस्ति ततो निष्पत्तिरस्य योपदर्शी सत्तदुपादन्न इति शक्तितो नियम इति चेत्
नैवम् अविशेषात्। अस्माकं शक्त्यात्मना विकारस्योपादानेऽस्तीति मतं। भवतस्तु विकारोत्पत्तिशक्तिरुपादानेऽस्तीति वादो युक्तिमा
न्न सिद्ध्यत्ते नार्थः। सत्त्वैकारकव्यापारानर्थक्यमिति चेत्। न। अभिव्यक्तिफलत्वात्। सन्तोऽपि हि विकाराः पूर्वमनभिव्यक्ताः कार
कव्यापारैरभिव्यज्यन्ते। अभिव्यक्तावुत्पत्तिशब्दो नर्थक इति चेत्। न। अभिव्यक्तिभेदात्। घटस्यान्धकारतिरोहितस्य दीपेन त
दुत्सारणमभिव्यक्तिः। मृदि तु सूक्ष्माकारस्य प्रोत्सारणं कुलालेन क्रियते स्थूलाकारता प्रकटीक्रियते सा च पूर्वमपरिदृष्टेरु
त्पत्तिव्यपदेश इति दिक्। तदिमं पक्षं प्रतिक्षिपति तदयुक्तमिति। न तावदेकस्यात्मानेन व्यक्त्योद्भयं संभवति विरोधात्। प्रामाण्य
प्रामाण्ये हि परस्परपरिहारस्थितिलक्षणेन विरोधेन विरुद्धे ते कथमेकव्यक्तिनिवेशिनी स्याताम्। अथैकस्यैव विज्ञानस्य
द्वयं स्वत एव प्रकाशत इति मतं तथापि विरोधः। यदुक्तमसतः साध्यत्वानुपपत्तिः। तत्र सतोऽप्यात्मादेरसाध्यत्वदर्शनात्।
यदपि सिकतासु तैलादिर्न जायत इति तदप्ययुक्तं तस्य तदुत्पादनशक्त्यभावात्। न हि सर्वं सर्वोत्पादकशक्तियुक्तम्। आधिके
उद्धेषणां प्रयत्नरादयोगेन व्यञ्जतो यथानेकस्यान्यैः शीतोष्णस्वभावत्वविरुद्धधर्माध्यासस्य भेदनिबन्धनत्वात्। एवं न ता
नस्य प्रमाणाप्रमाणस्वभावत्वं न्यायविरोधपरिजिहीर्षया भिन्नव्यक्त्याश्रयं नीलपीतवस्त्वतोद्भयमित्युच्येत तदप्ययुक्तं

रा॰म॰ १९

19

मित्याह अत्रेति। कथं न युक्तमत आह कारणानतेति स्वतो द्वयवादिना प्रामाण्याप्रामाण्ययावधारणे कारणान्तरस्यसंवादे रनपे
क्षणात् ज्ञानस्यैवोपलंभ इहेतुत्वे सर्वज्ञानेषु बोधरूपतायाः स्वतो विशेषाप्रतिभासनात् कस्यां ज्ञानव्यक्तौ प्रामाण्यं क
स्यां नेत्यनिश्चयापाद्धयवहारोच्छेदः स्यादितिभावः परतो द्वयमिति पक्षमरमुत्थापयति। अत इति। अपेक्षत्वे कारणमाह
एवं हीति। सर्वं हि विज्ञानं स्वभावद्वयं तत्र ऋते· किंचित्प्रमाणस्वभावमवशिष्टम् प्रमाणस्वभावमिति स्वभावान्तराभावात् प
र्यवसितेनापि रूपेणानवधारणे स्वतो निःस्वभावत्वं स्यात् निः स्वभावस्य वा भाव एव प्राप्त इति परतोऽपि कस्य प्रामाण्याप्रामाण्ये
स्यातामिति भावः। ननु ज्ञाने सत्त्वगुणत्वरजस्त्वादिस्वभावसरूपावात् कथं निःस्वभावत्वम्· एवं सत्वगुणत्वादीनामप्यन्यजा
तीयापातिस्वातन्त्र्यगुणादे भावधारणास्ताकं प्रामाण्याप्रामाण्यानवधारणे च स्वभावद्वयवर्जितं किमात्मकं किं स्वभावं स्यादित्य
न्यानवधारणं स्यात्· अत एतत्पक्षासंभवान्पक्षान्तरमेव युक्तमित्याह· तस्मादिति· युक्तिमेव दर्शयति। तथा हीति। अप्रमाणं प
८· अप्रामाण्यं नाम प्रामाण्याभावः तस्यावस्तुत्वात्र कुतश्चिदुत्पादः प्रामाण्यं तु वस्तुत्वात्कारणगुणजन्यं। ननु प्रामाण्या
भावस्य प्रध्वंसादिरूपस्य मीमांसकैर्वस्तुत्वेनेष्टा चात्र अवस्तुत्वादित्यसिद्धो हेतुः सिद्धत्वे वा च यदि प्रध्वंसेनानैकान्तिकः। उच्य रा॰म॰
ते· एतन्मते वादिनो बौद्धस्य तुच्छमभावो न वस्त्वन्तरं यदि वस्त्वन्तरं स्यात् सत्यपि तस्मिन् घटावस्यपर्वेव दर्शनं स्यात् अविशेषात्· म १९

तस्मिन्नवस्थापर्यन्तदर्शनस्यात्राविशेषात्। नहि घटे सति पटस्यानुपलब्धिः अभावविरोधित्वादभावस्याप्यदोष इति चेन्न।
यद्यपि किंचित्करो यं भावस्याभावः कथं विरोधी स्यात् अथ किंचित्करः तथापि सत्तावस्थवत् अपकरोति अर्थान्तरकरणानु
कोविरोधः। तस्माद्घटाभाव इति घटस्याभावो नास्तीत्यर्थः। न च घटादिप्रध्वंसेनानैकान्तः तस्य जननिहेतुकत्वाभ्युपगमात्
प्रामाण्यं तु स्वाश्रयवनाव्याप्तिचारित्वं तस्य च वस्तुत्वात् घटाद्यगुणोत्पत्तिरिति। ननु के पुनरमी गुणा ये प्रामाण्यस्योत्पादका इत्यु
च्यते। यदि मेघजादिभिराहितातिशयविशेष इत्युच्यते तर्हि अनाहितातिशयानां प्रामाण्यं जायते तात् उच्यते विशुद्धिरिन्द्रि
यादीनां गुणानातिशयः। कुतः। साम्यवाताद्यधातूनां विशुद्धिरभिधीयते। साम्येन हि स्थिता वातादयः। प्रामाण्यमुपजनय
न्ति। तद्वस्तु यन्तु तिमिरादयो दोषा जायन्ते शब्दे तु वक्तुराशयशुद्धिर्गुणो विप्रलम्भादयश्च दोषा इति। ननु तज्जन्यमप्रामाण्यं प्रामाण्य
त्वं निश्चयो वस्त्वात्मक इति मद्गुणोऽप्ये जायते ज्ञापते चेति। यदि प्रामाण्यं स्वतः स्यात् अप्रामाण्यमप्यवस्तुत्वेनाजन्यत्वा
त्स्वानधीनं तर्हि सर्वज्ञानानामपि प्रामाण्यप्रसंगः। स्वप्नादिज्ञानानामपि ज्ञानत्वाविशेषात्। ननु के यमप्रामाण्यमज
तिः शक्यते वक्तुं वस्तुनस्तु गुणकर्मणोरपि नात्यन्तिको नाशो वस्त्वात्मनाविद्यमानत्वात् जातावप्येवैषैव गतिः । दृश्यते

रामं० ३९ हि विनष्टे पिंडे वि पुत्रो पिंडोत्तरे जातेः ० ननु मित्रोऽपि जात्यादयः समवायात् द्रव्ये स्वानुरक्तां बुद्धिं जनयिष्यति ·
तदुक्तं युतसिद्धानामाधेयाधारभूतानामिहेति प्रत्ययहेतुर्यः संबंधः स समवाय इति जैनैरुक्तो। अयुतसिद्धयोः संबंधि
त्वासंभवात्। तथाहि केयमयुतसिद्धिः युतसिद्ध्यभावमात्रं अपृथक्सिद्धिर्वा मित्रोऽप्यपृथक्त्वान्वाऽपृथगात्मत्वं वा नाद्यो
अनिष्पन्नस्याविद्यमानत्वेन संबंधाभावात्। सिद्धयोर्हि संबंधिनोः संबंधो भवति नासिद्धयोः अत एव च न निष्पद्यमानयोः
ः निष्पत्त्युत्तरकाले च संबंधे युतसिद्धताप्रसंगः युतसिद्धयोश्चापृथक्त्वात्संबंधहेत्वभावात्संबंधो न स्यात्। नहि यथापृथक्सि
द्धयो रज्जुघटयोर्दृढ वदन्तादिः संबंधहेतुस्तथा जातिव्यक्त्योः संयोजकः कश्चिद् दृश्यते। समवायस्तु संबंधरूपत्वादेव न संबंध
हेतुः · नापि नित्यो यवनुर्थेः · जात्यादेर्व्यक्त्याश्रितत्वात् · व्यक्तेश्च स्वावयवाश्रितत्वात् पृथगात्मत्वात् · संबंधहेत्वभावा
च्च यस्मामपि पदार्थानां परस्परसंबंधो न प्रतीयेत · किं च यं समवायः समवायिभ्यां भिन्नोऽभिन्नो वा भेदे पि ताभ्यां संबद्धो
ऽसंबद्धो वा। तत्र यदि तावद्व्यतिरिक्तो। संबद्धश्च · तदा समवायिभ्यः समवायस्य विश्लेषात् · समवायितां परस्परविश्लेषः ५
स्यात्। अथ संबद्धस्तत्रापि न तावत्संयोगः द्रव्ययोरेव तदभ्युपगमात् · समवायान्तराभ्युपगमेऽनवस्था स्यात्। अथ समवा रामं० ३९
यिनोः स्वरूपमेव समवायो नान्येन संबंधनीय इत्युच्येत तर्हि गीर्णा ते भेदवादः। धर्म्मिस्वरूपानुप्रविष्टो भावप्रसंगश्च॥

39

व्यतिरिक्तः संबध्यमानश्च समवायः संयोगः संबंधान्तरमपेक्षेतैवातस्मात्समवायासंभवादभेदपक्ष एव श्रेयानित्यत
आस्तु वात्यंतभेद एव जात्यादेस्तथापि न सविकल्पकः स्यान्मिथ्यात्वं अन्यस्यान्यथासंवेदनेन बाधकप्रत्ययेन वा मिथ्यात्वं भव
ति नान्यरूपसंवेद्यताभावेणा सर्वेषां तत्र संवादात्। यथाभावनापाधात्वेऽर्थविशिष्टज्ञानेन न मिथ्यात्वं भवति तदुक्तं यो ह्यस्य
रूपसंवेद्यः संवेद्येनान्यथा पुनः सामिप्यानुत्तेनैव योनित्यमवगम्यते। इदानीं लौकिकानां वाडुल्येन सविकल्पके एव प्र
त्यक्षशब्दप्रयोगादिंद्रियसंयोगजन्यत्वाच्च सविकल्पकमेव प्रत्यक्षं न तन्निर्विकल्पकं कल्पनापोढमभ्रान्तमिति प्रत्यक्ष
लक्षणाभावान्नेति चेन्न। लोकविरोधेन लक्षणानादरणात्। लक्षणास्य निर्विकल्पकमात्रविषयत्वेनोपपत्तेश्च उक्तं च वृद्धैः
प्रयोगमाम्यायश्च शब्दार्थः सर्व एव नः। तेन यत्र प्रयुक्तो यो न तस्मादपनीयते। सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्ष
कैः। न सर्वलोकसिद्धस्य लक्षणेन निवर्तनं। तथा च तत्राप्युक्तं। न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमि
व ज्ञानं सर्वं शब्देन गम्यत इति। अतः सविकल्पकमेव प्रत्यक्षमिति कस्यचिन्मतं दूषयितुमनुवदति। काचित्तावदूष
पतितचिति- प्रतीतिमेव दर्शयति प्रतीमह इति। अनंगीकारे दोषमाह तदभाव इति। कथं न जायेतात आह विकल्प
यतेति। सविकल्पकं हि संकेतग्रहणकालभाविशब्दादिस्मरणपूर्वकं न चाकस्मादेव तत्स्मरणमाविरस्ति निर्विकल्प

केनानुतत्त्वंस्यारोपेद्धोधारत्वस्मरणोपपत्तिरित्यर्थः॥ उपपादितमर्थैनिगमयति तस्मादिति॥ व्यवहाराङ्गत्वान्नतत्त्वमाराण
मिति चेत्॥ न॥ तस्यापि व्यवहारोपयोगित्वदर्शनात्॥ दृश्यते हि वह्निनादह्यमानस्य सहसापसरणं तद्विपरामर्शानपेक्ष
मेव मम॥ इति जायमानमुपलभ्यते॥ इति यद्वा लोकानां च निर्विकल्पकेनैव सर्वो व्यवहारः॥ अगृहीतसंबंधानां तेषां शब्दसंभि
न्नार्थबोधासंभवात्॥ उक्तं च॥ अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकं बालमूकादिविज्ञानसदृशं शुद्धवस्तुजं॥ न विशेषो
न सामान्यं तदानीमनुभूयते। तयोराधारभूता तु व्यक्तिरेवावगम्यत इति॥ आलोचनाज्ञानमित्यनेन बोधकत्वं प्रामाण्यहेतु
त्वेनोक्तं॥ प्रथममित्यनेनास्तित्वं निर्विकल्पकत्वं च युक्त्या साधितं। न विशेष इत्यनेन शुद्धवस्तुजत्वं विवृतं। अद्वैतवादिन
स्तु सन्मात्रविषयके निर्विकल्पके प्रत्यक्षमित्याचक्षते तदुपपद्यते। तत्सन्मात्रे तु। भेदस्येति॥ यत्र सविकल्पके भे
दाकारमस्ति तत्प्रत्यक्षमेव न भवतीति भावः॥ अस्तु वा सविकल्पकमपि प्रत्यक्षं तथापि न तेन भेदग्रहणं संभवतीत्याह किं
चेति। अभावस्य प्रत्यक्षानुपलब्धिगम्यस्य प्रत्यक्षेणाग्रहणमित्यर्थः॥ इदं चेतरेतराभावभेदवादी प्रष्टव्यः॥ किं भिन्नयो
रितरेतराभाव उताभिन्नयोः॥ आद्ये न्योन्याभेदः॥ अन्यथा नेतरेतराभाव इति स्यात्॥ अभिन्नयोरिति पक्षे कथमितरेतरव्यप
देशः॥ तस्य भेदगर्भितत्वात्॥ कथं च तस्यैव तत्राभाव इति। अस्मिंश्च पक्षे वेदान्तिनामिष्टासिद्धिं दर्शयति॥ अतश्चेति॥ दूषय

तित्तदिदमिति-वेदान्तवादिन आशयमुद्भाव्य पतियदीति। परिहरति न ब्रूम इति ननु भेदस्य वस्तुस्वरूपत्वात्कथं तत्र ग्रहणेन
दग्रहणमित्युच्यते तेन त्राह न हीति। दूषणान्तरमाह। यदीति। यदि निर्विकल्पकेन सन्मात्रमेव गृह्यते तेन वस्त्वसत्त्वमिति पक्षस्त
न स्याद्विकल्पकस्य तन्नष्ठत्वं केवलस्य सविकल्पकेनापि न च स्वान्तरं गृह्यते तस्यार्थ४-अथ सविकल्पकमपि सद्विषयमित्युच्यते
तर्हि तेन भेदग्रहणानुपपत्तिरित्याह-न हीति-प्रत्यक्षानुपलब्धीति-इतरेतराभाव४ प्रत्यक्षग्रहणयोग्यस्तदभावो योग्या
नुपलब्धिगम्यो न पञ्चो नु शक्य तत्रेत्यर्थ४-ननु मितं तत्पाधूम्मिणं प्रतियोगिनं च गृहीत्वेतरेतराभावरूपभेदग्रहण इतरे
तराश्रय४ प्रसज्यते इत्याशंक्य परिहरति। यदीत्विति। अथ द्वैतमात्रमपकृष्य तेन घटपृथिव्यादिद्रव्यमित्याशंक्य निराकरोति।
यदीति-स्पष्टार्थोयमग्रंथ४-दूषणमुपसंहरति तस्मादिति उपपादितमर्थं निगमयति-तासिद्धमिति मतान्तरमनुवदति अ
परे त्विति स्वलक्षणं क्षणिकवस्तुमात्रं दूषयति-तदपीति-निर्विकल्पके ज्ञानोत्पादेरपि संमुग्धाकारेण प्रतीते४ स्वलक्षणमा
त्रगोचरत्वं प्रतीतौ विरुद्धमित्यर्थ४ पंचधेत्युक्तिमसहमान४ शंकते न चेति-परिहरति व्यक्त इति-अत्रैवमतान्तरमुपन्यस्य
ति एतेनेति-अशब्दरूपाणामेव भावानां सविकल्पकज्ञाने शब्दाकारेणानिरूप्यमाणत्वान्न भवति पारूप्येणामिथ्यात्वमित्यर्थ
४ निरासे कारणमाह न हीति-तदुक्तं न शब्दाभेदरूपेण बुद्धिरर्थे प्रजायते। प्राक् शब्दाद्यादर्शी बुद्धि४ शब्दादपिहिताद्दशी अ

रा॰प्र॰ ४१

तैव वार्त्तिककृत्संमतिमाह आह वेति परमार्थतस्तु नाध्यासेनापि मिथ्यात्वमिति भावः॥ ननु गौरयमिति सामानाधिकरण्येन श-
दानुविद्धबोधात्मतद्रूपसमारोपः॥ स्यादत्र आत्र नमः॥ यदि गोत्वादिरूपोऽर्थः॥ सर्वदा शब्दाकारेणैव प्रतीयते तदाभेदाभावात्
कुतोऽध्यासस्तदभावे च मिथ्यात्वं तत्र पार्थक्यभेदावगतो तु सुतरामध्यासाभावः॥ अतो भ्रान्त्यैव यमध्यासकल्पनात्तत्वादिनां अर्थश-
ब्दत्वानेऽप्युत्त्रिष्वपि समानानिर्देशास्य भ्रान्तिमूलस्य संभवात्॥ यथा॥ शब्दे नैयत्या हि निर्देशो गच्छतीति यथैव कल्पते गौरित्येव च निर्दे-
शो वाच्यत बुद्धिवाचिनां॥ इदानीं मतान्तरनिराकरणेन रूपादिसंघातातिरिक्तं धर्मिणं संस्थापयितुमाह॥ किं पुनरिति॥ चक्षुर्लब्धी-
नामिति॥ एतदतिरिक्तद्रव्यमात्रबोधकस्य चेन्द्रियस्याभावान्न द्रव्यसिद्धिरित्यर्थः॥ मन एव षष्ठमिन्द्रियमिति चेत्॥ न॥ तस्य स्वातन्त्र्ये-
ण बहिर्विषयव्यवस्थापने सामर्थ्याभावात्॥ ॥ श्रीणातीव सुखादीनि रूपादिस्वेव पंचसु न पश्यामीन्द्रियान्तरस्य ग्राहकं विष-
ये बहिरिति उपलंभकाभावं परिहरति दर्शनेति॥ अत्र वार्तिककृत्संमतिमाह आह चेति॥ आविर्भाव तिरोभावधर्मकेषु रूपा-
दिषु पदनुपातित धर्मिणं यथा त्रिसंयोगप्रत्याहित ब्राह्मण॥ समुपजातरूपान्तरप्रबुद्ध॥ स एवायं घट इति प्रत्यभिज्ञाय-
मानस्तदतिरिक्तो धर्मी ननु रूपादीनामग्रहणे तस्यानवभासात्कथं तदतिरेकसिद्धि॥ नैवं धर्माग्रहणेऽपि क्वचिद्धर्मिप्रतीतेः॥ रा॰प्र॰ ४१
दृश्यते च प्रदोषेऽप्युत्क्षाग्रहणेऽपि बलाकापंक्तिः॥ उपपादितमर्थं निगमयति अत इति॥ ननु विस्फारितेऽपि चक्षुषि शब्दसंबंध-

स्मरणोत्तरकालं पूर्वं गृहीतानुसंधानेन वोत्पद्यमानत्वात् अनक्षजत्वेनाप्रत्यक्षत्वं अनुभूते च वस्तुन्यप्रदृष्टसंस्का
रस्यजायमानत्वाच्च स्मृतित्वं सविकल्पकस्य । संप्रत्ययापीन्द्रियार्थसन्निकर्षेणापरोक्षप्रतिभासतया चोत्पद्यमानत्वात्
प्रत्यक्षत्वमव्याहतं नापि स्मृतित्वं पूर्ववृत्तादिकार्थप्रतिभासजाड्यात् तथाहि । पूर्वमन्यकालविशिष्टऽप्रतिपन्नोऽपीदानीं वर्तमा
नकालविशिष्टतया गृह्यते स एवायं देवदत्त इति तथा सामान्यप्रत्यभिज्ञायामपि पूर्वमन्यव्यक्तिगतत्वेन गृहीतमासीत्
इदानीमन्यव्यक्तिगतत्वेनानुभूयते । पूर्वं घुरवगतमपि घुरवगम्यते । तथा निर्विकल्पकस्यावगतं सविकल्पकेनैवाव
गम्यत इत्यधिकार्थत्वं । यथाहुःऽस्मर्यते शब्दसंबंधो मा भूत् सा प्रत्यभिज्ञाता योऽसौ तदप्रत्यक्षभावेन न तत्वं स्यापि वार्यते । गृ
हीतमपि गोत्वादि स्मृतिस्पृष्टं च यद्यपि तथापि व्यतिरेकेण पूर्वबोधात्प्रतीयते व्यक्तिकालादिभेदेन तत्रास्त्यवसरो
स्मृतेऽ। वस्तुतस्तु । यथा घालोकमनस्सापेक्षतायामपि निर्विकल्पकस्याक्षजत्वं नापैति तथा सविकल्पकस्यापि स्मर
णसापेक्षतायामक्षजत्वं नापैति नापि मिथ्यात्वं भवतीति तत्त्वं । अतो लिंगलिंगिसामान्ययोस्तत्त्वं च धर्मस्य च सविकल्पक
प्रत्यक्षवेद्यत्वादुपपन्नमनुमानादीनां तत्पूर्वकत्वमित्युपसंहरति तत्पूर्वकं चेति ॥ ॥ अधिकरणत्वेन । धर्मो विषय
ऽप्रत्यक्षादिभिरपि गम्यते नोदनयैवेति संदेहःऽ प्रत्यक्षादीनां प्रमाणत्वेन प्रमेयावभासकत्वात् धर्मस्य च प्रमेयत्वात्

तंम० ४२ त्यक्षादिभिरपि गम्यत इति पूर्वः। पक्षः। धर्म्मस्य प्रमेयत्वेपि प्रत्यक्षस्य वर्त्तमानमात्रविषयत्वात् अनुमानादेश्च तत्पूर्वकत्वान्नोद
नयैव गम्यत इति सिद्धान्तः॥ ॥औत्पत्तिकसूत्र॥ ननु प्रत्यक्षादीनामनिमित्तत्वोपपादनेनार्थाच्चोदनैव धर्म्मे प्रमाणमित्यवधारण
सिद्धत्वात् किं पुनरस्य सूत्रेणेत्याशंक्य शंकाविशेषनिराकरणार्थत्वं दर्शयितुमाह उक्तमिति। ननु पौरुषेयस्यानिमित्तत्वे चोदनाया
ः किमायातमत आह एवमिति। ननु लोकप्रसिद्धेरेव धर्म्माधर्म्मयोरवगतिसंभवात्किं प्रमाणावगम्यत्वोक्तिः। यथा ह भगवान्वे
दव्यासः। इदं पुण्यमिदं पापमित्येतस्मिन्पदद्वये। आचण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम्। न चैवं पुण्यपापपदप्रमाण
को धर्म्म इत्युक्तं भवति न लोकप्रमाणकः। मैवं तस्य योगस्यैव लोकापन्नत्वाद् यमनुपालभः। न चाप्रमाणं लोकप्रसिद्धिः। ब्रा
ह्मणादिजातिविवेकस्य तदधीनत्वात् सकलशब्दार्थावधारणस्य च तदायत्तत्वात्। अतो निषिद्धेपि प्रत्यक्षादीनामभावे। श
क्तितव्यः। सत्यमेवैतत् प्रसिद्धेरेव तु प्रत्यक्षादिमूलान्तरनिषेधेन निर्मूलत्वमाशंक्य समूलतात्र प्रदर्श्यते न च प्रसिद्धिः। प्र
त्यक्षादिवत्स्वत एव प्रमाणं। स्मरणाहि प्रसिद्धिशब्देनोच्यते तत्त्व प्रत्यक्षादिमूलमेव अव्यवस्थिता च प्रसिद्धिः। नास्तिकस्य हि साम
वधर्म्ममादुः। अन्ये तु प्राजापत्यादिकं तपः। पीडात्मकत्वात्परपीडावदधर्म्मं एवेत्याहुः। आर्यास्तु विधिनिषेधप्रमाणको ध
र्म्माधर्म्मौ संगिरन्ते। एवं परस्परविगानात्स्वतो। प्रमाणमेव प्रसिद्धेः। वाच्यार्थप्रसिद्धेर्धर्म्मं प्रति प्रामाण्यमविगीतत्वादिति वाच्यं। तंम० ४२

42

तस्य शास्त्रप्रामाण्यसिध्युत्तरकालीनत्वाद्यथावद्व्युत्पत्तिशास्त्रस्थावान्तरभित्तित्वादित्यर्त्तौभावगम्यत्वनिराकरणाय
चोदनाप्रामाण्यमुपपादनीयं· यथा च। तस्यादभाववक्तस्थौ धर्म्माधर्म्मौ न शक्यावु। चोदनावत्समुद्दर्नु अस्तोजनेनेवप
श्यतामिति प्रामाण्यमववकुम्भ। मिमांसचयति। सत्यमिति। अपौरुषेयत्वमुपपादयितुमाह· नैधा हीति। अत्र योजयति पदति:
नित्यत्वमत्र स्वाभाविकत्वं शब्दार्थयोरन्नित्य। संबन्धो न समयत्वक्षण। त्यर्थ। अन कारणदोषाभावश्च ज्ञ। तस्माच्च होत्रा
दित्वक्षणस्य धर्म्मस्य ज्ञाननिमित्तं· यस्मादयमुपदेश। न तु ज्ञानमुपदेशः इति ज्ञानोपदेशशब्दयोर्भिन्नार्थत्वात्सामानाधि
करण्यानुपपत्ति। उपदेशो हि शब्दश्च्यते ज्ञानं चार्थावगम। न च शब्दादेव ज्ञानं भवति· यद्यो हभाष्यकार। उपदेश इ
ति विशिष्टस्य शब्दस्योच्चारणं। नैष दोष। एतस्य भावसाधनत्वे सामानाधिकरण्यानुपपत्ति। स्यात्करणसाधनत्वसोकर
णोऽत्यपदिश्यते ज्ञायते अनेनेति ज्ञानं ज्ञापकं प्रमाणमिति यावत्· ततश्चायमर्थ। उपदेश। सविधिकं वाक्यं धर्म्मे ज्ञानं प्रमाणमि
ति· एतेनानुत्पत्तिलक्षणम प्रामाण्यं निराकृतं तदुक्तं उपदेशो हि भवति ज्ञानं तस्येति योऽयं ते ज्ञायते येन तज्ज्ञानमेकाधि
करणत्वं न। अव्यतिरेकशब्देन बाधकप्रत्ययस्य निरास। चकारात्संशयस्य· अर्थेनुपलब्धे इत्यनुवादत्वं निरस्यति॥ अत
स्तच्चोदनाख्यं प्रमाणमेवकमनपेक्षत्वात् न चैवं सति प्रत्ययान्तरमपेक्षितव्यं· अनाप्तप्रणीते हि वाक्ये प्रतिपत्तु। प्रमाणान्त

रामं० ४३ रसंवादेन प्रामाण्यं स्वाप्नप्रत्ययेनेतुल्यत्वप्रमाणान्तरापेक्षा चोदनायां तत्त्वौत्सर्गिकत्वेनोभयापेक्षा नास्तीत्यनपेक्षत्वादित्युक्तं
यथाहुर्वार्त्तिककाराः ॥ स्वप्रत्ययोत्पत्त्यपेक्षा स्यात्सादृश्यं पुनरोक्तिमुत्पत्त्यक्तिषु परापेक्षा नोभयं चोदनासु तदिति ॥ वा
दरायणग्रहणं पूजार्थं वादरायणस्यापि सम्मतमिदमित्येवमर्थं ॥ चिंडितार्थं दर्शयति · एतच्चेति · ननु तावन्न शब्देनैव प्रामाण्यमु
पदेशस्योक्तमतस्तत्प्रमाणमिति व्यर्थं · सत्यं तावन्नेनतत्स्वेव पुनः प्रामाण्यमुच्यते किं तु निरपेक्षत्वेनकार्यार्थशब्दस्य
प्रामाण्यं न त्वन्यत इति नानर्थक्यं यथाहुः ॥ औत्पत्तिकगिरा दोषः कारणस्य निवार्यते · अबाधोऽव्यतिरेकेण स्वतस्तेन
प्रमाणता ॥ सर्वस्यानुपलब्धेऽर्थे प्रामाण्यं स्मृतिरन्यथेति · अनुपलब्धेऽस्य पदेशात्प्रमाणान्तरविषयविशेषणं · प्रत्यक्षाद
पस्त्व पलब्धेऽपि प्रवर्तत इति भावः ॥ सर्वग्रहणं चोत्पत्तिविनियोगप्रयोगविध्यभिप्रायं · ननु चोदनालक्षणोऽर्थो धर्म इति
चोदनाप्रामाण्यं प्रतिज्ञातं तत्स्य ज्ञानमुपदेश इत्युपदेशस्य साधितमित्यसंबद्धमिवाभेवा उभयोरेकार्थत्वात् · उक्तं च
चोदना चोपदेशश्च विधिश्चैकार्थवाचिन इति · अर्थेऽनुपलब्ध इत्येतदाक्षिपति न चेति । उपलब्धार्थविषयस्यापि लोके प्रामाण्य रामं० ४३
गीकारादिति भावः ॥ किं तर्हि प्रमाणलक्षणमित्यपेक्षायामेकदेशप्रमितं लक्षणं दर्शयति । तस्मादिति · दूषयति । तद्धि द्रमि
ति · तस्यापि ज्ञानस्य तेनांशेनांशस्यांशेनांशयोः प्रामाण्यं गीकारादित्यर्थः · अतिव्याप्तिमप्याह किंचेति · वेदवाक्यवादि द्रमेव प्रा

43

माण्यमित्यमिप्राये रणाहमवालिति· अनिष्टत्वे नियामकमाह· असन्निकृष्टेति· शंसंन शब्दविज्ञानादित्वेनेत्यर्थः· निराकृ
शेतिएवमिति॥ अनुमितेऽप्यर्थे प्रवर्तमाने प्रमाणं स्यात्· अत्र हेतुः स्वार्थप्रतिपादने प्रमाणान्तरापेक्षाभावात्· न च नुमा
नमपेक्षत एवेत्याशंक्याह· अनुमानस्येति। अनुमानं तु वाक्यस्य निर्मूलत्वशंकानिराकरणमात्रे उपयुज्यते न त्वर्थप्रतिपाद
नेतद्यपेक्ष्यत इत्यर्थः· न त्वनुमानस्य स्वास्तित्वार्थेऽपि यथा ग्रहणापेक्षा न तु स्वार्थप्रतिपादन इत्याशंक्याह न चेति यद्यपि
मतान्तरेनुमानस्याधिकार्थविषयत्वं तथापि तन्मतेनास्तीत्यर्थः· अतोस्मदुक्तमेव लक्षणं ज्याय इत्युपसंहरति॥ तस्मा
दिति। उत्तरोत्तरेषां ज्ञानानां चोदयति सत्यपीति कालस्य परोक्षत्वात्तत्पक्षा प्रत्यक्षधर्मस्य तत्तु मतुसंयोगवद् प्रत्यक्षला
त्तेद्रूदस्यापरामर्श इति भावः कालभेदेऽपीति। अयमाशयः· नास्माकं वैशेषिकादिवद् प्रत्यक्षः कालः किंतु प्रत्यक्ष एव
अस्मिन्नुक्षणे मयोपलब्ध इत्यनुभवात्· अतएवास्याप्याकाशवत्प्रत्यक्षत्वं भविष्यतीति· नहि रूपि प्रत्यक्षमित्यस्माकं प्रत्य
क्षलक्षणं किं तु संविदेव परोक्षापरोक्षनिर्भासा जायमाना इदं प्रत्यक्षमिदमप्रत्यक्षमिति विभजनेति स्फारिताज्जस्यानुभवत्वे
वोत्तरोत्तरक्षणसंभिन्नविषयावभास इति। प्रमाणलक्षणे व्याप्तिं शंकते नन्विति इष्टापत्त्या परिहरति इष्टमिति। विरोधं
परिहरति स्यादिति। इदानीमनेनैव न्यायेनैकदेश्यपि स्वमते लोकविरोधपरिहारं शंकते नापीत्याशंक्येति। येत्वनुभ तिव

रामं० ४८

55

ज्ञानत्रितेतु प्रामाण्यमेवमभ्युपेतम् इति नास्ति विरोध इत्यर्थः ॥ · परिहरति तदिति · यत्र प्राभाकरमतेऽप्युक्तिरजनत्वानेस्मृतित्वं सं
भाव्यते तत्रापि न लौकिकानां स्मृतित्वाभिमान ॥ किमु वाच्यं पीतशङ्खज्ञान इत्यर्थः ॥ · उपपादितमर्थं निगमयति । तस्मादिति ।
अत्र सूत्रकारेण चोदनोपदेशशब्दाभ्यां विधिरभिहितः स तत्र योजनेन पश्यामः ॥ न तावत्साध्यसाधनभावावगमः ॥ विधिं विनाप्या
ख्यातेषु साध्यसाधनभावावगमोपपत्तेः ॥ आख्यातप्रत्ययो हि करोत्यर्थं न पाभावनां नाम बोधयति सा च साध्यसाधनभावमन्त
रेणानोपपद्यते यथा हि लोके ओदनं पचतीत्युक्ते पाको हि नयो साध्यसाधनसंबन्धबुद्धिरेवं स्वर्गकामो यजेत इत्यत्रापि यागेन स्व
र्गः ॥ सिध्यतीति गम्यत एव । आख्यातप्रयोगस्यैव संबन्धत्रभावात् · तेन विना च साकांक्षस्य वाक्यस्य स्वार्थपर्यवसानाभावात् ·
अयं तस्य ॥ साध्यसाधनमात्रेणोपपत्ते स्वर्गस्यैव साध्यत्वं यागस्यैव साधनत्वमित्ययमर्थो विधिं विनापि सिध्यतीत्युच्यते ·
तत्र स्वर्गकामो यजेतेत्यत्र स्वर्गयागाभ्यामन्विता भावनावगम्यते तत्र स्वर्गस्य च्यमानत्वेनावगमात् साध्यत्वमेवमुक्तं या
गस्य तु योग्यत्वात् सन्निधेश्च तत्साधनत्वमिति नास्ति विधेः ॥ प्रयोजनं । अथोच्येतानुष्ठितो यागादिर्ऽर्थं न चानुष्ठानं प्रवर्तका
दृते संभवति अतः ॥ प्रवृत्तिसिध्यर्थं विध्याश्रयणमिति · तदपि नातत्स्वप्रयोजनार्थिन इच्छयैव तत्र प्रवृत्तिसिद्धेः ॥ आनष्टेषु वि रामं०
धिशतेनाप्यप्रवृत्तेः ॥ इति कर्तव्यतांशोपकरणोपकारकत्वज्ञानात्स्ववृत्तिः ॥ नाप्यधर्मं च ज्ञानार्थो विधिः ॥ प्रतिषेधादेव न ज्ञानसि ४८

दे॥ अप्रमाणोपि विधौ रागादिलक्षणमेव प्रवृत्तिमनुवदेत्। यद्यनन्तं कुर्यादिति न तु वि॰ धायकः॥ स्यात्। एवमाहितत्वे वचन
व्यक्ति॥ यद्यप्याप्तिवेद्यानन्तेति। अविधायकत्वे युक्तिकलापस्तात्पर्यटीकायामवगन्तव्यः॥ अतो नर्थको विधिप्रामाण्यप्रति
पादनग्रहो। पौरुषेयस्य॥ शब्दो धर्मे प्रमाणमित्येतावद् ववक्तव्यं। उच्यते। यद्युक्तं समभिव्याहारादेव स्वर्गो यागसाध्यो॥ साध्यसाध
नभावश्च तत्र प्रजेनेति यदश्रुतापि समभिव्याहाररूपवाक्यवाधेनमायाशे धात्वर्थस्यैव निवेशनात्। विधौ नु सति समानप्र
त्ययोपात्तविध्युपनुदाभावनाविधेः॥ प्रवर्तनाशक्तिरस्यार्थविप्रकृष्टमपि पुरुषार्थरूपस्वर्गादिफलभाव्यत्वेन गृह्णाति
यागं च साधनत्वेनेति अपसाधनत्वेन यागादेर्धर्मत्वसिद्धिर्विधेः॥ प्रयोजनं। यच्चोक्तं॥ विधावेनाश्रिते साध्य॥ पुरुषा धा ६
र्थो न लभ्यते श्रुतस्वर्गादिवाधेन धात्वर्थः॥ साध्यतां व्रजेद् विधौ तु न मतिक्रम्य स्वर्गादिः॥ साध्यते ष्यते। तत्साधनस्य
धर्मत्वमेवं सति च लभ्यते ननु भावनासामर्थ्यादेव पुरुषार्थस्य भाव्यत्वसिद्धिः॥ पुरुषप्रयत्नरूपा हि सा। न ह्यपुरु
षार्थे चेतनस्य प्रयत्नः॥ संभवति यद् श्रुत्या च यागस्य तत्साधनत्वावगतिरिति किं विधिना। मैवं प्रयत्नस्य [illegible]योनि
त्वेन तस्याश्रयसापसाधनत्वतानाधीनत्वात्। न ह्ययज्ञानस्य वादिविधिविनानुपपत्तेरित्यतत्प्रपञ्चेन। अत्रेदमुच्यते यदुक्तं विधौ सति पु
रुषार्थ॥ साध्यो लभ्यत इति तदनुपपन्नं विध्यनिरूपणात्। न ह्याहि किं लिङादिशब्दविशेषएव विधिस्तद्व्यापारातिशयो वाक्ये

राम॰ ४५

45

पित दर्थभेदो वा। नाघः आञ्जस्येन हि बुद्धिपूर्वकारिणः प्रवर्त्तकेऽभवति प्रवृत्तिविषयव्यापारस्य फलवत्त्वाध्यवसायः शब्द
स्य वेतनोऽस्मिन्प्रवर्त्तयस्यापि न पुरुषार्थफलप्रतिलम्भः न हि प्रबलपवनाभिहतो गर्त्ते निपतन् फलं लभते। किंच प्रमा
णानां प्रमेयोपदर्शनादन्यत्र व्यापारो न दृष्टचरः प्रत्यक्षं रूपादीनुपदर्शयति न तु प्रवर्त्तयति शब्दोपि प्रमाणमतस्त
दपि न प्रवर्त्तयेत्। प्रवर्त्तकत्वं च प्रमाणानां त्रैफल्यं नोपपद्यते उपादानमात्रस्यैव फलत्वापातात् कंटकादिषु प्रत्यक्षे
षु प्रवर्त्तमानो जिहासन्नपितो नग्र क्षीपात्र। प्रयोगश्च शब्दो न प्रवर्त्तकः प्रमाणत्वात्प्रत्यक्षादिवत्। शब्दस्य च प्रव
र्त्तकत्वे सर्वदैव प्रवृत्तिप्रसंगः संबंधज्ञानाद्यपेक्षा च न स्यात् कारकाणां तदपेक्षाभावात्। अत एव न शब्दव्यापारोपि
विधिः अस्तु तर्हि लिङादीनामभिधेयएवाभिधाख्यो व्यापारो विधिः मैवं कार्यत्वेनोपस्य तस्याभिधेयत्वानुपलवानुपपत्ते
ः अनन्यलभ्यस्यैव शब्दाभिधेयत्वाभ्युपगमात्। अभिधानोपगमे चानवस्थापातात्। विशेषहेतोरभावाच्चाभिधामात्र
स्य प्रवर्त्तकत्वप्रसंगः अनभिधेयत्वे तु शब्दार्थस्य भावनासमभिव्याहारानुपपत्तिः अस्तु तर्हि कार्यरूपोर्थभेदो विधिः।
तस्य च प्रमाणान्तरागोचरत्वेन चोदनामात्रविषयत्वादपूर्वत्वं। कालत्रयविपरिवर्त्त्यर्थगोचराणि प्रमाणान्तराणि कार्य राम॰
त्वपरामृष्टकालभेदस्य प्रमाणादवगम्यते। कालत्रयापरामर्शादसदेव कार्यमापद्यत इति चेत् न कालेनैकांतात् नहि का ४५

त्वःकालान्तराव्यवच्छिन्नो न च नास्ति । कालान्तराव्यवच्छेदे त्वनवस्था स्यात् । कार्यमेव च मनसि विपरिवर्तमानं नियुक्त इति सा
म्येन नियोग इत्युच्यते । ननु नियोक्तृव्यापारो नियोगो न च वेदे नियोक्तास्ति अपौरुषेयत्वात् । शब्दस्यापि नियोक्तृत्वात् एवं तस्य
व्यापारत्वानङ्गीकारात् । अत्र दूरविप्रकर्षेणापि नियोगादिपदप्रयोगः । कथमन्यगोचरे कार्ये आत्मनि व्युत्पत्तिः तदभावे वाक्
यशब्दात्प्रतिपत्तिः । सत्यमेतत् । तथापि लिङ्गादीनां सकलेतरशब्दविलक्षणः कोपि महिमा पदविदितसमयाज्ञापि स्वार्थं
गमयतीति कल्प्यते । अथ चाकार्यमात्रे शक्ते तद्ग्रहो योग्यतया च वेदे कार्यविशेषावगतिरिति न किंचिदनुपपन्नम् अतः का
र्यमेव विधिरित्याचार्याः प्रतिपेदिरे । प्रेषणादीनां नु वेदे व्यभिचारात् एवं तर्हि इष्टाभ्युपायत्वं लिङादीनामर्थो भविष्यति प्र
वृत्तौ तस्य सर्वत्राव्यभिचारात् प्रवृत्तिहेतुत्वेन तस्यैव प्रवर्तनारूपत्वात् । अतस्तद्वेव लोकवेदसाधारणं चोदनोपदेशादिश
ब्दवाच्यं लिङ्गादीनामर्थ इति युक्तं । एतच्चायुक्तं प्रतीतिविरोधात् लिङादिश्रवणेन हि प्रवर्तनायाः एवावगमात् न इष्टाभ्युपाय
त्वावगमः । न चेष्टाभ्युपायत्वमेव प्रवर्तनेति युक्तम् । तरति मृत्युमित्यादावर्थवादादप्यवगते तत्रापि विधित्वप्रसंगः । ननु
यागेनेति तृतीयया विधौ साधनत्वावगतिर्नार्थवादेन तदभावात् स्यादेवं यदि यागेनेति तृतीयायाम्रूपेण । विधेः स्वार्थमहिमा
यत्तृतीयाततोऽपि यतः करणतयाभिधीयते किंच इष्टाभ्युपायो यागः यागेन स्वर्गः सिध्यतीत्यादौ विधित्वप्रसंगः स्पष्टमे

विष्टाभ्युपायत्वावगमात्॥ अनन्तरं नैवमपि यागस्वर्गयो॰ साध्यसाधनसंबंधसिद्धि॰ नियोगो हितद्वासाध्यो न च साध्यद्वयमे
कत्र समवैतीत्यादिना नियोगविचार॰ प्रस्तावित॰ सोऽनुपयुक्तत्वादस्माभिरुपेक्षित॰ अनन्तरं यथावार्त्तिकमेवानुसंधा
स्याम॰ एवं हि वार्त्तिककृता भावार्थाधिकरणे तु कौ लिङादिशब्दानां पुरुषं प्रति प्रयोजकव्यापारो ऽभिधात्मिका भावना विधि
रित्यादिना वार्त्तिकानुसारेण विधिस्वरूपं निरूपितं सुचरितमिश्रैस्तदेवास्माभिस्संक्षिप्यते॰ केचिल्लभवन्नेमीमांसका॰ सं गि
रन्ते शब्दात्मिकार्थात्मिका चेति तत्रार्थात्मिका स्वर्गादिफलकर्मिका यागादिधात्वर्थकरणिका स्ववाक्यप्रकरणाः वश्यप्रकरणा
नारम्यवादस्मृतिलोकाचारप्राप्तनत्रदितिकर्तव्यतावती तत्र तत्रासिध्यति शब्दात्मिकानुलिङादिशब्दानां प्रयोजकानां प्रयोज्य
पुरुषकर्मिका अभिधासंबंधज्ञानकरणिकार्थवादोदितप्राशस्त्येतिकर्तव्यतावतीति विवेक॰ शब्दव्यापाररूपा ह्यभिधा शब्दा
त्मिका व्यापारतद्वतोरनतिरेकात्॥ द्रव्यमेवाहि पूर्वावस्थातः॰ प्रस्तुतं परावस्थामप्राप्तं पूर्वापरीभूतं व्यापारशब्दवाच्यं॰ भाव
ना हि लिङादिभिरभिधीयमानानस्वरूपमात्रेणावर्तमानापदेशवद्वदभिधीयते किं तर्हि कुर्यादिति प्रवृत्तिविषयतया अतो लि
ङादीनामभिधा पुरुषकर्मिकेत्युच्यते उक्तं च पुरुषाणां प्रवृत्तिव्यभिचारित्वात् प्रमाणान्तरागोचरत्व प्रवृत्तिहेतौ प्रत्यक्षसंभवात् अ
भिधेयप्रत्ययवत्तो ऽनीयमानस्वरूपं लिङादीनामपि चानमेव प्रवृत्तिहेतुरिति प्रयुक्तः स एव प्रवर्तना पुरुषप्रवर्तकत्वात् लिङादि राम० ४६
षु द्विवृत्तिभावयेदिति लिङादिश्रवणानन्तरं प्रवृत्त्यदित्ता हेतुमत्स्यय॰ सर्वेष्वस्य भवतीत्यविवादं प्रवृत्तिहेतुस्वरूपे तु विप्रतिपत्ति
॰ तत्र संभावितानामन्ये

व्यापारोऽपि सन्न अभिधेयप्रत्ययहेतुत्वादभिधेत्युच्यते· यतऽ प्रवृत्तिदर्शनेऽन्तर्व्यापारऽ प्रवर्तना प्रवृत्तिहेतुत्वात् न च शब्दान्तेभ्य
प्रवृत्तिरुपलभ्यते। ततो न तदभिधासु प्रवर्तनात्व प्रसंगऽ· यद्धुक्तं कार्योत्पत्त्यादनभिधानमुक्तं· तत्र भावनावगतिरूपस्य कार्यस्य वर्त
मानापदेशेऽपि प्रसंगात् प्रवर्तिहामिति तान्नेनु प्रवर्तनात्तानेतरकालीनेनतदुन्नायकं अतोऽनन्यप्रमाणकत्वादुपपन्नमभिधेयत्व
मभिधायाऽ· नापि व्युत्पत्तिविरहऽ प्रवृत्तिहेतुत्वेन चार्थापत्तितस्तदवगमात् तथा हि यत्र तावल्लिङादिभ्यऽ प्रवृत्तिरुपलभ्य
ते तत्र तया प्रवर्तितत्वं इत्यतस्सः कल्प्यमूलात्मा लिङ्· प्रवृत्तिविशेषत्रत्रीयते त्र प्रवर्तमाना अपि लिङ्· आदिराऽ प्रवर्तत्वेति
मामपमाहेति वक्तारं निर्दिशति तेनावगम्यते प्रवृत्तिहेतुरभिहितो लिङा· स च नर्ते व्यापारात् सिध्यति· एतदेवास्यानन्यप्रमाण
कत्वं यत्प्रतिपत्तिकाले न शब्दादृतेऽवगम्यते। ननु प्रवर्तनास्वरूपमेवान्यतो नावगतं येन व्युत्पत्तिविरहः अवधेतान चाभिधाना
भिधीयत इति मन्तव्यं अभिधाशब्दस्य दुपपत्तेऽ यदेव हि शब्दश्रवणानन्तरं बुद्धौ विपरिवर्तते तदभिधेयं· उक्तं च· लिङादिभ्य
ऽ प्रवृत्तिहेतुरवगम्यते न च लिङादीनामभिधानव्यापारादन्यऽ प्रवृत्तिहेतुः शक्योऽनिरूपयितुमिति· नाप्यनवस्थानं तदभिधानस्य
शब्दादप्रतीतेऽ प्रवर्तनामात्रस्यैव प्रतीतेः॥ नापि लिङादिस्वरूपाभिधानापत्तिऽ स्वरूपमेव तद्व्यापारस्यैव लक्षणापाद्य अतो लिङा
दीनामभिधा प्रवर्तना सोऽयं विधिऽ आह च अभिधाभावनामाहुरन्यामेव लिङादयः इति तदनेनैव रूपेण विधिना सम्बद्धा।

राम० ४७ वनाप्रवृत्तिविषयत्वमवगतो फलवत्त्वया निश्चीयते तथावगता चानुष्ठीयते फलवता च विधिशक्तिमवसीदन्तीमुन्नमयति॥
सागरं तरेदित्यादौ तु सत्त्वापि लिङ्ग्यापारो निर्वाहकायः फलवत्त्वाय स्त्रभावान्न निर्वहति तद्भावश्चानाप्रवाच्यत्वान्न वेदत्वपौ
रुषेयत्वात्र पुनर्युक्तो यथाशंकापीत्युपपन्नो विधौ नु तन्मतिक्रम्यतितामुच्चरित्तमित्याभिनिरूपितविधित्वमिदं मयात्र संक्षिप्य वार्त्तिकरा
णाकरीकाविरोधपरिहारस्तु संविन्त्यः। वार्त्तिकटीकाद्यनुगुणंनुविधितत्वमस्माभिरर्थवादाधिकरणे निरूपणीयं। अधिकरणं
त्वेवं। विधिरबोधको बोधको वेति संशयः। अलौकिके धर्म्मविधेः शक्तिग्रहणासंभवात् अबोधकत्वं ततन्न्वा प्रामाण्यमिति पूर्वः
पक्षः। यथा प्रसिद्धपदसमभिव्याहारेण प्रसिद्धार्थस्य मधुकरशब्दस्य भ्रमरे संगतिर्गृहीता वाक्यार्थं प्रतिपद्यते। तथा कानी
र्य्या वृष्टिकामो यजेत्यत्र लोकप्रसिद्धार्थवृष्ट्यादिपदसमभिव्याहारादलौकिकभावनायां विधेः संगतिर्गृहीता विधिवाक्यार्थं
पुरुषोवगच्छति तस्मात्राबोधकत्वलक्षणमप्रामाण्यं नापि संवादापेक्षा स्वतः प्रामाण्योपगमान्नापि मिथ्यात्वादिरूपं।
सूत्रोक्तयुक्तेरिति। अत्र भगवता वृत्तिकारेण तस्यानिमित्तपरीक्षेत्येवमादिसूत्रत्रयमन्यथा व्याख्याते वृत्तिकारस्त्वित्यादिना
ग्रंथेन भाष्यकृता दर्शितं ग्रंथकारोपितदृशंपिनुमाह। वृत्तिकारस्त्विति। उपवर्षमतेन सूत्रत्रयमन्यथा कृत्वा व्याचष्टे भाष्यका राम०
रः केन ग्रंथेनेत्यपेक्षायां वृत्तिकारस्त्वित्यादि भाष्यग्रंथः पठितः। निमित्तसूत्रव्याख्याने। तावद्दर्शयति तत्रेति एतच्च सूत्रं न जन्मा ४७

हारेणव्याख्यातं लपरीक्षितत्वं निमित्तं प्रत्यक्षादीनि हि प्रसिद्धानि प्रमाणानि तदंतर्गतं वेदं शास्त्रमतस्तदपि न परीक्षितव्यमि
त्यस्मिन्व्याख्याने सूत्रार्थः ४· प्रत्यक्षसूत्रमवतारयितुं परिचोदयति नचेति। परिहरति नेति पक्षप्रत्यक्षं तत्तद्व्यभिचरति यच्छमिच
रति न तत्प्रत्यक्षमिति भावः ४· अयथार्थत्वशंका च परीक्षायां हेतुः ४ सा वैवरूपे प्रत्यक्षे न संभवत्येवातो युक्तमेवापरीक्षत्व
मिति भावः ४ एतदेव प्रश्नपूर्वकं सूत्रेणोपपादयति· किं पुनरिति। सूत्रं व्याचष्टे यदिति ननु सत्संप्रयोग इत्यत्र तच्छब्दाश्रवणा
त्तेनेंद्रियाणामिति व्याख्यानमनुपपन्नं तत्राह तत्सत्वेति· ननु व्यापकल्पनायापि नास्ति निर्वाहः ४ इदं शं पत्तत्स प्रत्य
क्षमिति पुनस्तच्छब्दापेक्षा पाविघमानत्वात् नैष दोषः ४ व्यत्यपक्षाध्याहारोपलक्षणत्वात् उक्तं च यद्वाध्याहारकल्पने
ति अन्यस्यैव यात्रे यः सच्छब्दस्याध्याहार इति भट्टोवेकः ४ द्वयोरपि तत्सतोरत्राध्याहारः ४ तत्राभाससमानाकारपरामर्शार्थोध्याह
तं तत्सत्त्वं ४ अपरश्च स्वरूपपरामर्शार्थः ४ सत्संप्रयोग इत्यत्र पठितः ४ स [illegible] दसद्विशेषणार्थ एव· अध्याहृतस्तु शोभ
नार्थ इति विवेचनीयमिति सुचरितमिश्राः ४। न चाभासलक्षणाकथनात् न प्रत्यक्षतदाभासविवेकः ४ शक्यते कर्तुं ना इदृशं प्र
त्यक्षमित्युक्ते इर्यादनीदृशं प्रत्यक्षाभास इति ज्ञातुं शक्यत्वात्· प्रयोजनाभावे न व्यत्यासमाक्षिपति न च सत्यपीति· अत्र शंक
ते प्रमाणोति· आक्षेपवादी परिहरति तत्रेति· आक्षेपमुपसंहरति। स्तत इति। समाधत्ते सत्यपीति· कुत्र तद्धि प्रसंगो तत्राह

राम० ४८

पीतेति शुक्तिरजतज्ञानेऽप्येवं वाति प्रसंगनिवारणार्थो व्यत्यपर्यस्याह अपि चेति। उपपादितमर्थं निगमयति तस्मादिति॥
अत्राह किं पुनरयथार्थज्ञानेन तावच्छुक्तौ रजतमिति नात्र शुक्ती रजताकारेणाभासते। किंतु ज्ञानद्वयमेवैतत्तथा हि
शुक्तिस्तावत्पुरोवर्तिनी रजतसाधारणेनात्मना गृह्यतेऽनन्तरं च सदृशदर्शनोद्बोधितसंस्काराद्दोषवशोपम्लुष्टतदवमर्शो र
जतमिति स्मृतिर्भवति तत्र चरयोर्ग्रहणस्मरणयोर्दोषवशाद्भेदकधर्मानवधारणाद्भेदाग्रहादेव च विभ्रमव्यव
हारो न पुनरन्यस्यान्यथाभानात्। किं च शुक्तिगोचरायाः रजतधियः किं निबंधनमिति विपरीतख्यातिवादी वक्तव्यः। ननु ता
वदिन्द्रियं प्राप्यकारित्वात् असन्निहितरजतप्राप्त्यसंभवात् अतो ग्रहणाकारणाभावात्स्मृतिरेवेदं अस्ति च स्मृतेः का
रणं पूर्वानुभवप्रभाविता भावना। ननु तत्तांशपरामर्शाभावान्न स्मरणमपि नोपपद्येत। नैवं अनुभूततद्विषयत्वमात्रेण त
दुपपत्तेः तदिति परामर्शस्य तत्राप्रयोजकत्वात् अतो ग्रहणस्मरणयोरुभयोरपि यथार्थत्वात् यथार्थायथार्थविभागो
नुपपन्नः सांख्यस्याप्ययमेव पक्षः। अत्र ब्रूमः। उभयोश्च यथार्थत्वे न भ्रान्तिः कापि सिध्यति। स्मरणमात्रग्रहो भ्रान्तिरि
ति चेत्तन्न युज्यते अयथार्थज्ञानं भ्रान्तिरिति हि लौकिकाः प्रतिपद्यन्ते भाष्यकारोऽपि यस्य च दुष्टं करणं यत्र च मिथ्येति प्र राम० ४८
त्ययः स एवासमीचीनः प्रत्ययो नान्य इति प्रत्ययस्यैवासमीचीनतां दर्शयति। यदपि विवेकाग्रहणादयथाव्यवहार इति त

48

इतिमंदं· अथग्रहणस्यग्रहणाभावरूपस्यतेनानंगीकारात्वरूकुस्यभ्रांतिशब्दवाच्यतास्यात्· स्मरामीत्युल्लेखशून्योस्मरण
मेवाग्रहणमितिचेन्न· नस्मृतेर्यथावस्थितार्थविषयत्वप्रामेव्यौताभावेनभ्रांतित्वासंभवात्· सापेक्षत्वेनस्मृतेरप्रामाण्या
ज्ञातित्वमितिचेन्न· नस्मृतिमात्रस्यतथात्वापातात् नहिस्मरणमात्रमप्रमेत्युच्यते· अपिचकोयंनियमो यत्स्मृतेरन्यतस्त
दर्थीयुक्तावेवप्रवर्ततेनान्यत्र· यदिनुतामेवरजतरूपाजानीयात्· नतस्तत्रप्रवर्ततइतियुक्तं· सादृश्यदर्शनात्तत्रैवप्र
वृत्तिरितिचेन्नहितत्सदृशमितिप्रतीयात्ररजतमिदमिति· नहिगवासदृशंगवयंजानंस्तोजोरयमितिव्यवहरेति· यदि
वमुक्तावप्रसक्तस्वतंत्रमेवरजतंसमर्प्यतेकथंवाहिनेदंरजतमितिप्रतिषेध8 प्राप्त्यभावात्· ननुनात्रकिंचिद्बाध्यतेकिं
त्वनवगतोविवेकोवगम्यतेनेदंरजतमितिप्रयुक्तौविविक्तंरजतमित्यर्थ8· एतच्चालौकिकमेवव्याख्यानमुपेक्षणीयंभ्रांतो
न्यदन्याकारतयाप्रसक्तंवाध्यतइतियुक्तं· कथमसन्निहितंज्ञानोत्पादकमितिचेन्न· प्रत्यक्षप्रमाणस्यायंधर्मोनाभास
स्याकथमन्यथासंप्रयुक्तमिंद्रियमन्याकारज्ञानस्यहेतुरितिचेन्न· दोषवशादितिब्रूम8· दोषस्यैवमिथ्याज्ञानकारणत्वात्·
दृश्यतेहिस्वप्नेमनोदोषादवर्तमानस्यापिवर्तमानवज्ज्ञानं· अतआत्मेंद्रियमनोर्थसन्निकर्षोऽसन्नुदोषैरुपसंपत्ता
नहेतु8 सन्नुतुप्रयुक्तौविपरीतज्ञानकारणमितियथार्थायथार्थविवेक8 योगावारस्तुबुद्धिस्थस्यरजतादे8 प्रयुक्तस्यादावा

म २

रा॰ म॰ ५९ रोपइत्याह-नह्यसत्पुरोवर्त्तित्वेनरजतस्यबाधेऽहंरजतमितिस्यात्-इदंताबाधेवत्तिरपि स्वानप्रमायत्तिः-असद्देव रज
तमारोप्यत इतिध्रमकः तत्र-निरूपाख्यानस्यापरोक्षावभासगोचरत्वानुपपत्तेः अनिर्वचनीयमारोप्यत इति वेदांतिन
ः तदपिन-तादृशवस्तुनिप्रमाणाभावात् असतोऽप्रतीतिः सतश्च बाधानुपपत्तिरेव प्रमाणमिति वेत्-न-हि शांतरग
तस्यात्रारोपेणतस्याचयाप्युपपन्नत्वात्-नमु शुक्तिरजततादात्म्यमत्र प्रतीयतेनचतत्देशांतरेऽस्ति अतोनिर्वचनीयमेवा

49

गीकर्त्तव्यं-नैवं-इदमंशरजतांशतादात्म्यस्यान्यत्रापिसद्भावात् अतोन्यत्रसतोन्यत्रारोपोन्यथाख्यातिरेवेतिसिद्धोवि
पर्यासः॥ ॥प्रमाणतदाभासविवेकंप्रश्नपूर्वमुपपादयति॥कथमिति॥विवेकोपपादनफलमाहचोदनेति॥अ
त्रभाष्यकारेणानुसर्वएवनिरालंबनः स्वप्नवत्प्रत्ययइत्याद्याक्षेपपुरस्सरं-जाग्रतोबुद्धिः गुपरिनिष्ठितासकथंविपर्य
स्यतीतिवात्स्यार्थसद्भावः प्रतिपादितः तस्यप्रकृतविचारासंगतिमनुपयोगं चाशंक्यसमानुमाह-नचेति।कारणदो
षोबाधकज्ञानंचेतिपूर्वोक्तहेतुद्वयं तदाक्षेपात्प्रकृतविचारसंगतिः।सर्वस्यापिमीमांसाप्रपंचस्यवात्स्यार्थाश्रयत्वा
त्-तत्सद्भावप्रतिपादनेप्रयोजनवदेवेतिभावः-यथाहुः कर्म्मापूर्वः फलसंबंधः पारलौकैहलौकिकः।सर्व्वमित्या रा॰म॰ ५९
द्ययुक्तंस्याद्यर्थाभ्रन्त्यामुबुद्धिषु-तस्माद्धर्म्मार्थिभिः पूर्वं प्रमाणैर्लोकसम्मतैः बाह्यस्यात्रार्थस्यसद्भावेयत्नः कार्यः

क्रियांप्रति॥निरालंबनवादी बाह्यार्थमपलपति ज्ञानं स्वीकुरुते ऽन्यवादी तु ज्ञानस्याप्यभावमभिप्रैतीति विवेकः उ-
क्तं च· तत्रार्थशून्यं विज्ञानं योगाचाराः समाश्रिताः· तस्याप्यभावमिच्छन्ति ये माध्यमिकवादिनः॥तत्र बाह्यार्थशून्यत्वं तु
ल्यतानुद्वयोरपि॥ननु बाह्यार्थाभावेपि संवृतिसिद्धमर्थमंगीकृत्य बौद्धानामपि धर्माधर्मोपदेशो घटत एव।
उक्तं द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना: लोके संवृतिसत्यं च सत्यं च परमार्थत इति· एतच्चाद्वैतवादिभिरभीष्टमे
वाविद्याप्रपंचमिथ्यात्वनिरूपणात्· एतच्चायुक्तं· सत्यद्वयासंभवात्· न हि संवृतेः सत्यत्वमस्ति संवृतिशब्दस्य मि
थ्यापर्यायत्वात्सत्यशब्दसमभिव्याहारानुपपत्तिश्चातो यः सत्यभेदो बौद्धैराश्रितः द्विविधं सत्यं संवृतिसत्यं प
रमार्थसत्यं चेति सोनुपपन्नः· न चायं सत्यशब्दः संवृतिपरमार्थयोः साधारणो वृक्षशब्दवद्विरोधात्· अत एव न
गवादिवत्सामान्यशब्दोपि समानानां हि भावः सामान्यं न च तत्परस्परविरोधिनोः संभवति नहि धर्माधर्मयोः
धर्मत्वमधर्मत्वं वा एकं सामान्यं भवति तदुक्तं संवृतेर्न तु सत्यत्वं सत्यभेदः कुतोन्वयं सत्या चेत्संवृतिः केयं मृषा
चेत्सत्यता कथं· सत्यत्वं न तु सामान्यं मृषार्थपरमार्थयोः। विरोधान्न हि वृक्षत्वं सामान्यं वृक्षसिंहयोरिति यदप्यु
च्यते कल्पनामात्रकल्पितेन बाह्येन सर्वो लौकिको व्यवहार इति। तदप्यसत् अभिर्व मुके जगत्यां मि ज्ञ स्व चिन्मात्र स

रा॰म॰ ५०

50

कल्पनया भेलुमशक्यत्वात् । उक्तं च किञ्चिन्नमेव किञ्चिद्रूपान्तरं कल्पनास्पदं भवतीत्युक्ता विवरजतरूपे - यद्यनुत्पन्नं किंचिद्भिन्नमस्ति
तत्केन रूपेण कल्प्यतां । उक्तं च कल्पनापि त्वधिष्ठानं विना नैव निर्वस्तुका भवेत् - ननु सत्यमसत्यं संवृतं चेति - त्रिविधं वस्तुतत्वमंगीकु
र्मः तत्र संवृतं नाम सत्यमेव व्यवहाराविसंवादात् - नापि सदेव प्रमाणान्तरविरोधात् - अतो विधान्तरमेवेदमिति युक्तं सदा भ्रमे यो
व्यवहारः सेवं - संवृते मिथ्याज्ञानत्वेन वस्तुकल्पने सामर्थ्यासंभवात् - अतो पत्परमारान्तरविरोधात् - अतो विधान्तरमेवेद
मिति युक्तं सदा भ्रमे यो व्यवहारः सेवं - संवृते मिथ्याज्ञानत्वेन वस्तुकल्पने सामर्थ्यासंभवात् - अतो यत्परमार्थतो नास्त्ये
वेति निरूप्यते न तत् संवृत्यापि सद्रूपं भवितुमर्हतीति - यत्तु पावद्व्यवहारमविसंवादि तद्दृश्यस्यैव परमार्थसत्त्वान्न ह्यसतः - सर्व
दा व्यवहारहेतुत्वं संभवति - तदुक्तं - नस्माद्यत्रास्ति नास्त्येव यच्चास्ति परमार्थतः तत्सत्यमन्यन्मिथ्यैव न सत्यं व्यपकल्प
ना । स्वप्नवच्च वाह्यपदार्थाभ्युपगमे स्वप्नादिभोगतुल्य एव शुभकर्मफलोपभोगो भवेत् ततोऽन्यापि त्वष्टोमादीनेव क सुभा ४
श्चित्सेवते नास्त्रीक्षिकसुखादिवच्चपदस्थेयेव कदाचिदुत्पत्तेः प्रवृत्तिर्वैयर्थ्यात् - उक्तं च नाहि स्वप्नसुखाद्यर्थं धर्मं क
श्चित्प्रवर्तते - यादृच्छिकत्वात् स्वप्नस्य तल्लब्धिमाश्रित्य पठितैः । अतः परमार्थफलप्राप्त्यर्थं बाह्यवस्तुव्यवस्थापनप्रयो रा॰म॰
जनवदिति सिद्धं । प्रत्यवस्थानं विवृणोति तथा हीति - व्यवस्थानुपपत्तौ कारणमाह - सर्वेति स्तंभादिप्रत्यया इति क्व ५०

त्र प्रत्ययमात्रस्य पक्षत्वे अंशेऽसिद्धसाधनं तादृशान्तराभावश्च स्यात् । अतो ज्ञायत इति पक्षविशेषणं कर्तव्यं । अत्र सा
ध्यं वाह्यानालंबनत्वेन व्यवस्थाप्यं स्वांशावलंबनत्वस्य वौद्धेनाभ्युपगमादित्यपि प्रायेणाह स्वांशमेवेति । मीमांसको
पि प्रायेण च अवयवोपन्यास । सर्वज्ञाननिरालंबनत्ववादिमते विपक्षाभावेन तत्र हेतोरप्रवृत्ते । व्यतिरेकानुपन्यास
। समाधानमुपक्रमते इति प्रायः इति विरूपाम इति अन्यवादेरस्यार्थः । अंशान्तर्गतादेनाहमवलिजि । प्रत्यक्षेणेति प्रत्यक्षेप
रिपंथिनि तदिति तुच्छमनुमानमात्मानमेव नलभते वह्नेः शैत्यानुमानमिवेति भाव । एतदेव विवृणोति पदितिान लिहतिरजा
यतेत्यस्यार्थः । पदाह भाष्यकारः संभइति ज्ञायतोपि वुद्धि । सुपरिक्षिताकथं विपर्यस्येष्यतीति सुपरिक्षितत्वं ह
णावाधकप्रत्ययानिवृत्त्यर्थः । अत एव संभादिप्रत्ययानुमानाद्भूलीयस्त्वं भवतीति भाव । इत्युक्तं । प्रत्यक्षेण तदुत्पत्तिनि
रोधादेव तद्वाधकमित्युक्तमित्यर्थः । अप्रमाणं गृहीतस्यार्थस्य वाधो भवति । गृहीतमात्रवाधेतु । निरालंबना । प्रत्यया
इति पौर्वभवस्य पक्ष । सोपि गृहीतत्वाविशिष्यास्यात्तेन तथानुमाने पक्षाभाव । किंच निरालंबनत्वेन विशिष्टा । प्रत्यया ।
साध्यं तेन तत्र विशेषणविशेष्ययोर्ज्ञानं तस्यापि निरालंबनत्वात्तयोरप्रसिद्धि । तत्र अप्रसिद्धविशेषणत्वमप्रसि
द्धविशेष्यत्वमप्रसिद्धोभयत्वं च दूषणं सालंबनत्वेभ्युपेते नैवानैकान्तिकत्वादिरनन्ययानामनालंबनत्वसिद्धि । तथा । विमि

ईप्र०
५१

इति निरालंबनत्वं धर्मिणो भिन्नमाभित्वं वा अस्त्येव विशेषणात्वासंभवः। आद्ये तु दृश्यादि ग्राहिणो ज्ञानस्यापि ध्यानत्वात्र भेदः सिद्धिः
स्यादेतत्। वस्तुनि हि भेदाभेदादिविकल्पो युक्तो नावस्तुनि न चालंबनप्रतिषेधो वस्तुभूतः। अतः किं तद्विकल्पेन। मैवं अ-
वस्तुत्वेप्यस्य प्रतिषेधानुपपत्तेः। न ह्यवस्तु विबुद्धिविषयो भवति तद्विषयत्वे वा वस्तुत्वापातात्। अथ अवस्तुनोपि वस्तु-
त्वं कल्पयित्वा अनुमानव्यवहारः क्रियते। प्रतिमायामिव देवतात्वे आराधनादिव्यवहारः। मैवं। अस्य तावत् कल्प-
नायोगात्। अन्यत्र प्रसिद्धस्य ह्यावहि देवतात्वमन्यत्र कल्प्यते अनालंबनत्वं तु गगनकुसुमायमानेन कल्पनाम-
र्हति कल्पनापि निरालंबनत्वस्य ज्ञानरूपात्तदुत्पत्तौ वव्याप्रियमाणां कथमवस्तु भविष्यति। अर्थक्रियाकारित्वस्यै-
व वस्तुत्वात् ज्ञानोत्पादनस्याप्यर्थक्रियात्वात्। अत्राच्येपि पक्षसाध्यहेतुदृष्टांतदोषात् आद्यत्वाच्च भेदेनेत्यादि
नाग्रंथेन वार्तिककृता दर्शिताः इत्याह। दूषणोति। सह स्मशब्दोत्रानेकसंख्यावचनः। सहस्रशः स्फुरतिवत्। अत्र प्रत्यक्षाधि
नो बुद्धिरतत्स्मात् ज्ञिन्नमर्थरूपं नाम न किंचिदस्तीति। तथा निराकारा च नो बुद्धिः आकारवांश्चाह्योर्थः। स हि बहिर्देशसंबद्धः।
प्रत्यक्षमुपलभ्यत इति पूर्वीसनत्व पक्षभाष्यपर्यालोचनया त्रापिकाल्पार्थसदसद्भावचिन्तैव उक्तं च प्रच्यस्खिति पुन ईप्र० ५१
स्यैव निरालंबनो च्यत इति अतस्सर्व एव निरालंबन इन्यसेनैव गतत्वात् पुनरुक्तामिदं अन्यास्खित्याशंकाविचारस्वर

पर्मेदोपदर्शनेन परिहर्तुमाह· एवमिति· प्रत्यक्षवाह्यार्थनिराकरणपरस्यानुमानस्य स्वांशग्राहकेन प्रत्यक्षेणाभेदविष
यभेदे सति पूर्वोक्तः ४ प्रत्यक्षाविरोध एव नास्तीत्यभिप्रायः ४ पुनः प्रत्यवस्थानेमूलं· न चात्र संदेह एव नास्ति सर्वत्र ग्रहणोपरस्य
रविलक्षणात्रित्तप प्रतिभासनात् नीलमिदमहं गृह्णामीत्यादिषु ह्यनात्मतया नीलादयः ४ प्रतिभासन्ते न पुनः नील एव के
वलः ४ स्वप्रकाश ४ तथा प्रतिभासाभावात् अतो नारम्य एवायं विचार इत्याशंक्याह तदर्थमिति। ज्ञानस्यैव ग्राह्यग्राहकसं
वित्तिरूपेण प्रतिभासनात् निष्प्रमाणिकाबाहिरर्थकल्पनेत्यर्थः ४· यथोक्तं· अविभक्तोपि बुध्यात्मा विपर्यासितदर्शनैः ४॥
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यत इति। पूर्वपक्षं परिगृह्णाति तत्रेति। ननु नीलमिदमित्यनात्मतया नीलाद्यवभास
नेन तु नीलमहमिति। अतो निष्प्रमाणिकैवेयं कल्पनेत्यभिप्रायेणाह· कुत इति। अत्राह नेति· अयमाशयः ४ नीलपीताद्
र्थस्य तावत्सर्वजनासिद्धं तत्र यदि विपर्ययज्ञाने स्वित्वात्मैवानात्मतयावभासत इत्यंगीक्रियते तदानेकादृष्ट
कल्पना भवति। अतिरिक्तग्राह्यकल्पनायां तु ग्राह्यत्वस्य ग्राहकं विनानुपपत्तेस्तत्कल्पनापीत्यनेकादृष्टकल्पनास्यादि
दिति· ननु भवत्पक्षेप्येकस्यैव ज्ञानस्यानेकग्राह्यग्राहकशक्तिकल्पनात् अस्त्येव गौरवं सत्यमेवं तथापि च मते ग्राह्यग्रा
हकधर्मिद्वयकल्पना शक्तिद्वयकल्पना च अस्मत्पक्षे त्वेकस्यैव शक्तिद्वयकल्पनाध्यावसिप्यास्ति विशेषः ४ अप्रत्य

राम०
५२

क्षस्येति। ज्ञानस्याप्रत्यक्षत्वे ऽभ्यस्मादवगमात्तदवगतत्वं ततश्चानवस्थास्यात् प्रकाशस्वभावस्यैव प्रकाशान्तरापेक्षानुपपत्तेः
स्वप्रकाशमेवार्थसंवेदनमिति भावः। हेत्वन्तरमाह। संवेद्यत्वादिति। नीलो यमर्थो यस्मान्नीलाकारं ज्ञानमुत्पद्यत इत्येवं वदल्लौकि
कोऽपि ज्ञानाकारतामभ्युपगच्छतीत्यर्थः। अर्थान्तरस्येति। यदि वा यं ग्राह्यो नीलादिर्विज्ञानस्याकारः स्यात् तदा तादात्म्यलक्ष
णेन संबन्धेन ग्राह्यग्राहकभाव उपपद्यते भेदे तु संबन्धाभावेन ग्राह्यग्राहकभावानुपपत्तिरिति भावः। श्लोकार्थं विवृणोति यो हि
ति व्यवस्थाहेतुं शंकते हेतुत्वमिति। एतदेव विवृणोति य एवेति परिहारं शंकते सादृश्य इति। दृश्यत इति एवमिति। समनन्तरः प
र्वप्रत्ययः। अत्र विशेषं शंकते अथेति। एतदपि निराकरोति एवमपीति सौत्रान्तिकमतमुत्थापयति स्यादिति। किंस्थितिवस्तुतो
निराकारमेव ज्ञानं अर्थसंबन्धी चायमाकारो बुद्ध्यारूढः प्रतीयत इति भावः। तथासतीति। आकारसमर्पकत्वे सतीत्यर्थः। बो
दयतीति काव्येति परिहरति एवदेवेति। हेतुत्वमेवेति। ज्ञानाकारार्पणक्षमं हेतुत्वमेव ग्राह्यत्वं विदुरिति संबन्धः। पुनश्चोदयति
यद्येवमिति। उक्तरूपं ग्राह्यत्वं यदीत्यर्थः। उत्तरमाह ज्ञानेति। अस्मिन्पक्षे प्रत्यक्षग्राह्यत्वानुपपत्तिरिति शंकते एवमिति
ज्ञानवैचित्र्येणैवानुमेयमित्यर्थः। समाधत्ते एतदिति वह्निस्वलक्षणं परंपरया वह्निज्ञानं जनयदनुमेयमित्यर्थः। ता राम०
दात्म्यानंगीकारे सत्यसंबन्धात् कथमर्पयतीति चेत् तत्राह असतीति तां संवित्तिं आविशत् सारूप्यमिति संबन्धः। तन्मतमुप ५२

संहरन्निइतीलिङ्गषयितुमुपक्रमते · अत्रेति अनन्तइति समनन्तरप्रत्ययस्यापि विषयत्वापत्तेरित्यर्थः । प्रकारान्तरेणाविष
यत्वं शंकते अथेति । परिहरति न चेति । न चेति सुखस्योपादानुमशक्यत्वादिति भावः । यतेत न्हितेः सुखज्ञानात्सुखस्योप
दानादिव्यवहारानुगुण्यस्यात् तदभावेनुनविषयत्वमिति भावः । अन्यदप्याह न चेति विशेषं शंकते न चेति निराकरोति ए
वमिति · उभयरूपव्यवहाराङ्गीकारे प्युक्तदोषानतिवृत्तेरित्यर्थः । वैपरीत्यं विवृणोति अथेति · प्रकारान्तरेण ग्राह्यत्वं शं
कते ज्ञानेति · अथेति पक्षद्वयं चात्र प्रमाणद्वयाभिप्रायेण उपपादितमर्थं निगमयति तस्मादिति । सहोपलंभनिय
मोप्यभेदमुपस्थापयतीति संबंधः । अनियममाशंक्य निराकरोति न चेति · तस्मिन्काले ज्ञानेन विषयस्येव प्रकाश
नादिति भावः । न चेत्यत्र कारणमाह उत्तरेति · एतदेव सहोपलंभप्रमाणमित्यर्थः । प्रकाशनमित्यनेन ज्ञानस्य स्व
प्रकाशत्वं ध्वनितं विषयं प्रकाशयदात्मानमपि प्रकाशयतीति भावः । ननु वस्तुतो निराकारमेव ज्ञानं अर्थसंबंधी
चायमाकारो बुध्यारूढः । प्रतीयत इत्यवक्तिं न स्यादेवं · बाह्यार्थापरित्यागेनान्तरमनुभवमारूढ इत्यत्र प्रमाणा
भावात् अस्तु तर्हि घटाकारस्यैव ज्ञाने प्रतिबिंबोदयः । जले चंद्रस्येव · नैतदपि युक्तं · आह न चेति चंद्ररहितस्य जलस्योपलं
भाद्दृष्टान्तत्वात् प्रतिबिंबप्रतीतिर्युक्ता ज्ञानं नु न कदाचिदपि निराकारं दृष्टं कथं तत्राकारप्रतिबिंबकल्पना स्यात् · अस्तु ना

रा॰म॰ ५२ मत्रूपस्य प्रतिविंचोदय ४ गंधरसादीनां तुल्यसंभाव्य एव · यथा द्रू ४ शब्दगंधरसानां च कीदृशी प्रतिविंबताविजानेच
गत्यभावात्स्यकथंस्यादर्थधर्मतां॥ सिद्धांतं प्रतिजानीते इतीति · श्लोकार्थविदृत्तोतिविज्ञानेतिनीलमिदंपीतमिदमिति
ज्ञानमुत्पद्यमानमात्मानमेव प्रकाशयदुत्पद्यत इत्यर्थ ४ · अत्रैव तत्सम्मतिमाह · यथेति। न तावदिति। एकस्यैवैवंरू
५३ पत्वे प्रमाणाभावादिति भाव ४ · अत्र पूर्वपक्षोक्तां युक्तिमनूद्य परिहरति · सर्वे घेति। नहीति। यदनुमानेनस्वात्मांशग्रा
हित्वात्एतत्तरनानेत्यादिनोक्तमानं। वक्तुं न शक्यमित्यर्थ ४ कथं न शक्यमतस्त्राह · तेषामिति। नानेत्यादिनोक्तानांनिमि
त्तानां व्यभिचारात्र अभावादित्यर्थ ४ · ननु तस्यात्माप्यात्मांशपर्यवसायित्वामेवरङ्गीकृत्यतेनेत्याहतदिति · एवमनंगी
कारेदोषमाह · तस्येति · अत्रैव वार्तिककृत्सम्मतिमाह। आह चेति। अनुपानजाया बुद्ध ४ आत्मांशपर्यवसायित्वात्त
यासाध्यमूतोविरालंबनतायदि न गत्वेति ततोस्या ४ स्वांशमात्रविषय ४ चैत्रादिप्रत्ययानां च चैत्रादयइति भिन्नवि
षयत्वान्नवाध्यवाधकभाव ४ अतो रूपारचैत्रादिप्रत्ययस्वरूपपर्यालोचनयाविविद्यमानैवसात्रबन प्राप्तिसतीके
ननिवार्यत इति श्लोकार्थः॥ एषरागातरमाह किंचेति · निरामयतितस्मादिति। यदुक्तंज्ञानस्यैवतत्तदाकारेणावभासोना राम॰
तिरिक्तस्यार्थस्येतितदूषयितुमाह प्रत्युतेति अहं प्रत्ययस्यज्ञानावभासकत्वमाशंक्याह अहमिति। नापिग्राह्यलक्ष ५२

णानुपपत्त्यात्तत्सिद्धिरित्याह तत्ययेति । यथा वेद्यत्वमभ्युपगन्तव्यं ग्राह्यत्वमपि वाच्यस्यैव कर्मत्वादित्यर्थः । यां कांचिदेव व्य
क्तिमित्यर्थः । एवमनङ्गीकारे दोषमाह । अन्ययेति । यां कांचिदित्यनेनोक्तमर्थं विवृणोति तदिति । अन्येषां पूर्वपक्षोक्त
दोषग्रासात् ज्ञानजन्यफलभागित्वमेव तद्ग्रहणग्राह्यत्वलक्षणमाश्रयितव्यमित्यर्थः । एतदेवोपपादयति ज्ञानेति ।
न चास्मिन्नर्थे प्रमाणाभाव इत्याह अस्ति हीति । उभयमानो विभाग एवात्र प्रमाणमित्यर्थः । एवं च सत्येतदप्यस्मद
दभिमतमासिध्यतीत्याह तदेवेति । प्रकारान्तरेण ज्ञानकल्पनमुपपादयति । अथ चेति । किं तत्कारणमित्यपेक्षायामा
ह तच्चेति लोकशब्देन प्रसिद्धिरुक्ता स्वयंप्रकाशत्वपक्षेऽपि मानसस्य स्फुलगम्यत्वमुपपादयति येपीति स्वप्रका
शमहिम्ना व्यवहारोपपत्तिमाशङ्काह । यस्मात्त्वमिति । चोदयति सोपीति । परिहरति नेति । एतदेवोपपादयति प्रका
शकत्वमिति व्यापारासम्भवं विवृणोति नहीति । उपपादितमर्थमिगमयति । तस्मादिति । प्रकारान्तरमाह अर्थग
तो वेति । अनुगतं प्रकाशपदवाच्याशंकते व्यवहारेति । उपादानादिव्यवहाराभावादिति परिहारार्थः । उक्तदोषत्वा
दिति । अस्मिन्पक्षे तदनुपपत्तिं परिहरति अस्मिन्पक्षे एवमित्यादिनाग्रे येन पूर्वं दोषस्योक्तत्वादित्यर्थः । तन्निमित्त
स्वप्रकाशत्वनिमित्तं । उपपादितमर्थं निगमयति तदेवमिति । अतमविष्यन्तो तदनुपपत्तिं परिहरति अतिक्रान्तेति ।

रा॰म॰
५४

54

एतेनात्मद्वयपि निरस्तमित्याह· एवं चेति· इतिनियमनिरासाद्धेतोः सहोपलंभेत्यादि· यदुक्तं· एतदपि प्रायुक्तमित्यर्थ
ः· अत्र पूर्वपक्षोक्तं परिहारमनूद्य निराकरोति यत्विति। नास्येति ज्ञानस्येत्यर्थः· ततः किमत आह नहीति· दूषणांतर
माह· न चेति· अत्रेति· यच्चेदमतीतं विज्ञानमुपरितनस्य ग्राह्यत्वेन भवद्भिर्विष्टं तद्ग्राह्याकारं ग्राहकाकारं स्वप्रकाशं वा
स्यादिति त्रेधा विकल्प्येत्यर्थः· केनेत्यपेक्षायामतीतं पञ्चविज्ञानमित्यादिनेत्युक्तं· अतीतं पञ्चविज्ञानं ग्राह्यत्वेन
हि कल्पितं· तत्स्याग्राहकरूपं वा ग्राह्यं वोभयथापि चेत्यनेन वार्त्तिकेन विकल्प्येत्यर्थः· दूषणमुक्तमिति वार्त्तिकका
रेणेति शेषः दूषणवार्त्तिकं त्वेवं ग्राह्याकारत्वमात्रे स्यादर्थः ग्राह्यांतरेणेते· स्वकाले चाप्यसंवित्तेस्त्रेस्याच्छक्त्यर्पणं
ततः। पश्चैवानागताज्ज्ञानात् संतत्यंतरजादपि। दृष्टत्वेनाप्यविज्ञानान्न योत्पन्नाद्धि नश्यतः· केवलग्राहकत्वेनु
विषयत्वेन युज्यते किमपेक्ष्य च तस्येदं ग्राहकत्वं प्रकल्प्यते। ग्राह्याकारतानिरस्तैव संवेद्येत तदेव चाततआरेत्तरविज्ञा
नेन प्रतीक्षेत बोधकमिति· अंतरमिति· उत्तरज्ञानमपि ग्राहकरूपं वा ग्राह्यरूपं वोभयरूपं वेति त्रेधा विकल्प्य। ग्रा
कारेत्यादिना दूषणमुक्तं वार्त्तिककारेणाभिविवेचनीयमित्यर्थः· दूषणवार्त्तिकपर्यालोचनया तत्रस्य त्रेधा विकल्प्यो व रा॰म॰
हिरेव बाध्यः दूषणवार्त्तिकं तु। ग्राह्याकारकल्पनायां वा परस्यात्मांशः एव तेन प्रमायपर्यवसाने च नानीतो विषयो भवेत् ५४

पर्वग्राह्यस्वतन्त्रपत्वेग्राहकत्वंनुहीयतेग्राहकाकारमात्रेस्याद्विषयोनासन्नपत्त ४ ानचशक्यपर्यणस्यात्रव्यापारत्र
पलभ्यते।शाक्यपर्यणस्यचाभावोपुष्यात्यक्षेप्रसाधितइति।अनन्तरंचसंतानांतरवज्ञैषामित्यादिवार्त्तिकेनज्ञानानांहे
नुसाध्यत्वाभावेवास्यवासकत्वाभावेचप्रयोगादर्शितास्तेवग्रंथविस्तरभयादस्माभिर्नालिखिता ४ ग्रंथकारस्यतुवार्त्तिकस्य
विवेककीर्तनमत्रकिंप्रयोजनकमितिनाविद्म ४ अत्रचोदयतिकथमितिपरिहरतितत्रेतिनचैवमसत्त्वात्स्यापत्ति
रित्याहसर्वप्रेतिएतदेवोपपादयतिस्मृत्युक्तिकेति।अत्रप्रसंगादेरकदेशिमतमनूद्यनिराकरोति।यत्विति।विरोधमेवद
र्शयति।कोहीति।विवेकग्रहेपिभ्रमोदृष्टइत्याह।किंचेति।अत्रचोदयतिकथमिति।उदाहरणांतरेण्यारोपमुपपा
दयति।तथेति।इदानींतन्मतेनाप्यन्यथाख्यातिमापादयति।किंचेति।हेत्वंतरेणप्रवृत्तिंशंकतेअथेति।नापिसादृ
श्यात्प्रवृत्तिः।संभवतीत्याह।नचेति।कारणस्यदृशस्यापितत्कार्यसाधकत्वमस्तीतिशंकते।नचेति।परिहरति।नै
वमितित्रीत्वंघशामेवनीवारगतानांतत्रापूर्वसाधकत्वमित्यर्थ ४ ततइति।यद्यकार्यत्वावगमात्तेषामप्रवृत्तिरिष्यु
च्यतेननु ४ कार्यत्वात्गमात्स्वप्रवृत्तिरित्यंगीकृतमित्युक्तदोषानतिवृत्तिरित्यर्थ ४ उपपादितमर्थंनिगमयति।तस्मा
दिति।उपपादितेर्थेभाष्यंप्रमाणयतितस्मादिति।वृत्तिकाराभिमतसूत्रार्थोपपादनप्रयोजनमुपसंहरतितस्मा

राम० दिति। एवं प्रत्यक्षस्याव्यभिचारित्वपरीक्षां निवृत्त्येत्तत्संप्रयोग इत्यादिना लक्षणान्तरं प्रतिपाद्यानन्तरमनुमानादिलक्षणमा
५५ ह वृत्तिकारस्तस्य प्रयोजनं दर्शयति प्रत्यक्षस्येति दर्शयित्वानुमाह वृत्तिकार इति शेषः । अस्त्वितानुमानादिवर्णनं वृत्तिकारस्यानु
चितमिति चेत् न । सत्त्वस्य सत्त्वेनात्मकत्वेन प्रत्यक्षलक्षणेतानुमानादिलक्षणस्यापि सूचितत्वात् अथवा प्रत्यक्षं तावदव्यभि
चारित्वान्न परीक्ष्यते तत्पूर्वकमनुमानाद्यपि । एवं लक्षणाकत्वात् । प्रत्यक्षाव्यभिचारित्वाच्च न परीक्ष्यमित्यनुमानादिलक्षणप्रद
र्शनार्थत्वात्प्रत्यक्षसूत्रस्यापमदोषः ॥ तत्र वृत्तिकाराभिमतमनुमानलक्षणं तावदाह अनुमानमिति अत्र ज्ञातः संबंधो व्या
प्तिलक्षणो व्याप्यव्यापकयोर्दृष्टान्तधर्मिणि येन प्रमात्रा स ज्ञातसंबंधः । तस्यैकदेशस्य व्याप्यस्य धूमादेर्दर्शनादेक
देशान्तरे व्यापकवह्न्यादौ वक्ष्यमाणसन्निकृष्टेऽर्थे या बुद्धिस्तदनुमानं अथवा ज्ञातः संबंधो यस्यैकदेशाभ्यां धूमव
ह्निरूपाभ्यां सह स ज्ञातसंबंधो महानसादिधर्मी एकदेशी तस्य यो धूमाख्य एकदेशः तस्य पर्वतादौ दर्शनादेकदेशा
न्तरे वह्न्यादौ बुद्धिः अत्र च सर्वनामार्थं वक्रवृत्तिरीहे समारोपं सन्निहितश्च सर्वनामार्थो भवति न चात्र प्रमाता एकदेशी वा के
न विदुपात्तः शप सन्निधानात् तयोः समासार्थत्वानुपपत्तिमाशंक्य लिंगस्यैवैकदेशरूपस्य समासार्थत्वमभिप्रेत्य व्या राम०
चष्टे यस्येति अत्र यादृशं तादृक्सदृशाभ्यां दृष्टान्तपरिदृष्टरूपादन्यूनरूपस्य नालिंगत्वं नापि लिंगत्वमिति दर्शितम् । ५५

नरूपस्याप्रयोजकत्वादितिभावः ज्ञातः संबंधो यस्यैकदेशस्य धर्माख्यस्य एकदेशान्तरेण साध्येन सह स ज्ञातसंबं
धश्चाष्टष्टवान्ः पुरुषस्य या बुद्धिस्सानुमानमित्यर्थः। अत्र चैकदेशपदेनोपादानात्सन्निहित एव सर्वनामार्थो भवतीति व
क्तव्यं तीत्युपपत्तिः। एतदप्यनुपपन्नं। एकदेशस्याप्यनुपात्तत्वेनासन्निधानात्। एकदेशादर्शनादित्यत्रैकदेशशब्दस्यान्तरपदा
र्थविशेषणत्वेनोपसर्जनत्वात्। पूर्वपदार्थविशेषणत्वे वैकदेशपदस्य दर्शनशब्देन सह समासानुपपत्तिः ज्ञातपदसह संबं
धसापेक्षत्वेनाव्यपेक्षालक्षणसामर्थ्याभावात्। ननु दर्शनक्रियां प्रत्येकदेशस्यादृश्यत्वेन प्राधान्यं भवति च प्रधानस्य सापेक्ष
स्यापि समासः। नैवाशङ्कतः प्राधान्याभावात् व्याकरणोद्दिष्टस्यैव पदार्थत्वात्तात्कृतगुणप्रधानभावस्यैव प्रयोजक
त्वाज्ज्ञातस्माद्विशेषणत्वमेवात्र गुणत्वेनोपकारकत्वलक्षणं शेषत्वं विशेष्यत्वं प्राधान्यं नशेषित्वं। अत एव ऋद्धस्य राज्ञ
ः पुरुष इत्यत्र शेषिरोपि राज्ञः शब्दतो विशेषणत्वात् ऋद्धिसापेक्षमाणस्य समासाभावः राजपुरुषः शोभन इति वशे
षणं तस्यापि पुरुषस्य विशेष्यत्वेन प्रधानत्वात् शोभनपदापेक्षस्यापि भवति समासः। अत्र च विशेषणमेकदेशादर्शन
स्येति न ज्ञातसंबंधपदापेक्षस्य संभवति समासः। नैष दोषः। सन्निहितमात्रस्यैव सर्वनामार्थत्वेनोपादानस्यात्रानुप
योगात् अन्यपरेणाप्युपादाने नैकदेशस्य बुद्धिसन्निध्युपपत्तेः स्वर्गकामादिपदानां चवङ्क्षीहितत्वेनानुपात्तेपि पुरु

घेष्वप्युपगमात् अस्तु वा कर्मधारय एव लघीयस्त्वात् ज्ञातश्चासौ संबंधश्चेति न च स्मिन्पक्षे एकदेशदर्शनादेकदे
शात्वर इत्यनुपपन्नं स्यात् । संबंधस्यानिर्वचनीयत्वेनैकदेशासंभवात् । तस्याशसंबंधारंभकत्वेन संबंधिनोरेकदेशत्वो
पचारात् । तेन यस्वरूपेणावधारितेन ज्ञानेन शक्यं निरूपयितुमिति ज्ञातपदमतिक्रम्य संबंधपदं व्याचष्टे । संबंध इति । अन्यो
न्याता दात्म्यलक्षणा इत्यर्थः ॥ अत्रेदमुच्यते नैतेन संबंधाऽवगम्यगमकभावप्रयोजकः ॥ तदभावेपि कृत्तिकारोहिण्यु
दयादौ नान्तरीयकत्वे लिङ्गिभावदर्शनात् । अपि च कार्यमपि न कार्यत्वात्कारणं गमयति किं तर्हि तेन नियतत्वात् । अन्यथा
कार्यमस्तु कारणं च वानुमापयति स्यापि नकुंशकमतोदानसुतेन नियतस्तत्तोनुमापयतीति स एवानुमानाङ्गं स एव च व्याप्ति
शब्देनाभिधीयते यथाह ॥ संबंधो व्याप्तिरिष्टात्र लिंगधर्मस्य लिंगिना । अत्रानुमानव्यवहारे व्याप्तिलक्षणः ॥ संबंधो ग
मित्यर्थः ॥ ननु व्याप्तेस्संबंधत्वेन द्विष्ठत्वात् धूमवदग्नेरपि गमकत्वं स्यात् सत्यं तथापि व्याप्तिरूपलक्षणसंबंधिसमवेतेव
व्याप्तिर्नेसंयोगवदुभयसमवेता तथादर्शनात् । अतो न धूमवदग्नेरपि गमकत्वापत्तिः ॥ एतदप्याह ॥ व्याप्यस्य गम
कत्वं च व्यापकं गम्यमिष्यते । यो यस्य देशकालाभ्यां समो न्यूनोपि वा भवेत् । स व्याप्यो व्यापकस्तस्य समो वाप्यधिकोपि
वा ॥ ननु व्याप्यस्य गमकत्वे हिसाल्वमधर्मत्वगमपरदृष्टे हि वृक्षत्वादौ तद्धर्मत्वेन व्याप्तत्वात् ॥ व्याप्तेश्च दृशा

56
कु ५

मानायां॥ कश्चिद्धर्म्म॥ प्रयोजक॥ अस्मिन्सत्यपुनाभाव्यमिति शक्यानिरूप्यते। अन्ये पर प्रयुक्तानांव्याप्तीनामुपजीव
का॥ तैर्दृष्टैरपि नैवेष्टाव्याप्यकाशा वधारणेति एवं च सति अंशप्रकारस्य संयोगादिरूपसंबंधकीर्तने किममि प्रायमिति नवि
घ्न॥ एवं चांशग्रहणमनिकांशप्रकाम वृत्त्यापि नियतो ज्ञात इति संबंधविशेषणं कुर्वतोपमेवाभिप्राय॥ संयोगादिकीर्तनं
तु प्रायेणोवेरूप॥ संबंधस्तत्र तत्र पर्यवस्यतीत्यभिप्रायं कृत्रिकारोहि रापुदयादानांनुस्यरूपकृत एव गम्यगमकभाव इति
तानुपपत्ति॥ काविज्ञानात संबंधस्यैत्यनेन ज्ञात एव संबंधोनुमानांगमिति मिश्रचितं अमत्रिकृष्ट इत्यस्यार्थमाह ताद्रूप्येति॥ ता
द्रूप्येणातद्रूपव्यपेणाव्यपरिच्छिन्नस्यसन्निकृष्टस्य पक्षाभासत्वमिति भाव॥ तेयेन रूपेणानुमानुमित्स्यते तेनैव रूपेण रूपा
न्तरेणावातद्रूपवीतेनज्ञी व्रप्रमाणेन परिच्छिन्नोयोर्थ॥ स सन्निकृष्ट॥ तस्य पक्षं च व्यावर्तयितुमसन्निकृष्ट ग्रहणमित्यर्थ॥
तेन पक्षाभासाः प्रत्यक्षादिविरोधेन वार्त्तिककारेदर्शिनास्तत्रे वागमेन वाधाः तादृप्यं तद्रूपर्यपायाम परिच्छिन्न इत्येत
दाक्षिपति। नन्विति॥ मन्तान्तरेणातावद्र॥ समाधत्ते अत इति। एतस्मादेव चोद्याद्यारए तेद्रूपादेवगृहीतग्राहित्वमेवानुमा
नस्यागीकुर्वंतीति भाव॥ एतत्पक्षे सन्निकृष्ट ग्रहणस्य नार्हकागतिरत आह अप्रसन्निकृष्टेति। गृहीतग्राहित्वाद प्रा
माण्यमिति चेदत आह नत्याहातथापीति। चोदयति। अप्रेति। समाधत्ते प्रत्युत्पन्नेति॥ एतदेवोपपादयति संस्कारेति। न देतद्

रा०म०
५७

57

सपत्तिसोपपत्तिरिति। यावद्व्याप्यं व्यापकसहभावावगमे गृहीतया हि तत्त्वं स्यात्तत्त्वेवमसतीत्यर्थः॥ ननु यावद्धूममग्निस
हभावावगमाभावे कथं व्याप्तिनिश्चयस्तत्राह। महानसादिष्विति· न चैतद्युक्तं· भूयोदर्शनगम्यत्वाद्व्याप्तेः॥ यथा
हुः॥ भूयोदर्शनगम्या च व्याप्तिः॥ सामान्यधर्म्मयोः॥ ज्ञायते भेदहानेन क्वचिच्चापि विशेषयोः॥ सत्यमेवं तथाप्येक
त्रैव महानसादौ बहुशोऽवगताग्निसाहित्यस्य धूमस्यापरिदृष्टेषु देशकालेषु वह्निनियमावगतिर्भवति· एताव
देवं चानुमानाङ्गं· तदनेनलं यत्र यत्र धूमस्तत्र तत्राग्निरिति योऽवगमः॥ सोप्यानुमानिक एव परोक्षरूपत्वात्प्र
त्यक्षत्वं तु संविद्धि तु द्वंद्वात्परोक्षाभावात्· नियमज्ञानस्य चानग्नौ धूमदर्शने बाधकप्रत्ययो न चात्र तदस्ति· भ
विष्यतीति बाधकप्रत्ययाशंका रजतेपि रजतज्ञाने समाना वार्त्तिककृतोप्ययमेव श्लोकार्थोभिमतः॥ भ्रमत्वं दृष्टि
मात्रेणागमकः॥ सचारिणाद्यत्र भूयोदर्शनश्लोकार्थविवरणाय ननु तत्र तत्र प्रत्यक्षादिना साहित्यस्यावगंतुमशक्यत्वा-
त्कथं प्रमाणासंभवस्तत्राह· यथेति· न नु भूयोभिरपि दर्शनैस्तत्र तत्र साहित्यं गम्यते न तु सर्वत्र दर्शनानामसर्वेषां स्वविषय
पर्यवसानात्सर्वत्र न तत्प्रत्यक्षगम्यो हि सर्वत्र सहभाव· सजातीयवह्नि दुर्लभः॥ विपक्षादर्शनादपि प्रत्यासन्नेष्वेव विपक्षेषु परं भ रा०म०
भावोवगम्यते सर्वविपक्षव्यावृत्तिस्तु दुर्लभैवादृश्यादर्शनासिद्धेः तत्कथं नियमस्य सर्वदेशकालव्याप्तिरूपस्य भूयोदर्शनग ५७

ध्वत्वं एवं च स्वयमेवाचार्येणाशंकितं यथाहुः अत्र योपि प्रतिव्याप्यव्यापकस्यनदृश्यते। अनंतेन हि लभ्येत सप्रत्यक्षा
द्विजन्मता। तथानाभावेन विपक्षाद्धि हेत्वभावः प्रतीयत इति च सर्वविपक्षाभावो न प्रतीयत इत्यर्थः· इति प्रमाणसंभवो
न्यायरत्नमालायां प्रपंचित इत्यर्थः· हंत तर्ह्यनुमानासंभव एवमेत्याह दृष्टांतेति। एतदपि न्यायरत्नमालायां प्रपंचितं त
याहि। अत्र च समर्थनमुक्तं· तत्रास्यादृष्टिमात्रेण गमकः सहचारणाद् इति तत्रेति विपक्षे इत्यर्थः एतदुक्तं भवति मान
मसर्वविपक्षाभावो लिंगस्य सेत्स्यतीत्य अदर्शनं तु विपक्षेषु लिंगस्यास्त्येव तावता च सहचारी दृष्टो धूमादिः सहचारिणोग्न्या
देर्गमको भवति। यत्तु सहचारणाप्यलभ्यापि सर्वत्र दुर्लभं दृष्टमित्युक्तं तत्राप्युत्तरं दुर्लभं सहचारित्वं सर्वत्रेति यदुच्यते दृ
श्यमानामसर्वत्रच्छिन्नयोर्दृश्यते ध्रुवं। स्याद्धि त्वेमितदेशत्वादिति चास्यार्थः मानामसर्वत्र सहचारित्वं दर्शितच्छिन्नयो
स्तु प्रदेशयोरीषत्करं दर्शनं तावता चामात्ते व्यभिचारादर्शनं भवत्यनुमानमिति। तथा किं यदिः पुनस्त्याहित्य दर्शनैरनुमा
नं केचामेन तत्संचष्टे· यावद्धि दृश्यते तावद्भिरेव ननुसंख्यावकुंशकायते· येपि भूयोदर्शनसहायप्रत्यक्षगम्यं नियममा
हुः येपि सकृद्दर्शनेपि गृहीतं नियमं· उपाध्याशंकानिराकरणार्थं भूयोदर्शनसमर्थयन्ते तेपि नैव संचक्षते तेन यावयमपी
तिनकाश्चिद्विशेष इति॥ तत्रैवोक्तमिति न्यायरत्नमालायामेवेत्यर्थः· तथाहि न्याह भवतु नामैवं यथा दृष्टप्रदेशेषु साहि

राम० ५८

58

स्मृतिप्रमादेवानुमाने यस्त्वयं यत्र यत्र धूमस्तत्र तत्राग्निरिति भूयोदर्शनतोवगमः स कथं। नष्टः सो नास्ति न वा प्र
माणं। सर्वं वा सर्वदा दृष्टत्वेनज्ञायमानत्वात् तदयं कश्चित्प्रमाणेनार्भवतीति वक्तव्यम्। उच्यते। अनुमानिकोयम
गमः ज्ञातसंबंधस्योपजायमानत्वात्। परोक्षरूपत्वाच्च नैन्द्रियकः साक्षात्कारित्वाभावात् संविद्विरोधाच्च। धूमस्य हि पु
देशकालेष्वग्निनासाहित्यमुपलब्धवतोभवत्यनुमानं। अन्येष्वपि तावानागतव्यवहितविप्रकृष्टेषु सर्वएव धूमवत्त्वाग्निमत्त्वः ध
मवत्वात् परिदृश्यमानमहानसवदिति तेन यथालोकप्रमाणसामर्थ्यमनुसरणात् धूमध्वजरगतसाहित्यनियमादेव धूमतरेनु
मानमित्यनवद्यमिति॥ तत्त्वावसरः पुनर्गृहीतग्राहित्वशंकते नचितिः उत्तरग्रंथः स्पष्टार्थः। मतांतरोक्तं गृहीतग्राहित्वमिदा
नीमनुमानस्य निराचष्टे। यदीति। नचेति। लिंगदर्शनमेवात्र प्रत्युत्पन्नंकारणं। तस्य संबंधिदर्शनस्य तत्र संस्कारोद्बोधे कारणत्व
मुक्तमित्यर्थः तन्मतेनोपपादितं स्मृतित्वं निगमयति। तदेवमिति। संस्कारोद्बोधनद्वारा स्मृतिरूपवह्निज्ञानोत्पत्तेः सत्या
मित्यर्थः। अकल्पनइति। दोषस्यानुभवहेतुत्वाकल्पनसतीत्यर्थः। अत्रापि अनुमानेपि। लिंगस्य लिंगिज्ञानहेतुत्वाकल्प
नात् स्मृतिप्रमोषाद प्रामाण्यमेवस्यादित्यर्थः। चोदयति नचेति। प्रत्युत्पन्नकारणजत्वं दूषयति अनुमाहा इदमिति। तस्येति
ज्ञानतर्पस्येत्यर्थः। स्मरणाख्यापि वस्तुतः स्मरणात् यस्यापि वह्निज्ञानस्येत्यर्थः। स्मृतिप्रमोषत्वपरिहारं शंकते अथे राम० ५८

त्ति-न्नेदं रजतमिति व दत्र बाधकाभावान्न स्मृतिप्रमोषत्वमित्यर्थः४-परिहरति नेति। अन्यथेति॥ स्मृतिप्रमोषानंगीका
रे इत्यर्थः४- अनुमानस्य ग्रहीतग्राहित्वपक्षेऽप्युपपादितं स्मृतित्वं निगमयति तस्मादिति। ज्ञानस्य गृहीतग्राहित्वमित्या
ह कथं चेति- तस्येति प्रत्यक्षस्येत्यर्थः४- अनुमानस्यापि विद्यमानोपलंभनत्वं वक्तादौ दृष्टं अतः इंद्रियसंप्रयोगे सतीजिवि
शेषणांदयं। इत्त श्लेवमित्याह- किं चेति स्वमतं निगमयति तस्मादिति। एतदेवोपपादयितुमाह किमत्रेति। दृष्टान्तद्वयं स्प
ष्टार्थं- तत्र श्वार्थस्य स्वप्रतिपत्तिमात्रहेतुत्वेन शब्दप्रयोगानर्हत्वान्न दर्पेस्य परार्थानुमानाभिप्रायेणाह। यस्त्विति। लो
के साधनशब्दपत्यहेतुमात्रे प्रयोगदर्शनान्न ख्यातेः स्वार्थलक्षणं करोति येनेति। श्लोकं व्याचष्टे अक्षपादीया इति। उदाह
रणादिरत्र अवयवप्रयोगे भाष्यकारसंमतिमाह तथ्या चेति अत्र वार्तिककारैर्ग्ध्ने देशविशिष्टत्वेन चैतन्यलक्षणमि
त्यादिना ग्रंथेन देशविशिष्टत्वमष्टधा विकल्प्य देशविशिष्टस्याग्नेरनुमेयत्वं दूषयित्वा तस्माद्धर्म्मविशिष्टस्य धर्म्मिणः
स्यास्य मेयतेत्यनेन धर्म्मविशिष्टस्य धर्म्मिणोनुमेयत्वमुक्तं: तथा च न तस्यानुमेयत्वं विशेष्यस्यावधारितत्४ विशिष्टत्वेन
चाज्ञानात्तन्मात्रस्यानुमेयत्वेत्युक्तं तथा न च तस्यानुमेयत्वम्पदपि प्रमेयं तद्वार्तिक एवावगंतव्यं। प्रतिज्ञादोषा इति अ
ग्राह्यतानुशब्दाद४ प्रत्यक्षेणाविनुध्यते तेषामश्रावणत्वादिविरुद्धमनुमानं तत्रस्यादिना ग्रंथेन वार्त्तिके प्रपंचिता इत्य

राम०
५९
59

र्थः॥ ननु प्रत्यक्षादिविरोधेन स्वपक्षपबाधाख्यहेतुदोषएवायंन प्रतिज्ञादोषः॥ तत्स्वपक्षपबाधएवायंपक्षविपर्ययद्वारे
णानुपक्षदोषइत्युच्यते साध्याविकलत्वादयप्रदृष्टांतदोषाः॥ अप्रसिद्धविशेषणत्वाप्रसिद्धविशेष्यत्वाप्रसिद्धोभयत्वा
दिदोषाश्चनिरालंबनवाद वार्त्तिकेप्रपंचिताइत्यर्थः॥ एवमसन्निकृष्टग्रहणानिरस्ताः॥ प्रतिज्ञादोषादयोवार्त्तिकेए
वप्रपंचितत्वान्नप्रदर्शिताः॥ संप्रतिहेत्वाभासान्प्रपंचयन्नेकदेशादर्शनादित्यनेन दर्शनशब्देननिश्चयवाचि
मानिरस्तमसिद्धतावदर्शयति।तत्रेति॥ वादिप्रतिवादिनोरेकस्य द्वयोर्वासंशयाज्ञानविपर्यया यस्मिन्सोसिद्धइतिना
व॥ अत्रचोदयतिनचेति। परिहरतिएकेति॥ उदयमुद्रयोः॥ परस्परसंबंधानावेपिउदयत्वद्वारेककालसंबंधारत
त्कालीनदृष्टानुमापकाचादद्दोषइत्यर्थः॥ पुनश्चोदयति॥ यदेति॥ तदा चंद्रनभोमध्यस्थितेरतिक्रांतसमुद्रदृष्टेश्चै
ककालत्वाभावादित्यर्थः॥ परिहरतितत्रापीति॥ चंद्रनभोमध्यस्थितिरप्यतिक्रांतामुदयकालीनामेवदृष्टिमनुमापयति
चंद्रद्वारापरंपरासंबंधादित्यर्थः॥ दर्शितमिति॥ यस्यपादद्वशास्येत्यादिना॥ असिद्धांतरमुदाहरतिगोशब्द इति॥ ननुयः॥ आ
नादिमद्वचमोनभवति स गोशब्दोपिनभवतियथा घटशब्दादिरितिव्यतिरेकस्य सत्वान्नायं दोषः॥ इत्याशंक्यास्वाभिप्रेतं राम०
व्यतिरेकशब्दार्थविवृणोति।नहीति॥ पक्षस्यैवहेतुत्वापत्तिरत्र दोषः॥ आश्रयासिद्धिमुदाहरतिनित्यमितिनचाश्रयस्या ५९

सिद्ध्याहेतोरसिद्धि॥ कथं स्यात् उच्यते· धर्म्मिधर्म्मत्वप्रागल्भ्यमारास्यैवहि हेतुता असिद्धे धर्म्मिणि कथं हेतोस्तद्धर्म्मता भवेत्
ज्ञातसंबंधस्येत्यनेनैकान्तिकविरुद्धयोः संशयविपर्ययजनकयो॥ हेत्वाभासत्वं दर्शितं तत्रानैकान्तिकं तावदाह· अनैकान्ति
कत्वमिति· सप्रतिसाधनत्वनिराकरणपरं मतान्तरं दूषयितुमनुवदन्ति कश्चिदिति। दूषयति स इति नित्यसंशयापादकत्वेन स
प्रतिसाधननिराकरणे सव्यभिचारोपि निराकृत॥ स्यान्न संशयहेतुत्वाभावे ऽनैकान्तिकत्वासंभवादिति भाव॥ स व्यभिचारिणि
विशेषसंशकतैसत्यपीति· इष्टापत्त्यभिप्रायेणाशंकते· तथेति· सप्रतिसाधने प्रमाणान्तरेण निर्णये सतीत्यर्थ॥· अनुत्पव
लत्वे सप्रतिसाधनत्वाभावइतिभाव॥· अत्र भाष्यकारसम्मतिमाह· तथा चेति· होमेनापि फलवाता भवितव्यमित्यस्य इ
ति प्रतिसाधनेऽनुवन् इति दर्शयतीति संबंध॥ प्रतिसाधनस्वरूपं दर्शयति उपरत इति। हस्तादिव्यापाररूपैककर्मण्यु
परते द्रव्यारंभत्वादीनां तन्तुसंयोगानां च पटादिरूपफलदृष्टमित्यर्थ॥· असाधारणस्यापि कोवेदनैकान्तिकत्वमाह
स्तन्निराकरणार्थमाह असाधारणमितिए तस्य चानन्तरमेव वार्त्तिकविरोधं दर्शयिष्याम॥· ननु साधारणस्यापि कथं
संशयहेतुत्वं नतविन्नित्यानित्यबुद्धिलक्षयोत्पादकत्वेन तावत्पागके चाप्यनियतत्वात्· नियमलक्षणेनैव संबंधेनैवात
बुद्धिजनकत्वसंभवात्· उभाभ्यां नियतत्वे चोभयत्र निश्चायकत्वापातात्· नापि कोटिद्वयसंस्पर्शैकविज्ञानजनकत्वेन

रा०म०
६०

60

संशयहेतुत्वं त्वर्थसंदेहाभावेन तेनाप्युपपन्नत्वात्। अपक्षे वादिनोः संदेहाभावादित्याशंकां निराकर्तुमाह सा
धारणमिति। प्रसंगात्सत्प्रतिसाधनस्यापि पूर्वोक्तसंशयहेतुत्वं स्यादपतितमिति अवमेव च विरुद्धाव्यभिचारी। ध
र्म्यन्तरे त्वविरुद्धार्थव्याप्तहेतुद्वयमेकत्रैकदेशिनि दृश्यमानो विरुद्धाव्यभिचारी त्युच्यते। निगमयति इतीति। अत्र
वार्तिककारैरयं संशयहेतुत्वं तत्साध्येतदभावव्याप्याव्याहतत्वरूपव च द्वौ विरुद्धार्थसंवद्धौ पावेकत्रैकदेशिनीत्यनेन
साधारणासाधारणविरुद्धाव्यभिचारिभेदात्त्रिविधो नैवं तंतिको दर्शितः। तत्र साधारणोदाहरणानि प्रदर्श्यानन्तरं नित्या
मूर्तकंथवत्त्वेन स्याद साधारणस्त्वयमित्यसाधारणोदाहरणमुक्तं न च साधारणधर्मोपलब्धौ संशय एव नोपजायत इ
त्याशंक्य निश्चये कोगत्वेकस्यादेव संशयकारणमित्युक्तं। नतोपत्त्रा प्रत्यक्षतावायोरूपत्वेन साध्यते। स्पर्शत्वप्रत्य
क्षताचासौ विरुद्धाव्यभिचारी नेति तदुदाहरणमुक्तं। अनुद्भाग्रंथकारस्य पक्षत्वाभासवर्णने। वातानव्यतिरेकेणाकिमर्थं
नन्वेदं स्पृहं। बाधकाख्यं तृतीयं हेत्वाभासं दर्शयति। नयेति प्रतिज्ञातार्थं बाधमानो बाधक एव विरुद्धशब्देनोक्त इत्यर्थः। रा०म०
प्रतिज्ञार्थस्य हेतुना बाधा यायो विरुद्धः स षड्विधः। इत्यर्थः। षड्विधत्वं विवृणोति। धर्म्मीति। धर्म्मिस्वरूपबाधो धर्म्मिविशेषस्वा ६०
धर्मत्वपाधर्म्मिस्वरूपबाधो धर्म्मिविशेषबाधश्च। तथोभयोः स्वरूपबाध उभयविशेषबाधश्चेति षोढेत्यर्थः। प्रतिज्ञा

र्थं बाधाविशेषादेक एवभेद इत्याह· एक इति। सर्वेष्वपि भेदेषु साध्यविपर्ययसाधनस्याविशेषादेवप्रकार इत्यर्थः॥
एतेन धर्मस्वरूपबाधाद्यो भेदाः तत्फलेष्टकृतकत्वस्य धर्मबाधादिदुष्टत्वेत्यादिना ग्रन्थेन वार्त्तिककारेण दर्शितास्तत्रैवा
वगन्तव्या ग्रन्थकारोऽपि किंचित्स्वयं चयिष्यति॥ द्वैविध्यमेवाह धर्मेति। ननु चातुर्विध्यवादिमते धर्मिस्वरूपतद्विशेषबाध
स्यापि दूषणत्वान्न द्वैविध्यं नोदाहृतमत आह नहीति। दूषणमपि मुक्तमुदाहरणं नावदाहृतमपाहीति· द्रव्यातिरिक्त इत्यु
पलक्षणाद्द्रव्यादिपंचकातिरिक्त इति साधर्मे धर्मः॥ अत्र प्रयोगे धर्मिस्वरूपविपरीतसाधनोऽयं हेतुः॥ तथा संयोगप्र
तिद्रव्यभेदेन व्याप्तमिह प्रत्ययहेतुत्वदृष्टं· समवायस्याभिभेदमापादयन्नतस्य विशेषसत्तावदेकत्ववैशेषिकाभिमतं
बाधेत अतो विशेषविरुद्धोऽयं हेतुरिति समस्तानामर्थः॥ दूषणान्तरमाहेति। न च समवायत्वेन व्याप्तत्वात् समवायस्वरूपबा
धितत्वेत्याह· विरोधे हीति· आश्रयाश्रयिणोर्विरोधासंभवादित्यर्थः॥ धर्मबाधं शंकते न चेति· अभेदाभिप्रायेणासमाधत्ते य
दीति॥ दूषणमुपसंहरति अतस्मादिति। उक्तमेवार्थं स्मारयति तत्रेति। कथं तर्हि वार्त्तिके सदूषणोदाहरणं तत्राह धर्मे
तीति। तद्बाधस्य कथंचिद्धर्मिबाधपर्यवसानादुदाहरणमिति भावः॥ नन्वितीति वार्त्तिककारस्योपेक्षापमन्तेनोपन्यासादद
षणत्वमभिप्रेतमिति भावः॥ अदूषणत्वमेवोपपादयति· यदीति· न त्वेतत्साधयन्नस्वाभिप्रेतं समवायैकत्वं हीयत इति

चेत्. तत्राह नहीति । — — — पर्वोक्तस्वाभिमतं द्वैविध्यमुपसंहरति तस्मादिति. आद्यमुदाहरति तत्रेति । धर्म्मविशेषवाधमुदाह
रति यत्त्विति । पर्वं च संवंधग्रहणादर्थं च तत्रासिध्यन्तीस्वरूपेणैवार्थेन सिध्यति न स्वरूपातिरिक्तमर्थमालंबनत्वेनापि प्रत्येणाय
ः प्रयुक्तेन प्रत्युच्यते धर्म्मविशेषविपर्ययसाधनोपहेतुः तत्त्वाहि । संवंधग्रहणानन्तरं स्वरूपातिरिक्तार्थवोधनेन सहवि
भक्तिमत्त्वस्य व्याप्तिदर्शनात्तद्दृष्टान्तानुसारेण प्रागपि स्वरूपातिरिक्तार्थवोधनमेव साधयेत् प्रति प्रयोगश्च प्राकूसंवंध
ग्रहणात्तस्वरूपार्थत्वं विभक्तिमत्वात् पश्चाद्वदिति समस्तार्थः. एतद्देवोपपादयति पश्चादिति । एतदुपपादनार्थं सामान्य
न्यायमाह सर्वत्रेति । तादृशस्य साध्यस्य पक्षे साधनासंभवे सति. साध्यमेव न साधयतीत्यत्रिमेणाच्च यः अन्संभवेकारण
प्रमाणान्तरविरोधादिति । साध्यासाधने हेतुः निर्विशेषस्येत्यादिः निर्विशेषत्वमेव कथमित्याकांक्षायां स्वयमेव वाधमान
इति हेतुगर्भं विशेषणं. यस्मात्तद्विपरीतसाध्यगतं विशेषमेव वाधते. तस्मान्निर्विशेषं साध्यमित्यर्थः. वाधकत्वे हेतुः निय
मवत्त्वादिति अन्येन सहनियतत्वात् तद्विपरीतं वाधनमित्यर्थः. अत्र दृष्टान्तमाह. यथेति. यथा. उत्पत्तिमत्त्वदेहांकुरादीनां
चेतनकर्तृकत्वसाधनायोच्यमानं चेतनकर्तृकत्वमेव न साधयतीति संवंधः कथं न साधयतीत्यत्राह विधेति । शरीरस्य शरी
रवाद्विविधस्येतनोद्दृष्टस्यांकुरादौ तद्विविधस्याप्यसंभवात् । अशरीरः कर्ताभविष्यतीति चेत्तत्राह तेनैवेति । अंकुरादिर्नाश

रीरकर्त्तृक४उत्पत्तिमत्वा द्घटादिवदितिनिवारणमादित्यर्थ४· फलितमाहतेनेति· तत४किमतआह· इतीति· धर्म्मासमवाय
स्तद्विशेषएकत्वंतद्वाधस्यसाध्याविरोधित्वंपूर्वोक्तमेवानुसंधेयं· प्रस्तुतेति। द्रव्यातिरिक्त४समवायरूपेवेसाधयन्तोवादिनो
नैतद्दूषणंसाध्यासिद्धेरप्राप्तहत्वात्र प्रस्तुतविशेषवाधंहे· त्वाभासत्वेनोद्भावयत४प्रतिवादिनएवदूषणंभवति। अनिग्रहेनि
ग्रहाभियोगात्रनिरनुयोज्यानुयोगनिग्रहस्थानापत्ते४हेत्वाभासस्यापिनिग्रहस्थानत्वादित्यर्थ४। मतान्तरमनुवदति। य
स्त्विति· इतिवदतीत्यनेनसंवंध४तद्रहितंमहानसीयत्वादिविशेषरहितं· कथंतर्हि पर्वतीयवह्निसिद्धिरतआह· तच्चेति। सामा
न्यस्यविशेषमन्तरेणासिद्धेर्म्महानसीयत्वादिविशेषस्यवाधात्र पर्वतीयत्वादिविशेषान्तरमाक्षिप्यसिध्यतीत्यर्थ४। तस्य दो
तद्दूषयति तस्येति। हेतुदूषणामुपसंहरतितस्मादिति· हेत्वाभासान्व्यदर्श्यसंप्रतिज्ञातसंवंधपरव्यावर्तितानेवदृष्टान्तदो
षानुद्दर्शयितुंदृष्टान्तवचनंप्रस्तौति। उदाहरणमितिसाधनस्यसाध्येनसहव्याप्तिप्रतिपादनायदृष्टान्तद्वयंप्रयोक्तव्यमि
त्यर्थ४। साधर्म्म्यदृष्टान्तंलक्षयतिसाधर्म्म्यमिति। यदुद्देशेनयदुपादीयते तस्यतेनव्याप्ति४कथिताभवतीतिभाव४उद्दिश्य
मानंचयद्धेत्तयुक्तंप्रथमंप्रयोक्तव्यंउपादीयमानंचतद्धेत्तैवकारात्प्रायप्रक्षारः· यथा कृ४· यद्धेत्तयोगः प्राधम्यामित्याद्यु
द्देश्यलक्षणं। तद्धेत्तमेवकारप्रक्षस्यादुपादेयलक्षणंननुयथानयावारचितंवाक्यं चक्रुार्चिवक्षितंप्रतिपादयत्येव

रांम० ६२ किरंचनाविशेषेणेरतिचेत्‌· नशब्दानांश्रवणानुसारेणार्थावबोधकत्वात्‌· नाहिशब्दाःवक्तुरभिप्रायमनुरुध्यन्ते· अतोव
रूपमात्रवृत्तं व्याप्येवरचनाविशेषः॥ यत्रयत्रधूमस्तत्रतत्राग्निरित्युक्तेसाधर्म्यमात्रादेवाग्निनाधूमस्यव्याप्तिरवगताकिंवैध
र्म्येणोत्याभिप्रायवानाह सम्यगिति। अर्थाद्वैधर्म्यस्यज्ञानंशब्दपलादितिभावः॥ अथवासम्यक्प्रयुक्तेसाधर्म्येप्रयु
62 क्तोत्याविपक्षव्यतिरेकेन प्रतिपद्यते· अवगतेपिवासपक्षान्वयेविपक्षव्यतिरेकाकांक्षायांसाधर्म्येनापेक्षते
तरदाविपक्षव्यतिरेकासिद्ध्येवैधर्म्यमपिप्रयोक्तव्यमित्याभिप्रायेणाह यदेति· कथंचतत्प्रयोक्तव्यमत आ
ह·लिंगप्रभाववामिति· तदुक्तं व्याप्यव्यापकभावोहिभावयोर्यादृगिष्यतेतयोरभावयोस्तस्माद्विपरीतः॥ प्रतीयते·न
नुतदावैधर्म्यादेवव्यतिरेकसिद्धेः॥ किंसाधर्म्येणमेवंअसाधारणोविपक्षव्यतिरेकदर्शनात्‌ तन्निवृत्त्येसपक्षान्वयप्र
तिपत्तिफलत्वेनसाधर्म्यप्रयोगात्‌। वस्तुतस्तुसाधारणेचपदर्शनादसाधारणेचव्यतिरेकदर्शनादुभयनिवृत्त्यर्थं
द्व्यमप्युपेक्षितव्यं ननुयथाप्रुक्तं॥ प॥ इत्युक्तेनीलादिव्यवच्छेदेनैवप्रुक्तादीनांविशेषणत्वं उपादीयमानस्य
प्रसक्तिविरोधिव्यवच्छेदपरत्वात्‌ तथापर्वतोग्निमानित्युक्तेऽन्यस्यभावस्यैवनिवृत्तिर्भवति नान्यस्येतितवैधर्म्यमपि रांम०
प्रयोक्तव्यः मैवंप्रुक्लादिवदत्रवक्तुरनिश्चितत्वात्‌ निश्चितत्वेवासाध्यत्वानुपपत्तेः॥ अतस्तन्निश्चयार्थंवैधर्म्यस्या ६२

ष्प२

स्युपयोग इति· न च भावसाधनकेनैव रूपतात्सीन्याशंक्याह पत्रेति जत्तश्चैजत् दपि निरस्तमित्याह नेनेति॥ विधिरूपस्या
पि वैधर्म्यस्य दर्शनादित्यर्थः॥ ननु हेत्वाभासवदुदाहरणालक्षणारहिता दृष्टांताभासाश्च प्रयोगाय प्रदर्शनीया
स्तत्राह साधर्म्याभासाश्चेति॥ नित्यो ध्वनिरमूर्तत्वात् त्वात्कर्मवत्परमाणुवदित्यादिवार्त्तिके दृष्टव्याः॥ अनति प्रयोजनत्वाद्धे
त्वाभासमं तत्वाच्चमपानात्र प्रदर्शिता इति भाव॥ ४३ कं चान्यत्र साधारणो विनुद्धो वा दृष्टांते साध्यवर्जिते असाधारणानतो
हेतोस्तस्मिन्साध्यवर्जितइत्यादि॥ नित्य॥ शब्दोऽमूर्तत्वात्कर्मवदिति प्रयोजे साध्यविकलो दृष्टांत॥ परमाणुवदिति सा
धनविकल॥ घटवदित्युभयविकल॥ आकाशस्य च दृष्टांतत्वापन्नत्वमित्यत्वेसन्यपि कर्मादौ नित्यत्वाभावेप्यमूर्तत्व
दर्शनात् व्याप्तिग्रह यत्रेत्यादि तत्रैव दृष्टं व्यं तच्चा· यत्राप्यर्थस्य च अत्रत्व ह्याभ्यामेकेन बाध वेद्या। यदमित्यं तु तन्मूर्तमणुव
द्विद्वित्रवत्खवदिरित्यादिना वैधर्म्याभासा दर्शितास्तत्रैवावगन्तव्या॥ अत्र भाष्यं· तत्तु द्विविधं प्रत्यक्षतो दृष्टसंबंधं सामान्यतो दृ
ष्टसंबंधं च प्रत्यक्षतो दृष्टसंबंधं यथा धूमाकृतिदर्शनादग्न्याकृतिविज्ञानं सामान्यतो दृष्टसंबंधं यथा देवदत्तस्य गति
पूर्विकां देशान्तरप्राप्तिमुपलभ्यादित्यगतिस्मरणमिति॥ अत्र यथैव धूमत्वाग्नित्वयो॥ प्रत्यक्षत्वेन महानसादौ प्रत्य
क्षो दृष्ट॥ संबंधस्तथैव देवदत्तादौ चलतीति प्रत्ययालम्बनत्वेन गमनस्य प्रत्यक्षत्वाद्देशान्तरप्राप्त्या सह प्रत्यक्षदृष्ट

रा०म०
६३
63

एवसंबंधइति द्वैविध्यवचनमनुपपन्नं आदित्येनुमेयत्वाद प्रत्यक्षत्वेनेति चेत्। एतदपि पर्वतादावग्नित्वस्याप्यनुमेय
त्वात्तुल्यं। अथ यदेवदत्तादौ गतिप्राप्त्यो४ सामान्यत४ प्रत्यक्षेण संबंधमुपलभ्यादित्ये देशांतरप्राप्तिदर्शनेन गत्यनु
मानं सामान्यतो दृष्टसंबंधमित्युच्यते एतदप्यग्निधूमयोर्महानसादौ सामान्यत एव संबंधदर्शनाद्विशिष्टमिति द्वैवि
ध्याभाव इत्याशंकानिराकर्तुमाह तत्रु द्विविधमिति। ननु चलतीति प्रत्यक्षमेव क्रियाख्यरूपं नेत्याह। नहीति। चल
तीति प्रत्ययस्य संयोगविभागमात्रालंबनत्वमिति भाव४· अन्यथासिद्धिं शंकते नचेति· तदाधारमिति द्रव्यमेव संयोगविभा
गकारणं ननु तदतिरिक्तं। क्रियेत्यर्थ४· प्रसिद्धकुप्रकारेण परित्यागेनाप्रसिद्धकल्पनान्न४ प्रामाणिकेति भाव४· परि
हरति नेति प्रागपि सत्त्वाद्वा आगंतुककारणं द्रव्यमित्यर्थ४· आश्रयस्य समवायिकारणत्वे प्यसमवायिकारणं क्रिया
भविष्यतीति भाव४· क्षणिकत्वाभ्युपगमे न द्रव्यस्याप्यागंतुकत्वमिति शंकते नचेति· ननु द्रव्याणामेकरूपत्वे कथं तिष्ठ
ति चलतीति प्रतीतिवैलक्षण्यमत आह· नघ दिति। शंकानिराकरणं प्रतिजानीते तदिदमिति· स्थिरत्वे वा कथं क्रियासि
द्धिरत आह· ततइति आश्रय द्रव्यमात्रेणाकादाचित्कयो४ संयोगविभागयोरनुपपत्तेरित्यर्थ४· क्रियानुमानं चैवं॥ विमतौ
संयोगविभागौ प्रत्युत्पन्नकारणजौ कादाचित्ककार्यत्वात् दानुद्वैधीभाववशसहिकुठारदानुसंयोगविभागजन्य४ पक्षेनु

रा०म०
६३

क्रियैव प्रत्युत्पन्नकारणमिति। तदेतद्दूषयति न युक्तमिति· स एव प्रयत्नविशेष एव दृष्टं कारणमित्यर्थः· एतेनार्थान्तर
त्वमनुमानेन दर्शितं· असमवायिकारणं कर्मेति चेन्न· तत्राह तद्दृष्टिबहिरंगत्वादकारणत्वं शंकते। नन्विति। पटः का
र्यमिति संबंधः अनेवंविधे अस्वाश्रये अन्याश्रयसमवेते चेत्यर्थः· कारणान्तरं कर्मारब्धं अतो न प्रयत्नवदात्मसंयो
गतार्थान्तरत्वमिति भावः। एवं च सति यदेकार्थसमवायिनौ संयोगविभागौ यस्मिन्नसति नियमेन नदुत्पत्तिस्तत्कर्मेति
नार्थान्तरत्वमित्युक्तं भवति परिहरति नेति· कथं चन अन्याश्रय एव पटमारभते तत्राह· पटस्येति संयोगस्य स्वाश्रये तत्तन्तु
ष्वेव द्रुततरं तत्त्वाश्रितं यः। नारंभकत्वमिति भावः· इतश्चैवमित्याहः किं चेति। तेष्वश्रवयवेषु· अस्वाश्रयेषु न्यासंयोगा
नाश्रयेषु· स्वाश्रयासमवेतत्वविरहेणेति न हीति· तेऽवयवाः इतोऽप्येवमित्याह। किं चेति· यदि संयुक्तसंयोगात्तत्रोऽपि पति
ः तत्रत्यत्रापि तथेत्याह· एवमिति। एतेन। अनेवंविधे व्योम्नि कथं संयोगमारभत इति यदुक्तं तत्परिहृतं· इतोऽपि न कल्पनेत्याह·
किं चेति· आकाशे परिस्पंदासंभवान्न विहंगस्थेन तत्र संयोगविभागौ वाय्वौ तच्च न संभवतीत्याह न हीति विहंगेनु क्रियायाः
प्रत्यक्षत्वादेव नानुमानमिति भावः। अतातातशयः एष्ठति किमिति· आशयमुद्घाटयति अस्तीति अत्र चोदयति न चेति
परिहरति दृश्यत इति दूषणमुपसंहरति तस्मादिति। संप्रतिपत्त्यावार्तिकं समाधत्ते किं त्विति। विषयप्रपंचार्थमाप्यमि

तंम० ६४ तिपर्वैराग्यं च पं॰ यत्र विशेषयोरेव प्रत्यक्षेण संबंधो गृह्यते तद्विशेषविषयं प्रत्यक्षतो दृष्टसंबंधमित्युच्यते यत्र च सामान्ययो
ः प्रत्यक्षेण संबंधो गृह्यते तत्सामान्यविषयं सामान्यतो दृष्टमित्युच्यत इत्यर्थः॰ तथा हि यस्मिन्नेव धर्मिणि गोमये धूमाग्निवि
शेषतज्जन्यसूक्ष्मविशेषयोः संबंधग्रहणं तस्मिन्नेव कालांतरे धूमविशेषदर्शनेन पुनः संदिह्यमानसद्भावस्य यदग्नेरनुमानं
65 तत्प्रत्यक्षदृष्टसंबंधं भाष्यकारस्याभिप्रेतमिति। ननु प्रत्यक्षावगताग्निविशेषविषयस्यानुमानस्य कथं प्रामाण्यं॰ पूर्व
बोधात्कालांतराधिक्येनेति ब्रूमः॰ ननु यदि विशेषयोरेवानुमानं कथं तर्हि भाष्ये धूमाकृतिदर्शनादग्न्याकृतिग्रहणं। आ
कृत्योरेव हेतुसाध्यव्यवस्थापर्यवसानादिति ब्रूमः॰ तर्हि इदमेव विशेषानवच्छिन्नसामान्यतोदृष्टोदाहरणं दातव्यं किमा
दित्योदाहरणेनास्त्यं तथापि विशेषतो दृष्टासंकीर्णमिति॰ संदिग्धसामान्यतो दृष्टप्रदर्शनार्थमादित्योदाहरणं प्रसंगागत
तांतरनिराकरणं दर्शयति येपीति। अनेनेत्यस्यार्थं विवृणोति। अभयोरिति। एतदेव दर्शयति यत्रेति॰ ननु सामान्यस्यावस्तु
त्वेन प्रत्यक्षागोचरत्वात्कथं धूमाकृतिदर्शनादग्न्याकृतिज्ञाने प्रत्यक्षदृष्टसंबंधतानैयदोषः॰ सामान्यस्य प्रत्यक्षविषयत्व
वस्तुत्वयोः प्रामाणिकत्वात्॰ तथा हि॰ क्षमादिविज्ञानं न वस्त्वालंबनं अभावान्यत्वे सति प्रमाणत्वात् स्वार्थश्रोत्रबुद्धिवत्॰ तथा तंम०
सामान्यं वस्तु प्रत्यक्षग्राह्यं च तत्॰ अभावान्यत्वे सति प्रमेयत्वात् स्वलक्षणवदिति॰ अनुमानेकसमधिगम्येनु सामान्ये विशे ६४

अनुगमाभावात्·सामान्यमेवसर्वत्रलिंगंतत्रलिंगमतःसामान्यमेवंप्रत्यक्षेप्यग्रहणायपुनरन्यापेक्षणादनवस्थापत्तेर्वानु
मानव्यवहारोच्छेदप्रसंगइत्यलंप्रसंगेनवस्तुतस्तुसर्वत्रसामान्यविषयमेवप्रत्यक्षंगवादिस्वलक्षणस्यावयवित्वेनस्वावय
वापेक्षयासामान्यरूपत्वात्·अयदृश्यमपद्व्यणुकरूपादौनामेवप्रत्यक्षत्वमुच्यतेतदपिरूपविशेषात्नीलपीतादीरूपेक्षया
सामान्यमेवएवसर्वमपिवस्तुस्वस्वविशेषापेक्षयासामान्यमेवद्व्यणुकस्यापिपरमाणुद्वयसाधारणत्वात्सामान्यरूपते
तिनक्वचिद्विशेषविषयताप्रत्यक्षस्ययथाद्व्यणुकरूपादयोपिसामान्यंसर्वत्रनीलाद्यपेक्षयास्वविशेषानपेक्ष्यापितनीलादी
नांसमानत्वात्तेचापितावत्सामान्यंयावत्स्फुटंपरमाणवः।द्व्यणुकस्यापियद्रूपंतत्तुसाधारणंद्वयोः।अयथैवदन्तोयमि
तिप्रत्यक्षस्यपरमाणवएवालंवनंतेचान्त्याविशेषाएवेतिविशेषविषयताप्रत्यक्षस्य·तत्रोच्यते·किंपरमाणवःसमुदिता
ःप्रत्येकंवालंवनंत्यःस्थूलप्रतिभासाद्यनापत्तःसमुदायस्यैकरूपत्वेनघटशरावादिबुद्धिभेदपवैलक्षण्याभावप्रसंगा
त्·परस्परभिन्नानांचपरमाणूनामाभिन्नसंवेदनग्राह्यत्वानुपपत्तेःसमुदायव्यतिरेकेणसमुदायस्यानेकाकारत्वा·किंचव्यव
हाराविसंवादित्वात्प्रत्यक्षानुमानयोःप्रामाण्यंचात्यैःपरमाणुभिर्व्यवहारःसंभवत्यतीन्द्रियत्वात्·तस्मादेवदन्तोयमि
तिविज्ञानेपरमाणुकार्यभेदयव्याख्यमभिन्नंस्थूलंमालंबते·तथाप्रतिभासात्·तच्चस्वाश्रयेषुव्यासज्यवर्तमानत्वात्सामा

रामo ६५ 65

न्यमेवेति सामान्यविषयता प्रत्यक्षस्येति ॥ असाधारणविषयत्वेपि वा प्रत्यक्षस्याव्यमाने धर्माकृते प्रत्यक्षद्रष्टृज्ञानैवापेति ॥ म
त्रापेक्षयाक्षमत्वस्यापि विशेषरूपत्वात् ॥ अथ सामान्यमेवं प्रतिभासाभावेन सामान्यस्याग्रहणमित्युच्यते तत्र्यं साधारणमि
त्येवं प्रतिभासाभावेन स्वलक्षणस्याप्यग्रहणप्रसंगात् ॥ यथाह ॥ सत्तादिसामान्यमपेक्ष्य सद्वै गोत्वाद्यसाधारणतामुपैति ॥ त
स्मादसाधारणमक्षगम्यं वदन्ते सामान्यमपकुर्वीत ॥ १ ॥ सामान्यरूपेण न गृह्यते वेद् ॥ किं वास्य साधारणत्व हि तत्रायद्धस्तु
लोक ॥ प्रतिपद्यते तत्र द्विधापि तच्छक्यत एव वक्तुं ॥ ॥ इत्यनुमानेकादश ॥ ॥ इदानीं क्रमप्राप्तशब्दप्रमाणनिरूपणमा
रभते ॥ शास्त्रमिति ॥ ननु प्रत्यक्षलक्षणव्यभिचारशंकानिवृत्तये शब्दमात्रस्यैवात्र लक्षणं कर्तव्यं न तद्विशेषस्य शास्त्रस्य न च
सामान्यलक्षणं विना विशेषलक्षणं कर्तुमपि शक्यते अतिव्यापकं चेतल्लक्षणं शब्दमात्रसाधारणत्वात् ॥ तथा हि विज्ञाता
द्वादसन्निकृष्टेर्थे यद्विज्ञानमिति शब्दमात्रस्यैवैतल्लक्षणं न तु तद्विशेषस्य शास्त्रस्य ॥ शास्त्रलक्षणं तु प्रवृत्तिर्वा निवृत्तिर्वा नि
त्येन कृतकेन वा पुंसा येनोपदिश्यते तच्छास्त्रमभिधीयत इति ॥ वचेतस्मिन्नपि लक्षणे स्वरूपप्रतिपादकस्य सोरोदीदित्येव
मादेः शास्त्रत्वं स्यात् ॥ नैवं ॥ विध्येकवाक्यतयातेषामपि शास्त्रत्वोपपत्तेः ॥ ननु विध्यंगत्वेपि प्रवर्तकत्वाभावात्कथं शास्त्रत्वं प्रत्य रामo ६५
क्षस्यैव प्रवर्तकत्वात् ॥ पदस्यापि शास्त्रत्वं न सिध्यति मितरां विध्युद्देशवर्तिनोपदांतराणां दूरेर्थवादानां शास्त्रत्वमिति नैष दोषः ॥

येन हि पुरुषः प्रवर्त्यते तत् प्रवर्तकं · स च श्रेयः पूरितायां स प्ररोचनायां भावनायां प्रवर्त्तते · तादृशी च सा अर्थवादकेन वाक्येन
समर्प्यत इति तदुक्तस्यैव प्रत्ययस्यैव शास्त्रत्वं · अत्रोच्यते अपरीक्षाव्याजेनापि शब्दविशेषस्य शास्त्रस्यैव लक्षणं वक्तुमुचि
तं चोदनोपदेशशब्दाभ्यां तस्यैव प्रस्तुतत्वात् वेदोपयोगि लेन च लक्षणानि कर्त्तव्यानि शास्त्रलक्षणं च वेदोपयोगि तु शब्दस्य ल
क्षणं न हि लौकिकवाक्यलक्षणं वेदप्रामाण्ये तदर्थविचारे वा उपयुज्यते प्रत्ययमात्रस्य तु शास्त्रस्वरूपावधारणद्वारा तदर्थवि
चारेस्तूपयोगः शास्त्रावगतो हि तदर्थावधारणं भवति । अनुमानादेरपि · विश्वजिता यजेत स्वर्गकामः प्रकृतिवदिति प्रकृतिवि
शेषवद्गतांगोपत्तावधारणेस्तूपयोग इति । सामान्यलक्षणेन नैवार्थो सिध्यतीति टथञ्चोक्तः । यदा हि प्रवर्त्तकवाक्यं शास्त्र
मित्युक्तं तदार्थोस्य प्रवर्त्तकविशेषणरहितं वाक्यमात्रं शाब्दमित्युक्तं भवति नाव्याप्तिव्यापकं · शब्दशब्देन चोदनाया एवाभिधाना
द · तस्या एव चोदनासूत्रे प्रकृतत्वात् अर्थशब्देनापि धर्माधर्मयोरभिधानं · ततश्चायमर्थः · विधायकशब्दविज्ञानादसन्निकृ
ष्टार्थधर्माधर्मलक्षणो विज्ञानं शास्त्रमिति । ग्रन्थकारस्तु विशेषलक्षणस्यान्तर्गतिं मत्वा सामान्यलक्षणत्वेनैव व्याचष्टे विज्ञानादि
ति अयमाशयः यदि लोकवेदसाधारण्येनैव शाब्दं लक्षणं तेनानुमानात् प्रमाणान्तरत्वेन निरूप्येत न ह्येवं वेदप्रामाण्यं सिध्यति नाप्य
चति । यथाहुः · तस्माल्लक्षणभेदेन यदि शब्दप्रमाणता । समालोके च वेदेवसिद्धा वेदप्रमाणतेति विभजते तच्चेति · न चोल्कादि

शा०
६६

66

मिरस्यानुमानेन्तर्भावांगीकारादनुमानलक्षणेनैव लक्षितत्वादुपलक्षणेन कर्त्तव्यमित्याशंकां निराकर्तुं तन्मतं तत्तावदनुवदति
॰इदं चेति॰ इदं च शाब्दं अनुमानादभिन्नमन्यंत इति संबंधः॥ तदेतद्दूषयति तन्नेति। ननु द्विविधं शाब्दं पः इदं वाक्यं च तत्र यद्यपि
पदं स्मारकत्वाद प्रमाणमसंनिकृष्टग्रहणेन व्यावर्त्तितमिति मतं तस्य भेदः॥ प्रतिपादनीयः॥ तथापि परैः॥ पदं एवानुमानादभे
दः॥ प्रतिपादित इति तदूदं एव साधयितुमुचितः॥ किमिदमुच्यते किं तस्य भेदाभेद उपनीक्ष्य चेति। सत्यं किंतु वार्त्तिककारैरेव विष
योच्याद्दशस्ताव दृश्यते लिंगशब्दयोरित्यादिना महता प्रबंधेन विषयभेदेन सामग्रीभेदेन च पदात्मकस्य भेदो निरूपितस्तत्रै
वावगंतव्य इति ग्रंथकारेण तन्निरूपणमुपेक्षितं। ननु पदजन्यज्ञानस्याबाधाभावात्कथं पदस्याप्रमाणत्वं॰ इत्थं पदं हि प्रयुज्य
मानं प्रत्यक्षेर्थे प्रयुज्यते परोक्षे वा प्रत्यक्षेपि किं गृहीतसंबंधे ऽगृहीतसंबंधे वा एवं परोक्षेपीति चत्वारः॥ कल्पाः॥ तत्र यद्यपि
प्रत्यक्षेण प्रतीयमानेर्थे गृहीतसंबंधे पदं प्रयुज्यमानं ज्ञानं जनयति तथाप्यधिकाभावेनानुवादकत्वाद प्रमाणं॰ अगृहीतसंबंधे तु प्र
त्यक्षे प्रयुज्यमानं प्रतिपत्तिमेव न जनयति। परोक्षेप्यगृहीतसंबंधे प्रतिपत्त्यभावः॥ यस्तु वाच्यत्वेनावगतः॥ तं प्रति परोक्षस्तत्र पदा
त्स्मृतिरेवेति॰ ननु स्मरणेप्यनधिगताधिगमोस्त्येवातीतकालावच्छिन्नो हि घटस्तत्र भासते तादृशश्चागृहीत एव॰ अनतीतेनुअ शा०
पमित्यपरोक्षतया तत्स्मरणं किमिति न प्रमाणं॰ मैवं॥ अप्रमितिस्मृत्यनुपपत्तेः॥ प्रमिते च पुरुषं कार्यं परिच्छेदात्। प्रमितेपि ६६

ज्ञाद्यात्विकपरिच्छेदकत्वेन प्रत्यभिज्ञानवत्स्मरणं भविष्यतीति चेन्न·नापाचा·पर्व्वोनुभूतोर्थस्तावत्तएव स्मृत्या प्रतीते४ पर्व्वा
नुभववशेन हि स्मरणमुत्पद्यमानं तदनुसारेणैवोत्पद्यते न तदा समत्रो प्रत्यभिज्ञानं च द्वोध्य पतीति। ननु स्मृति४ संस्कारजन्या पदा
त्पदार्थज्ञानं तु प्रत्युत्पन्नकारणकं कथं स्मृति४ स्यान्न·मैवं·अनधिकविषयतानुल्यत्वया स्मृतिवदप्रामाण्योत्पत्ते४०
उक्तं च पदमस्याधिकाभावात्स्मारकान्नविशिष्यत इति। ननु द्वारमित्यादावधिकार्थप्रतीते४·कथमप्रमाणानि यासेत्रि·यती
मित्याद्यध्याहारान्नस्य वाक्येन पदस्मात्रत्वाभावात्। अन्ये तु धीपदस्य प्रमाणत्वमनुमानत्वं च वाक्यं हि वाक्यार्थप्रमाणत्वेना
स्माभि४ प्रतिज्ञातं तत्र वानुमानत्वगंधोपि नास्तीत्याह। यत्विति। वाक्यार्थे तु पदार्थेभ्य४ संबंधानुभवादृते। बुद्धिरुत्पद्यते ते
नाभिज्ञासावदुष्टबुद्धिवत्। एवं च वाक्यार्थज्ञानं अनुमानाद्भिन्नं·संबंधग्रहणनिरपेक्षेभ्य४ पदार्थेभ्य उत्पद्यमानत्वात् प्रत्यक्ष
वदिति प्रयोग४ स्वचित४ पदार्थानामपि वाक्यार्थसंबंधग्रहणसापेक्षत्वादसिद्धो हेतुरिति चेन्न। तत्राह। नहीति·संबंधग्रहण
भावेपीत्यादि·पदबोधकत्वान्नातिप्रसंग४ अपेक्षासन्निधियोग्यत्वानां नियामकत्वादिति भाव४ प्रकारान्तरेणानुमानत्वमाशंक्य
निराकरोति यत्विति। एतदेवोपपादयति वाक्येति·उपपादितमर्थं निगमयति तस्मादिति॥ ॥शब्दवाद४॥ इदानीं क्रम
प्राप्तमुपमानं निरूपयितुमारभते। उपमानमिति·आयं च गोस्मरणस्वतंत्रो भाष्ये पंथ४। उपवर्षसम्मत एव भाष्यकारेण

रांम० ६७ लिखितत्वात् टीककारादिभिर्व्याख्यातत्वेनैवोच्यते। अत्र गोसदृशो गवय इति वाक्यमुपमानमिति केचित्। तन्न तस्य शब्दानतिरे-
कात्। प्रत्यक्षसदृष्टगोत्वानां गोसदृशो गवय इति श्रुतातिदेशवाक्यानां च वने गवयदर्शनादयं सगवय इति गोसादृश्यवि-
शिष्टगवयज्ञानं तदुपमानमिति गौतमीयाः। तदप्यसत्। ज्ञातस्यागमभावहिर्भावात्। तत्र ह्याप्तोपदेशेनैव गवयपदरूपार्थप्र-
67 तीतेः। अतिदेशवाक्यार्थस्मरणासहकृतेन्द्रियजन्यत्वाच्च सविकल्पकप्रत्यक्षमेतत्तत्र· अतोयथा गवयदर्शनं गो-
स्मरणस्येत्युदाहरणान्तरमाह भाष्यकारः। तदेतल्लक्षणं व्याचष्टे पूर्वेति। प्रत्यक्षेण पूर्वदृष्टायां गवि स्मर्यमाणायां च व-
ने गवयदर्शनादेतत्सदृशो गौरिति यद्विज्ञानं तदुपमानमित्यर्थः। ज्ञानस्वरूपमाहयासेति। अत्रेदमुच्यते॥ गवयदर्शनं गो-
स्मरणस्येति सादृश्यविशिष्टगवयदर्शनं गविस्मरणमुत्पादयत्तदुपमानं। तद्धेत्वादित्तं वा स्मरणमुपमानमित्युक्तं। एतच्च तदु
ध्यानादिजन्यस्मृतिवत् अननुभूते गवि सदृशदर्शनादभिव्यक्तसंस्कारजन्यत्वेन स्मृतित्वादप्रमाणं संस्कारजन्यत्वेऽपि प्रत्यभि-
ज्ञावद्देशकालाधिक्येन प्रमाणं भविष्यतीति चेत्। न तदाधिक्याभावात्। प्रत्यभिज्ञा न हि पूर्वानुभवातिरेकेणैतत्कालीनांसत्तांग-
स्म मौति। उक्तं च यदिदानीं तनमास्तित्वं न हि पूर्वधियागतमिति। उपमानेऽनु नगरस्थं पूर्वानुभवानुसारेणोत्पद्यमानेनाधिकं गम्यं ज्ञा- रांम०
ति। केचित्तु प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानमित्याहुः। सत्यं किं गवयप्रस्वरूपालंवनमेतज्ज्ञानमभ्युपगम्यते तत कृतमोसा ६७

दृश्यपात्तेवनेवा · नाद्य४ इंद्रियसन्निकर्षोत्पन्नत्वेन तस्य प्रत्यक्षत्वात् · नाद्वितीय४ अतिदेशवाक्यादेव गवयगतत्वेन गोसा
दृश्यस्याचगतत्वेन तज्ज्ञानस्य स्मृतित्वात् ज्ञाता दृश्यविशिष्टगवयग्राहकत्वेन स्मृतिप्रत्यक्षाभ्यामतिरेक इति चेत् · न उक्तदो
षानतिवृत्तेः४ यद्यतिदेशवाक्यार्थविज्ञानादधिकार्थानवभासस्तर्हि गवये स्मृतिरूपमेवैतज्ज्ञानं स्यात् अधिकार्थावभा ना ३
से त्विंद्रियजन्यत्वात्प्रत्यक्षत्वमिति · स्मरणातिरिक्तं द्रियव्यापारं कथं प्रत्यक्षमिति चेत् · न इंद्रियसंबद्धमात्रस्यैव प्रत्यक्ष स ४
त्वात् · किंचाश्रुतातिदेशवाक्यानामित्यपि न वाच्यं अश्रुतातिदेशवाक्यानामपि वनमे गवयदर्शनोत्तरकालं गोसादृश्योपमि
तिज्ञानोत्पत्तिदर्शनात् अयं यः श्रुतातिदेशवाक्यानामिक्रमयंसगवयः इति संज्ञानुसंधानेन ज्ञानं नोत्पद्यते · मानामगव
यसंज्ञावाच्युपमानप्रमेयं तु गोसादृश्यविशिष्टं गवयपिंड एव · ननु संज्ञासंज्ञिसंबंधपरिच्छेद एवोपमानफलं न
चाश्रुतातिदेशवाक्यार्थस्य तथा प्रतिपत्तिरस्ति · नैतदपि युक्तं अतिदेशवाक्यादेव संबंधावगतिसंभवेनास्योपमान
फलत्वासंभवात् अत्रोच्यते गवयदर्शनादेतत्सदृशो मे गौरस्ति गौर्ययेति · यद्विज्ञानं तदेवोपमानं · तस्य च स्मर्यमा
णो वा गोर्गवयसादृश्यविशिष्टः प्रमेयं · स्मर्यमाणगोगतं वा गवयसादृश्यं प्रमेयं यापयप्यपि गवयेसादृश्यं प्रत्यक्षेण गा
वगतं गोश्चस्मर्यतेतत्यापि विशिष्टस्यान्यतो इसिद्धेरुपमानप्रमाणतापद्याद्धि प्रत्यक्षदृष्टेपि पर्वतादौ स्मर्यमाणो

राम० ६८ वचक्रे। विशिष्टविषयत्वेनानुमानस्य प्रमाणत्वमेवमुपमानस्यापि यथा च तत्राग्निसामान्यमेवानुमीयते न विशेषस्तथा
त्र सादृश्यमात्रविशिष्टस्यैवोपमेयत्वमिति। तस्मादेवं लक्षणकत्वादुपमानमपि न व्यभिचरति यत्रानुव्यभिचारस्तदुपमा
नमेव न भवति बाधकत्वात्तेनाभासत्वात्। यथा पलालकूटस्य गजादिसादृश्यं। समीपस्थस्य तत्र बाधदर्शनात्। ननु सादृ
श्यं नाम न किंचिद्वस्तु धर्म्मिणोभिन्नमभिन्नं वा संभवति। आद्ये दृश्यानुपलब्धिप्रसंगात्। अभेदे तन्मात्रापातात्। पुरःस्थित
वस्तुगतं च सादृश्यमगृहीतप्रतियोग्यपि जातिवद्गृह्येत। प्रतियोग्यपेक्षमेव सादृश्यं स इति चेत्। न। उत्पत्तौ ज्ञप्तौ वा तदपे
क्षाभावात्। उत्पत्तावपि देवदत्ते तत्सादृश्यं येन यदत्तस्य निष्पद्यते व गम्यते च। अतश्च कल्पितमेवैतद्वस्तुरूपमित्यभिप्राय एवा
ऽसत्वे किं पुनरिति। उत्तरमाह अर्थान्तरेति। जात्यन्तरयोगिभिरवयवसामान्यैर्यो जात्यन्तरस्य योगस्तत्सादृश्यं न धर्म्मिस्वरूप
मात्रं न चागृहीते गवि तत्संबंधिनां सामान्यानां ग्रहणं संभवतीत्यतोवश्यं प्रतियोगिग्रहणापेक्षेति भावः। यदुक्तमुत्पत्तौ ज्ञप्तौ
वा प्रतियोग्यपेक्षा न संभवतीत्यत्रापि तन्निष्पत्ताविति तत्र न्यायः नोभयत्रापि प्रतियोगी सत्तयोपकरोति किंतु स्वसंबंधि
सामान्ययोगितया स्वार्थप्रमाणः सादृश्यावगतावुपयुज्यत इति। यदपि सादृश्यं भिन्नमभिन्नं वेति विकल्पितं तदपि भेदाभे राम० ६८
दांगीकारेणापरिहृतं लक्षणाद्यैर्विदृष्टाणोतिपयातिं। एतद्ध सादृश्यं सदृशप्रत्ययोत्पादकत्वेन गवयसदृशेन पञ्चेनैत्येवमादि

चोदनार्थं तिष्यादिकत्वेन चार्थक्रियाकारित्वाद्धस्ते चेति भाव8। अवयवग्रहणं च धर्ममात्रोपलक्षणार्थं जातिग्रहणं चोप
लक्षणं तीतरप्रदर्शनार्थं। अतोऽन्नरिवमाणको पत्र दत्तसदृशश्च देवदत्त इत्यपि सिध्यति। यत्र पुनरवयव्या8 सादृश्यं प
यायघ्नदत्ता क्षीत्यत्र पयसा क्षोौतोऽथ। तत्रापि तयो8 स्वावयवसामान्ययोग एव सादृश्यम्। पयदादिगुणयो8 सादृश्यं यथा
केतकीगंधसदृश8 सप्पगंधः इति तत्राप्यवयविगुणानां अवयवगुणसामान्ययोग8 सादृश्यं। कर्मणामपि स्वसंबंधिद्रव्यदे
वतासामान्ययोगः इति। एवं जात्यादिसामान्यैरपि व्यस्तै8 समस्तैर्वा विचित्रं सादृश्यमन्हनीयं। यथा क्रु8 एवं जातिगुणद्रव्य
क्रियाशक्तिस्वधर्मान्त8 एकैकद्विविसामस्त्यभेदादनेकचित्रतेति। ननु सामान्यस्यापत्यमेव सादृश्यमस्तु किं योगग्रहणेनान।
योगं विना तदप्रतीते8। गोजातौ यावयवसामान्ययुक्तानुगवयजाति8 सादृश्ययुक्ता गव्यनाश्रित योग एव सादृश्यावगमात्।
यद्यपि यमयोर्जात्यंतरं नास्ति तथापि जात्यंतरग्रहणं स्योपलक्षणांतरप्रदर्शनार्थत्वात् सादृश्यं संभवति। न चैकरूपं सामा
न्यं कचिद्रूपसांकर्यं चिदल्पीयसां च दर्शनात्। अनित्यं त्वेतत्। गोत्वादिसामान्यस्यैवानेकाश्रयत्वेन नित्यत्वोपपत्ते8। अथ
वा सर्वमेव सामान्यं नित्यं देशांतरादिषु क्वचिदाश्रयस्य संभवात्। ननु व्यासज्य वर्तमानस्य कथमेकत्र ग्रहणमिति वा। जाति
वदेकैकत्र सादृश्यस्य परिसमाप्तत्वेन द्वयोर्व्यासज्य वृत्त्यभावात्। मतांतरं निराकरोति। येति ति। अन्यदेवस्वतंत्रं किंचि

रामं०
६९
69

दित्यर्थः॥ तेषां मते प्रकर्षाप्रकर्षभेदः॥ प्रतियोग्यपेक्षावचनस्यादित्यर्थः॥ ननु सादृश्यविशिष्टपिंडज्ञानस्येंद्रियज चेत्॥
ऐतदेव विवृणोति। एवमिति जन्यत्वासत्यपक्षत्वमित्याशंक्याह नचेति· येनु प्रमाणद्वयवादिनश्चौलूक्यादयः॥ सांख्यावा
प्रमाणत्रयवादिनोनुमानांतर्भावं मन्यंते तान्प्रत्याह नचेति· एतदेव विवृणोति। एवमिति॥ अत्र गवयस्य सादृश्यविशिष्टो गो
रनुमेयः॥ तत्र न तावद्रूढ्यागतं सादृश्यं लिंगं प्रागुपमानात्तद्धर्मत्वेनाप्रतीतेः॥ उपमानप्रमेयत्वाच्चास्य· नापि गवयग
तत्र पक्षधर्मत्वादिति भावः॥ अधिकं नु वार्त्तिके त्ववगंतव्यं· द्वावप्यौ गोगवयसरूपौ· पूर्वमपि सदृशार्थदृष्टदर्शने सत्ये
वसंबंधग्रहणासंभवेति दिति भावः॥ अतो गवयसदृशो गौरिति विज्ञानं· नानुमानं· अगृहीतसंबंधस्याप्युपजायमान
त्वाद्यप्रत्यक्षवदिति प्रयोगः॥ सूचितः॥ भेदप्रतिपादनप्रयोजनं च वार्त्तिककारेणुक्तं· तथाहि भिन्नानुमानादुपमेयमुक्तो।
सौर्यादिवाक्येरसहामिद्धेष्टा सादृश्यं प्राग्मादिमुतंकपंनु प्रत्याप्यपदेदिस्तुपयुज्यते ना। प्रतिनिधिरपि चैवं व्रीहिसादृश्य
योगाद्भवति तदुपचारे यत्ननीवारजातौ। तदपि फलममीष्टलक्षणस्योपमायाः॥ प्रतिकृतिरपि गौरोवर्ध्मातेपत्रचा
न्येः॥ यदिमुसदृशमन्यं प्रत्यंप्यते तत्रापि मिथ्याभवति विसदृशत्वात्तदमादृश्यमुक्तं· मतिरपि हि तथैव द्रागिवोत्पद्यते
स्मिन्नितरविषयबोधेसत्यपीत्थं च बाधः॥ ॥इत्युपमानं॥ अथ क्रमप्राप्तामर्थापत्तिं लक्षयति अर्थापत्तिरपीति॥ अ

रामं०
६९

द्रष्टस्य परिकल्पनेनोपपत्तिरोमाभ्युपगंय्य॥ लक्षणमस्या व्याचष्टे प्रमितस्येति। न च वगतार्थोनुपपद्यमानोनावश्यमर्थान्तरं
कल्पयतीति तस्य तुल्यत्राधिकरणा हस्तिपदप्रशस्तादुगतिरर्थान्तरं कल्पयतीत्याशंकानिराकरणार्थं प्रमितस्येत्युक्तं। प्रमा
णावगतोर्थो नुपपद्यमानो वश्यमर्थान्तरं कल्पयतीत्यर्थः॥ ननु दृष्टशब्दस्य प्रमितमात्रवचनत्वाभ्युपेते त्वन्यर्थकं। न
पदोष॥ श्रुतार्थापत्तेः॥ प्रमाणान्तराहितत्वेनार्थविषयायाद्दृष्टार्थापत्तेर्वैलक्षण्यप्रदर्शनार्थत्वेदेनोपादानं। प्रमितस्येत्य
नेन प्रत्यक्षादिप्रमाणषट्कपूर्विकार्थापत्तिः॥ सूचिता। तत्र प्रत्यक्षपूर्विका यथा प्रत्यक्षतोवगताद्दाहाद्दहनस्य दाहशक्ति
कल्पना। देशान्तरप्राप्तिलिंगकेनानुमानेनादित्ये गतिमनुमाय तदन्यथानुपपत्त्या गमनशक्तिरस्यास्तीति यद्विज्ञानं सा
नुमानपूर्विकार्थापत्तिः॥ शब्दपूर्विका नु श्रुतार्थापत्तिरेव। यथा पीनो देवदत्तो दिवा न भुंक्ते इति श्रुते रात्रिभोजनकल्पना। गव
यदर्शनादेतत्सदृशो गौरित्युपमानेन गवि गवयसादृश्यमुपमाय तदन्यथानुपपत्त्योपमानज्ञानं प्रतिग्राह्यशक्तिरस्या
स्तीति यद्विज्ञानं सोपमानपूर्विका। अभिधानानुपपत्तिप्रभवयार्थापत्त्या शब्दस्य वाचकशक्तिं कल्पयित्वा पुनस्तदनुपप
त्त्या शब्दस्य नित्यत्वकल्पनाख्यार्थापत्तिपूर्विका। प्रत्युच्चारणानुशब्दान्यत्वे सत्यत्रास्मिन्गृहीतसंबंधेऽन्यस्य वाचकत्वं न स्या
त्। सादृश्येन तद्दर्शी प्रतिपादकत्वाभ्युपगमे लिंगाभासोत्पन्नविज्ञानवदप्रमाणं स्यात्। न चात्र सदृशप्रतीतिरस्तित्वेनै

वप्रत्ययपाद्रः। अतो वाचकशक्त्यनुपपत्त्या नित्यत्वकल्पनं· अभावपूर्विकालब्धापत्तिर्भाष्यकारेणैवोदा
हृता जीवतो देवदत्तस्येत्यादिना। अर्थापत्त्यंतरस्याप्युदाहरणप्रपंच४ पक्षदोषावसरे टूहदीकायां वार्त्तिकका
रैर्द्दर्शिता४। ननु भाष्यकारेण भावपूर्विकायाएवोदाहरणान्वार्त्तिके कथमुदाहरणप्रपंच४· नैष दोषः भाष्यो
दाहरणस्य सर्वसूचनार्थत्वात्· अनुमानेंतर्भावशंकते पदीति। परिहरति स्यादेवमिति। अतोनुमानचेष्यमिति
भाव४। गृहाभिसंबंधि४ ए छेति किमिति। आशयमविद्वानंगीकारेण परिहरति को दोष इति। शंकितास्वागूपमुद्घार
यति नरवास्येति। एतद्देवोपपादयति नहीति। प्रकृते निगमयति तस्मादिति· अतोनुमानमेवैतदिति भाव४· अत्र सिद्धां
तिन४· परिहारमनुभाषते· अथेति संशयमुपपादयति यस्येति· किमेतावता दूषणमत आह तत्तश्चेति· ननु यथा
संदिग्धं न लिंगमेवं गमकमपि न भविष्यत्यत आह· यथेति· संदिग्धमेव जीवनं स्वसमाधानार्थं बहिर्भावं कल्पयतीदद
मेवास्य गमकत्वमिति भाव४· पूर्वदृष्टं रूपं जीवनस्य गृहसंबंधित्वं·। दूषयति न दिदमिति· आशंक्यतामेवाह· कथं ही
ति· केनचित्तत्र्धपनोदइत्याकांक्षायामाह· सर्वत्रेति· आद्यं· निराचष्टे नचेति· प्रस्तुतेति। बहिर्भावकल्पितग्रहसंब
धित्वविपर्ययरूप४ संशयहेतुरेव दृष्टमवस्थाप्यत इत्यर्थः४· द्वितीयं निराचष्टे नचेति। असंभवं दर्शयति। यस्मादिति

असंबद्धत्वादेकत्र संभवतीत्यर्थ॥ निगमयति तस्मादिति समाधत्ते अत्रेति । तत्र॥ किमत आह प्रथममिति । नचेति । कार्य
कारणबुद्धौ योगपद्यायोगादिति भाव॥ न चागमेन जीवनस्य निश्चितत्वात्तत्संसर्गग्रहाभाव॥ पूर्वमेवावगतो लिंगं भवि
ष्यतीत्याशंक्याह । अत्रेति । सत्त्वासत्त्वे तावदेकस्मिन्देवदत्ते देशविशेषावच्छिन्ने न शक्येते संसृज्य वोद्धुं अन्तोपयैवबाधि
ततयो॥ संसर्गस्य तेन तयैवाभावाक्रान्तात् गृहाद्बहिरेव चैत्रस्य विद्यमानत्वमवगतं भवतीति । अतो हेतुज्ञानकाल
एव साध्यस्यापि ज्ञातत्वात् नानुमानस्य किंचित्प्रमेयमस्तीति पिंडितार्थ॥ अत्रैव वार्त्तिकमुदाहरति आह चेति । एत क्ष्लो
कान्तरस्यान्तराद्ग्रंथकारेण न योजितं तुल्यार्थत्वात् । नत्र वार्त्तिककारैर्बहिर्देशविशिष्टे यो देशो वा तद्विशेषित इत्यादि
नाग्रंथेन बहिर्देशविशिष्टे चैत्रे तद्विशिष्टे वा बहिर्देशेऽनुमेये गृहे चैत्राभावस्य वा लिंगत्वं स्यात् । चैत्राभावविशिष्टस्य
वा गृहस्येत्यादेर्येऽनेके विकल्पाः उपक्षिप्ता दूषितास्ते तु ग्रंथविस्तरभयान्न लिखिता॥ एवं तर्ह्यनुमानवदर्थापत्ते
रपि न किंचित्प्रमेयमस्तीति चोदयति । न चेति ॥ अनुमान एव प्रमेयानुप्रवेशित्वं नाम दूषणं । न त्वर्थापत्तौ तत्र प्र
तीति॥ संबंधबलेन नानुपपत्त्याध्यक्षमदर्शनेऽसत्यप्यगृहीतसंबंधस्य वह्निप्रतिपत्तेरभावात् । इह तु प्रमाणद्वयप्रतिप
न्नयोरेकाधिकरणयोर्भावाभावयो॥ संवेदनार्थमेव बहिर्भावाख्यप्रमेयानुप्रवेश इति न दोषा इत्याशयवान्परिह

© Dharmartha Trust J&K. Digitized by eGangotri

रा०म० ७१ रतिरुच्यत इति॥ ननु प्रमितस्यार्थस्यार्थान्तरेणाविनानुपपत्तिमालोच्य तदुपपत्तये यार्थान्तरकल्पनासार्थापत्तिरित्यु
क्तं· कथमिदानीं संस्पृष्टधीरेवार्थापत्तिरित्युच्यते। सत्यम् अत्रापि चवहिर्भावरूपार्थान्तरकल्पनास्त्येव· किंत्वगतजीवनावि
शिष्टगृहाभावोपपादकत्वेनैव तत्तानं· नत्वानन्येन च न चात्रापि गृहाभावस्य वहिर्भावेन नियतत्वाद् अविनाभावेन प्रतिपत्ते
रनुमानमेवास्तु· मैवं अगृहीताविनाभावस्यैव प्रतिपादकत्वेनानुमानत्वाभावात्। अस्तु चार्थापत्त्या गृहाभाववहिर्भाव
71 योः संबंधेवगते पश्चादनुमानं न विरोधः कश्चित्· तदुक्तं तेन संबंधवेलायां संबंधान्यतरोऽसुबोधार्थापत्त्यावगंतव्यः
पश्चाद्भवत्यनुमानता। ननु संस्पृष्टधीरर्थापत्तेः कारणमेव चेदर्थापत्तिस्तदा तत्कारणमतिरिक्तं वाच्यं· न च तत्संभवतीत्या
शयेनाह दृष्टश्रुतेति किं पुनरिति। उत्तरमाह द्वयोरिति· प्रतीघातमेव दृष्टान्तेन विवृणोति। यथेत्यादि। दृष्टेति के संगमयति
वमिति। नहि दृष्टान्तवदत्रापि परस्परप्रतीघातानार्थान्तरकल्पनोदेश्यप्रतीत्यापाशंक्याह स्योपमिति। समाधेयत्वात्तु दिलक्षणो हि ८
यं प्रतीघात इति नावः फलितमाह· तेनेति। कार्यकारणयोर्द्विवेकं दर्शयति पश्चेति· यद्येवरूपार्थापत्तिस्तर्ह्यनुमानस्य
तत्रान्तर्भावः प्राप्नुयादिति शंकते भवत्विति॥ समाधत्ते स्यादेवमिति। अर्थापत्तेः पूर्वमेवानुमानप्रवृत्तेर्न विषयसंकरइ रा०म० ७१
तिभावः। निगमयति तस्मादिति। अनेनैव न्यायेनान्यत्राप्यर्थापत्तिरित्याह पापीति· यत्तु तत्रानुमानेन तदर्थापत्तिस्वरूप

निर्वाहकमेवेति भावः अत्र चोदयति न चेति। परिहरति सत्यमिति। अत्र भावाभावौ संबंधिनौ तत्र परिमितदेशकालत्वाच्छ
क्यते ग्रहीतुं अभावस्त्वनंतदेशकालवर्ती न कथंचिद्ग्रहीतुं शक्यते अतः साहित्यग्रहणासंभवादननुमानमिति भाव
ः हेत्वंतरेणानुमानं शंकते अपेति। न सर्वदेशगतेनाभावेन नियमं ब्रूमः किंतु देवदत्ताधिष्ठितदेशव्यतिरिक्तत्वात
द्रूपत्वमनुमीयत इति शंकार्थः। अयमत्र प्रयोगः विवादपदं देशांतरं देवदत्तशून्यं देवदत्ताधिष्ठितदेशव्यतिरि
क्तत्वात् यात्तदेवदत्ताधिष्ठितप्रत्यासन्नदेशवदिति। एतदपि वार्तिकोक्तदूषणो न वदूषयति। तत्रापीति। न हदिति चैत्रयुक्त
मित्यर्थः। प्रयोगश्चैवं। देशांतरं देवदत्तयुक्तं। देवदत्ताधिष्ठितसमीपदेशव्यतिरिक्तत्वात्। तदधिष्ठितदेशवदिति विनुद्धा
व्यभिचारित्वं दूषणमुक्तमित्यर्थः। एतदुक्तं भवति। न तावद्देवदत्तसंयुक्तदेशव्यतिरिक्तत्वादिति हेतुः संभवति संदिग्ध
त्वात् देशांतराणां पतितत्संयुक्तानि न वेत्यत्र देवात्र विचार्यते। कथं तेषां तत्संयुक्तदेशाद्व्यतिरेकः सिद्धः अप्रयोजक
श्चायं साध्यव्यतिरेकस्यापि साधयितुं शक्यत्वादिति। उपसंहरति तस्मादिति। अन्यत्राप्ययमर्थापत्तिमतिदिशति एतेनेति। एत
द्वप्रश्नपूर्वकमुपपादयति। किं पुनरिति। प्रतिबंधकाभावस्य कारणत्वं शंकते ध्वारणाभाव इति। परिहरति नेति। प्रति
बंधकाभावे सत्यपि कार्यानुत्पत्तेस्तस्याकारणत्वमित्यर्थः विशेषं शंकते प्रागभाव इति। परिहरति नेति। प्रतिबंधका

भावत्वेनैव कारणतावच्छेदकत्वाविशेषविवक्षायां गौरवापत्तेरिति भावः बीजस्वरूपेण तत्कल्पनायां नियामकमाह
बीजस्येति· उक्तमर्थमन्यत्रातिदिशति एवमिति॥ नियमाभावे कारणमाह सा हीति। अस्त्वेवं प्रकृते किमायातम प्र
तमत आह सा चेति। अत्रैव वार्त्तिककृत्संमतिमाह यथा हेति· तद्योत्मशक्तेरित्येव वक्तव्याने पागशक्तेरिति चोद
पतिकथमिति। समाधत्ते तस्येति· एवं प्रसक्तानुप्रसक्तं परिसमाप्येदानीं लक्षणगतश्रुतपदव्यावर्त्यमाह· दृष्टेति। ए
तच्च व्याख्यानपरं· न च तत्र वार्त्तिककारैः पीनो दिवा न भुंक्ते चेत्येवमादिवचः श्रुतौ रात्रिभोजनविज्ञानं श्रुतार्थापत्तिरु
च्यत इत्यनेनार्थविषयता दर्शिता· तत्कथं प्रमाणग्राहित्वमुच्यते। अपदृष्टः पंचभिरप्यस्माद्देनो नोक्ता श्रुता —
रूवा प्रमाणग्राहित्वेन यस्मात्पूर्वविलक्षणोप्युपक्रमवार्त्तिकपर्यालोचनया प्रमाणग्राहित्वमुच्यते न हि वार्त्तिक
मेव पूर्वापरविरुद्धं नेष दोषः। अर्थविषयत्वस्य मतान्तराणि प्रायोगेणोक्तत्वात् अत एवानन्तरं तस्याः प्रमाणग्राहित्व
प्रदर्शनार्थं विप्रतिपत्तिरुपन्यस्ता: तामर्थगोचरां केचिद् गरे शब्दगोचरां कल्पयंत्यागमाच्चैनामभिन्नां प्रतिजानत इति स
र्वेचागमांतर्भूतामन्यत्तरत्परं यः· प्रयोजनं चागमात्तभांतस्य तत्रैवोक्तं· प्रायशश्चान पावे द्व्यवहारो व्यवस्थितः सर्वैरि
कः प्रसज्येत घघेषामभिघतेनत ः। अत्र केचिद्रादिवा न भुंक्ते इति श्रुतस्यैव शब्दस्य रात्रिभोजनप्रतिपादकत्वं कल्पयंतित्र

न्येनुशब्दांतरमेवतस्याविपापादकमिति। तत्र न तावद्दाघः एकस्य वाक्यस्यानेकार्थता योगात् अन्यथापि रात्रिभोजनप्रति
पत्तेः किंच वाक्यस्य वाचकत्वे स्याद् अप्यनेकार्थता न चैतदस्ति। पदार्थाश्च परस्परेणाहि प्रतीयमानो वाक्यार्थः शब्दशक्तिकल्प
नाहेतुर्भवति न च पदिवा वाक्यस्य राज्यादि पदार्थाश्चयोस्ति। तस्मात्कल्पितस्य वाक्यांतरस्यैवायमर्थो न श्रुतस्य। तत्र क
ल्पितं वाक्यं किं प्रमाणमूलकमिति तावद्विचारणीयं। न तावद् दस्य प्रत्यक्षं मूलं अननुच्चारितत्वात् नानुमानं श्रुतवाक्यस्याश्रु
तेन संबंधाग्रहणात् नापि शब्दगम्यत्वमसंभवात्। किंदिवावाक्यमेवरात्रिवाक्यस्य वाचकं वाक्यांतरं वाना घः वाच्यवाच
कयोः संबंधाभावात्। नान्यः अनवस्थानात् वाक्यांतरस्यापि मूलगवेषणायां पूर्वोक्तदोषानतिवृत्तेः नाप्युपमान
गम्यत्वं श्रुतवाक्येनाश्रुतवाक्यस्य सादृश्याभावात्। अतः पारिशेष्यात् श्रुतार्थापत्तिरेव रात्रिवाक्ये प्रमाणं तथाहि पी
नत्वे सति दिवाभोजनप्रतिषेधस्यान्यलाभो रात्रिवाक्यविनानोपपद्यत इति तद्विषयत्वेन रात्रिवाक्यं कल्प्यत इति श्रुतार्थाप
त्तेः प्रमाणविषयत्वे न दृष्टार्थापत्तिवैषयस्यं। ननु न रात्रिभोजनवाक्यं पीनत्वस्योपपादकं किं तु भोजनमेव अतो
ऽर्थ एव कल्प्यतां किं शब्दकल्पनयेति अथवा रात्रिभोजनसद्भावोपि दिवावाक्यस्यैवार्थो भवतु किं प्रमाणांतरकल्पनेन
अथ विश्वजिदादिषु फलादेः शाब्दत्वसिद्ध्यर्थं शब्दकल्पनमिष्यते न तर्हि यथा शब्दाभिहितपदार्थगम्यापि वाक्या

रा०म०
७२

73

र्थः शब्दमूलत्वपाशाद्ः तथा वाक्यार्थानुपपत्तिगम्यो प्यर्थो वाक्यमूलत्वपाशाद्दो भविष्यति॰ अत्रोच्यते। श्रुतार्था
नुपपत्त्या हि सविकल्पकं विज्ञानमुत्पद्यते तच्च शब्दानुवेधेनार्थविषयीकरोतीति शब्दः पूर्वं प्रतीयते॰ ततश्च प्रथमा
वगतेन शब्देनैवानुपपत्ति पपत्ति परिक्षपारनार्थं यावदर्थापत्तिर्गोक्तुति॰ प्रतिपन्नैस्तु शब्दैरर्थावगतिरिति। यद्यपि सा
र्थमाणस्य शब्दस्य सविकल्पकज्ञानोत्पादकत्वं संभवति॰ दृष्टार्था[illegible]थानुपपत्त्यापि च सविकल्पकमेव ज्ञानमुत्पद्यते॰
तथापि प्रमाणलोके दृशास्रवणान्यथानुपपत्त्यात्तद्वचपवस्यैव कल्पनात्तस्यैव भावनायो प्रमाणत्वात्॰ अधिकं तु वार्त्तिकेव
गंतव्यं॰ एतदेवोपपादयति तथा हीत्यादिना वेदेपि शब्दान्तरकल्पनां दर्शयति तयेति। अस्तु वा लोके यथा तथा वेदे त्वेवं शप
शब्दान्तरकल्पनयैवोपपत्तिरिति भावः। अत्र कुप्र कल्पनापत्त्यपरितोषात्पक्षान्तरमाह अथवेति। कथं व्यवहितव्यस्यावि
कृतिविध्येकवाक्यता॰ उक्तं च व्यवायान्नानुषज्येतेत्याशंक्याह। न हीति। सूत्रकारसम्मतिमाह॰ तथा वेति॰ एकदेशिमताप
त्याविरोधशंकते तथा वेति प्रकारान्ति देशस्येव तत्रस्थापितत्वादित्यर्थः॰ मंत्रस्यापि यथाश्रुतस्य प्रयोगापत्त्याऽऽह
सिद्धिः वाधाद्यसिद्धिं वेग्रंथकार एव यदीन्यादिना दर्शयिष्यति॰ परिहरति भवेदिति॰ किंतर्हीति दिश्यत इत्याकांक्षाया रा०म०
माह किं त्विति अर्थात्राध्याहारवादी शंकते। न चर्थमिति। शब्दस्यापि कल्पितस्यार्थोपस्थापन एव व्यापार इति भावः॰ अ ७२

र्थाध्याहारवादिनां प्रकृतावप्यनिष्टापत्तिमाह एवमिति। नाप्यर्थाध्याहारः कर्तुं शक्यत इत्याह कथं चेति। दूषणमुपसं
हरति इतीत्यर्थापत्तेर्भेदप्रतिपादनप्रयोजनं वार्त्तिककारैरुक्तं॥ तथा हि। कस्यास्तुतिर्या परिकल्प्यते तस्मिन्नुल्लिंगादिभिर्या
विनियोजिका चाफलादिभिर्यत्परीपूरणं च संबन्धः कृतं तत्र कोचिद्दर्शितः। तत्सर्वं मिथ्यादृग्भ्यां मंत्रसंस्पारः न चेदियं स्यादनुमानं तत्ते
र्थ्यां। एवं स्वभावाप्यनुमानशब्दं लभेत चेदस्तु पक्षितं वः॥ ॥इत्यर्थापत्तिवादः॥ ॥इदानीमभावाख्यं षष्ठं प्रमाणं निरू
पयितुमारभते अभावोपीति। प्रमाणाभावः प्रमाणानामिति पक्षाश्रुतेर्लक्षणाभाष्यमाक्षिपति कथमिति। समाधत्ते पूर्वोक्तेति॥
न द्युक्तं प्रमाणपंचकं यत्र वस्तुरूपे न जायते। वस्तुसत्तावबोधार्थं तत्राभावप्रमाणतेति। ननु केवलभूप्रदेशातिरेकेण घटाभा
वस्याभावात्किमस्य प्रमेयमित्याह किमिति। एतदुत्तरत्वेन नास्तीत्यादिभाष्यं योजयति उक्तमिति। नास्तीत्यस्यार्थं व्याचष्टे तेन भाव्य
कृतामप्रदेशातिरिक्तस्य प्रमाणावबुद्धावधि अभूप्रदेशाधिकरणेन जर्थरूपं प्रमेयमुक्तमित्यर्थः। असन्निकृष्टस्येत्यनेना
पि प्रत्यक्षाद्यविषयत्वमुक्तं। एतदेवोपपादयति सर्वमिति। तच्च नास्तितारूपमभावाख्यं प्रमेयं चतुर्विधं वार्त्तिककारैरु
क्तं। तथा हि क्षीरे दध्यादि यन्नास्ति स प्रागभावः स उच्यते। नास्तिता पयसो दध्नि प्रध्वंसाभावलक्षणं। गवि योश्वाद्यभाव
स्तु सोन्योन्याभाव उच्यते। शिरसो वयवा निम्ना वृद्धिकाठिन्यवर्जिताः। शशशृंगादिरूपेण सोत्यन्ताभाव उच्यते। अयं

रामं०
७४

वं वस्तुसंकरो र सत्त्वभाव प्रामाण्येन सिध्यतीत्यपि प्रापेरोक्तं । क्षीरे दधिभवेदेवं दध्नि क्षीरं घटे पटः ॥ शशशृंगं पृथि
व्यादौ चैतन्यं मूर्त्तिरात्मनि अप्सु गंधो रसोग्नौ वायौ रूपेण तौ सह । व्योम्नि संस्पर्शिता चे न चेदस्य प्रमाणतेति ॥
मता तत्त्वमाशंक्य निराकरोति पाश्चिदिति । कश्चित्तु प्रतीतिमवापलपतीति प्रत्याह पाश्चिदिति । इतरस्याभावाख्यप्रमेयप्र
तीत्याह घटो नेति अत्राभावातिरिक्तं कारणं शंकते तदेशप इति भूतलमात्रं न्यस्यार्थमोह एकाकीति । परिहरति नेति
। पदविशिष्टस्य भूतलस्यैकाकित्वाभावादित्यर्थः । प्रकारान्तरेणाशंकते घट इति । नास्तीतिव्यवहारस्य कारणमित्यनुषंग
। प्रकारान्तरेण पुनः शंकते न चेति अस्त्वेवं किमेतावतास्यादत आह तत्रेति निराकरोति तदिदमिति उक्तो त्तरस्त्वेवि ष्ट
त्वाति तथाहीत्यादिना । उक्ते र्थे वार्त्तिकसंवादयति स्वरूपमात्रमिति । पश्चात्केचिदपरत्रापि तत्रान्यनास्तितां दृष्टस्तदे
व प्रतिपद्यत इति श्लोकशेषः । एतमेवार्थं स्पष्टयति करोति भूतलेति तत्तत् किमत आह तेनेति । न नु स्वरूपमात्रमित्र
भूतलमात्रत्वानभंगीकृतमितिप्रतीयते तमतं देवनास्तीतिशब्दस्याभिधेयमिति कस्यचिन्मतं तं निराकरोति ते
न नैवमिति पुनः प्रकारान्तरेणाशंकते अपि तु घटादौ देशान्तरस्थे देशान्तरस्य ग्रहणं नास्तीति व्यवहारस्य कारण
मित्यर्थः । दूषयति । ततइति अघप्रदेशान्तरपितस्यभावा नास्तीतिव्यवहारोनभवत्यतो भावे सत्येव नास्ती रामं०
७४

तिव्यवहारादभावस्यकारणमित्यर्थः॰ ननुप्रमाणस्येवाभावव्यवहारादितिमूलवाक्यावमः शंकतेनचेति। असं
भवेकारणमाहभावेति। परिहारंशंकतेसंप्रतीतिदूषयतिनेति। अयोग्यतामेवोपपादयतिनहीत्यादिना। विषस्य
नपरिहरतिस्यादेवमिति। शंकामुपसंहरतिअतइति। समाधत्तेउच्यतइति। ननुभाव्यप्रमाणाभावग्रहणात्कथंस्मरणा
भावोबोधकइत्युच्यते॰ तत्राहभाव्येचेति। आम्भित्यर्थवार्तिकसम्पुदाहरतितथेति॰ सत्तामात्रेणबोधकत्वमितियदुक्तं
तत्रशंकते। नन्विति। एतदेवविवृणोतितथाहीति। ततश्चैतत्सिद्धमित्याह॰ तस्मादिति॰ ननुचेत्यादिसिद्धान्तिग्रन्थः शंकापरि
हारार्थः॰ नन्वितिपर्वव्याप्तिसंबोधनार्थं असतुनामाभावोगीकारस्तथापिप्रमेयत्वप्रमाणत्वंचकथमितिरूपणं पमितिपृ६
ति। कथमितिनिरूपयितुमारभतेतदभिधीयतइति। पर्वोक्तव्यभिचारंपरिहर्तुमनुवदतिपत्वितिः उपपादितमर्थंनिग
मयति। अतइति। यस्मात्सर्वोप्ययंकार्यकारणादिव्यवहारोभावंविनानोपपद्यतेतस्मादभावाख्यप्रमेयमस्तीत्यर्थ
ः॰ नचावस्तुनएतेभेदाःसंभवन्तिकिंचकारणस्वरूपमेवकार्यस्याभावः अतोपिवस्तुत्वं॰ उक्तंचेकार्यादीनांदप्रभावः कोपा
भावः कारणादिनः एतच्चानुपपन्नंकारणातिरिक्ताभावोपपादनेनवस्त्वसंकरस्यपर्वंसाधितत्वात् अभावस्वरूपत्वेचा
भावस्यप्रत्यक्षावसेयत्वेनाभावप्रमाणोच्छेदः सत्यं॰ नात्रकारणस्वरूपमेवाभावइत्युच्यते। किंतुकार्याभावस्यवस्तु

राप्र॰ ७५ त्वसिद्ध्यर्थं कारणधर्म्मत्वमुच्यते· स्फीरमेव दृश्यभावः तद्धर्म्मत्वात् धर्म्मधर्म्मिणोश्चानतिभेदात् तद्रूपं वस्तुधर्म्मः
सत्त्वं कथमवस्तुरूपादिति प्रयोगः तद्रूपं चात्र वार्त्तिककारेणुक्तं· यद्वानुवृत्तिव्यावृत्तिव्यावृत्तिबुद्धिग्राह्यो यतस्तत्परम्॥
तस्माद्गवादिवद्वस्तु प्रमेयत्वाच्च गम्यते· न चैतस्य प्रत्यक्षस्य मिथ्यात्वं वाधकप्रत्ययाभावात् तत्र वस्तुनामाभोवा
75 त्व्यप्रमेयं· तस्य प्रमाणं किंलक्षणकमिति तावदुक्तं यं· ननूक्तं भाष्यकारेण अभावोपि प्रमाणाभाव इति तत्राभाव इ
ति लक्ष्यनिर्देशः प्रमाणाभाव इति लक्षणं प्रत्यक्षादेरर्थापत्तिपर्यन्तस्य पञ्चविधस्य अनुत्पत्तिः अभाव प्रमाणस्य ल
क्षणमित्यर्थः· प्रत्यक्षाद्यनुत्पत्तिस्तु अभावरूपे वस्तुनि इह प्रदेशे घटो नास्तीति या बुद्धिः सा अभावाख्यं प्रमाणमि
त्युक्तं भवति· ननु निमीलिताक्षस्याभावेतानानुत्पन्ने इन्द्रियार्थसन्निकर्षे समुत्पन्नत्वेः प्रत्यक्षमेवैतत्· न च सन्निकर्षो
भावः संयुक्तविशेषणतायाः एव संवंधत्वाद् फलवती शारवेति वदित्याशंक्याह न वेति। अयमाशयः न नतावदिन्द्रि
याभावयोः संयोगः अद्रव्यत्वात्· समवायादेश्चानंगीकारात् नापि संयुक्तविशेषणत्वं प्रत्यासत्तिः असति संवंधे विशे
षणत्वायोगात्· न हि जलघटाभावयोः· कश्चित्संवंधोस्ति येनाभावस्तद्विशेषणं स्यात्· संवंधं विना विशेषणविशे राप्र॰ ७५
ष्यभावे हिमवद्विन्ध्ययोरपि तदापातात्· भावाभावयोः स्वरूपमेव संवंध इति चेत् न तस्य संवंधलक्षणरहितस्यासंवंध

त्वमन्न चेचाइंद्रियाभावयोरपिसए वस्तुमिंविशेषणतांगीकारेणतद्ग्रंकारेवागुणादेरपितथैवप्रत्यासत्त्याग्रहणं।
तत्संयुक्तसमवायेद्विविधापत्तिः४ संयुक्तविशेषणत्वेन चक्षुर्वत्ताभावस्याक्षग्रहणोरसादयोपि च क्षुग्राह्यत्वेररूपयो
ग्यत्वादग्रहणमिति चेन्नतर्हि योग्यतैवैकाकार्योऽनुमेयाग्रहणाकारणमिति सन्निकर्षषट्प्रकारत्वमनुपयुक्तं।ननु भावा
दभिन्नत्वेनाभावस्यापीन्द्रियग्रहणयोग्यतास्त्येव·भेदाभेदस्यांगीकारेणान्यतमभेदाभावादितिदिक् इंद्रियव्यापाराभा
वेपि ज्ञानोत्पत्तिदर्शिपत्तियोहनीत्यादिना।अत्रैवस्वरूपमात्रंदृष्टं वस्तुदाहार्थं·उपपादितमर्थानिगमयति।तस्मादिति·
अनुमानेनभावनिराकरोति।नापीति·अनुमानारूढनिगमयति सिद्धमिति·शब्दाघंतर्भावसंभावनैवनास्तीतिकृत्वात्रद्वे
शेपपादनेनकृतमित्यर्थः४·महाप्रकृतंनिगमयति।अतइति।ननु सर्वस्य प्रमाणस्याभावात्मकस्यैवोपलंभादभावस्य
प्रमाणत्वोपपादनमनुचितं।सत्यं तस्यभावप्रमेयविषयत्वात्·अभावेतु प्रमेयोभावस्यैवप्रामाण्योचित्याद्।प्रमे
यानुरूपत्वात्प्रमाणानीकारस्य प्रमाणत्वोपपादनमनुचितं।सत्यं तस्यभावप्रमेयविषयत्वात्·अभावेतु प्रमेये
स्यापयाद्व४भावात्मकेपथामेयेनाभावस्यप्रमाणता।नचैवाभावमेयेपि नवभावप्रमाणता।भावात्मकस्य
मानत्वे·नच राजाज्ञयास्थितं।परिच्छेदफलत्वानुप्रामाण्यस्याद्वयोरपीति।प्रयोगश्च प्रमाणाभाव४प्रत्यक्षादे

राम० ७६ र्मि घतेऽभावशब्दवाच्यस्य प्रमेयाभावदूषणं तथा प्रमेयाभाव४स्वानुरूपेण प्रमाणेनमीयते प्रमेयत्वाद्भावा
ख्यप्रमेयवदिति। प्रयोजनं च वार्त्तिककारेणुक्तं कर्मणि सिद्धे फले४ समस्तैः सर्वैर्य्यथावद्व पदं गकं दै४ निःस
ग्तानीह परस्परं चनागं तदेत स्वभावं कृतं नामिति॥ पौराणिकमतमनुवदति। यथेति। उक्तं च। इह भवति शताद्दोसंभवा
76 द्यास हस्राश्रमतिरवि युक्तिभावात्सानुमानाद मित्रा जगति वहुनत प्यनिल्पसैतिद्य प्रक्तं भव हेतु यक्षिनित्वनागमा हि घ
तेइ। सिद्धान्तमुपसंहरति अतःइति। एवं युक्तिभि४ प्रमाणं धर्मस्मुपपाद्यागमसप्युदाहरति॥ ॥इत्यभाववादः४॥ नच्चोय
त्रिकस्त्रैगुणसकलस्य वेदस्य प्रामाण्ये साध्यते पुनरीक्ष्य योऽसंगतं इत्याशंक्य संगतिं करोति। लोकेति। प्रतिज्ञार्थे साधि
स तेऽप्यधुनास्त्रावयवेन पूर्वपक्षवादी विषयविशेषवादी शङ्कां करोतीति नासंगतिरित्यर्थः४। इन्द्रियालिहि विघ
मानमर्थमुपलभंते एवानचवित्रेस्वानंतरमुत्पत्त्या४ पशवश्च स्पृष्टो पलभ्यन्ते। यदा वोलपक्ष्यन्ते न तदा वित्रे छिर
नष्ट्रिवत्रावाक्यं प्रत्यक्षविसंवादात् प्रमाणं तथा यत्ता युधवाक्यमपि प्रत्यक्षविरोधाद प्रमाणं तत्सामान्यात् इन्द्रियहो
त्रादि चोदनानामप्यप्रामाण्यमिति चोदनानधर्मानमित्तमत४ प्रतिज्ञातार्थासिद्धिरिति स्त्रावयवार्थः४। अत्रेद राम०
न्तिकारेण प्रत्यक्षसूत्रात् द्ववाद्धि घानिमित्तमित्याद्यवयव४ प्रतिज्ञातं चोदनाप्रामाण्यं अपरपाख्यातमस्य ७६

नचतथेत्यादिनापौनरुक्त्यमाशंक्य परिहरति। पूर्वोक्तस्त्विति॥ अत्रैवं चोदनासूत्रस्थं भाष्यं न च तथाभूतमप्यर्थं न्न्रया पा
चोदनायथायथं किंचन लौकिकं वचनं न शास्त्रीये च फलानि संतीति तत्र प्रमाणमपि भवतीति तथामप्यभवतीति॥ अभेदश
कत्वेन नु चेति यदेत्यादिभाष्यग्रंथो ऽत्रार्थः। परिहरति उत्पत इति॥ आक्षेपवैलक्षण्येन विषयभेद इति समस्तार्थः॰ अत्र
त्वभाष्यस्य साधारण्यशंकत्वेन चिति। परिहरति नेति॥ अपूर्वद्वारा तेषां स्वर्गादिफलसाधनत्वसंभवात् तद्विषयोपमाक्षेपः
संभवतीत्यर्थः॰ तथा चेति स्वरूपेणैव फलसाधनत्वे सतीत्यर्थः॰ ननु चित्रादिवाक्ये ऐहिकफलत्वमात्रं गम्यते न च नंतरमे
व फलमिति अतो विलंबितफलसिद्ध्यर्थमपूर्वोत्तमो वा वाच्य इत्याशंक्याह॰ न चेति अपवापूर्वोत्तमेव सर्वविषयमाक्षे
पमधुना सूत्रात् ढौकरोतीत्याह॰ अथवेति। पूर्वोक्तमाक्षेपं सूत्रव्याख्यानकाले ऽसूत्रमेव दर्शितवान् इदानीं तु तदेव सू
त्रात् ढौभाष्यकारः करोतीत्यर्थः॰ सूत्रात् ढौत्वे विचारस्वरूपं दर्शयति नदिहेति सूत्रे गौव पूर्वपक्षमाह॰ तत्रेति॰ चित्रादिवा
वाक्यस्य प्रमाणप्रत्यक्षादिगोचरार्थप्रतिपादकत्वे सति तद्विसंवादात् रविप्रलिम्बुवाक्यवत्॰ तथा चित्रापशुफलानारभवति
स्वकाले तदजनकत्वात् स्नानभोजनादिवत्॰ इति प्रयोगद्वयं सूत्रसूचितं द्रष्टव्यं॥ ननु साध्यसाधनसंबंधमात्रं विधिनावो
ध्यते नानंतर्यं तत्कथमनंतरानुपलंभाद् विधिविषयबाधः॰ सत्यं कालांतरे निमित्ताभावेन फलानुत्पादात्॰ सामर्थ्यादान

रा०म० ७१ 77

न्त्रर्थमाक्षिप्तं सामर्थ्यस्य च शब्दैकदेशत्वेन शब्दप्रतिपादितमेव तन्नास्तीति दृष्टविरुद्धमपि भवति किंचिद्वचनमित्यादिमा
ष्यानुसारेण वाक्यान्तरमुदाहरति क्वचिदिति· तस्येवेति· यागयोग्यश्च यजमानशब्दप्रवृत्तौ निमित्तं वर्मेत्र यस्य च यागा
द्विका॰ शरीरस्य च वस्तुत्वत्र यविभागो नात्मन इति भावः॰ शरीरस्य जडत्वेनाकर्तृत्वाद यजमानत्वमिति वेत्· न चेतनावच्छेद
कत्वेन तत्संभवात्· अस्तु शरीरवचनो यजमानशब्दः॰ किमेतावता निष्टमत आह शरीरस्येति स्वर्गगमनविरुद्धमस्मीभा
वदर्शनात् प्रमाणं वाक्यं स्यादित्यर्थः॰· प्रयोगश्च यत्ता युधिवाक्यम प्रमाणं प्रत्यक्षविरुद्धार्थप्रतिपादकत्वात्। अवनि
मज्जं त्यलावन्नीत्यादिवाक्यवत्· ननु भूम एवाग्रेर्द्विवादद· शेनार्चिरित्यादिषु मन्त्रेषु च हेतुसत्त्वादनैकान्तिकत्वं· नैष
दोषः॰ तेषामपि पक्षीकृतत्वात्· विधौनु भविष्यत्त्वापि फलस्य संभवेत्र न वाक्यो विधिरित्याह· न चेति· वर्त्तमानापदेशोनु
तदानीं स्वर्गगमनं प्रत्यक्षविरुद्धमिति भावः॰ अस्तु वा विधित्वं तथाप्यनुपपत्तिरित्याह· भस्मीभूतस्येति आत्मनः॰ संभ
वतीति चेत्र नेत्याह न वेति· आक्षेपकर्त्रीत दर्शनीकारणादिति भावः॰ अतिरिक्तो वा नाक्षोपपन्ना पुष्टीभवेदिति भावः॰ आक्षे
पमुपसंहरति तस्मादिति। एवं सत्यग्निहोत्रादिवाक्येष्वपि स्वार्थता वेदवाक्यैकदेशत्वाद्विन्नादिवचनेष्विवेत्यपि प्रा रा०म० ७१
यवानाह एवमिति· ननु विरोधपरिहारेणाक्षेपसमाधानमकृत्वैवानंतरमौत्पत्तिकस्त्वित्यादिना सिद्धांतवादिनः॰ प्रामाण्ये

पपादनमयुक्तमित्याशंक्याह· एवमिति· स्थिते हि प्रामाण्ये तद्बलेनैव सर्वाक्षेपपरिहारः सुकर इति भावः न चैवंजातीयकस्या
र्थस्य पूर्वमेव साधितत्वात् पुनरुक्तमेतदित्याशंक्याह· पूर्वं हीति· वैदिकं वचनं न मिथ्या· स्वार्थे वक्त्रनपेक्षत्वात्· पदार्थपद
बुद्धिवदिति प्रयोगो द्रष्टव्यः अत्र च वक्त्रार्थानुशब्दः पक्षव्यावृत्त्यर्थः नाप्रामाण्यं चोदनायाः यत औत्पत्तिकोऽपौरुषेय
ः शब्दार्थयोः संबंधः तस्य चोदनालक्षणः सम्यक् प्रामाण्ये हेत्वर्थः· स्वार्थस्य ज्ञानं ज्ञापकः निश्चायकः· पौरुषेयो हि प्रत्य
यः वितत्त्ववतेऽत्र यं तु न तथा तस्मात् प्रामाण्यमेवेति एवं सिद्धान्तवादिनाऽपौरुषेयत्वेन प्रामाण्ये साधितेऽपरं पूर्वपक्षभाष्य
स्यादेतदित्यादितस्य तात्पर्यमाह एवमिति· अत्र सिद्धान्तवादिनाऽत्रैव संबंधनित्यत्वमंगीकृत्य स्वतः प्रामाण्ये साधिते पूर्वप
क्षवादी संबंधस्यैव नित्यत्वमनंगीकुर्वाणः संबंधाभावेनावस्तुत्वं प्रतिपादयतीत्यर्थः· स्यादित्यादि ग्रन्थेन भाष्यग्रन्थः
संबंधाभावमुपपादयति तथाहीति क्षुरादीत्यादि शब्देन मोदकग्रहणं पाटनादीत्यत्र पूरणग्रहणं· न चेदमुक्तं संबंधने
ः समानदेशतानियमाभावात् नहि पित्रादिः सर्वदा पुत्रादिदेशे एवावतिष्ठते संयोगस्य चात्र सिद्धान्तिनानंगीकारात् त्रि
राकरणं चायुक्तमसत्यमेव नत्र संबंधान्तरस्यासंभवात् परिशेषात् संयोग एवावशिष्यते· लौकिकानां तत्रैव संबंधप्रसिद्धेः
संयोगिनोश्चैकत्र सद्भावदर्शनात् क्षुरशब्दवत्तदर्थस्यापि मुखे सद्भावापत्तेः पाटनं मोदकसद्भावे च पूरणं स्यादिति यु

राम० ७८ 78 क्रमेवतन्निराकरणं। अपमत्र प्रयोगः शब्दोर्थेनन संयुज्यते अर्थदेशानन्तरमदर्शनात् विंध्योहिमवता यथेति संबंधांत
रंनिराकरोति नचेति भिन्नसामग्रीकत्वादित्यपि हेतुर्बोद्धव्यः एतमेव संबंधमुपपादयितुं शंकते नचेति। शब्दः किं वस्तुमा
त्रं वा स्फोटो वा जातिर्वा ध्यानं वेत्यादिविकल्पेन शब्दस्य दुर्निरूपत्वं· तथार्थोपि किं व्यक्तिर्वाकृतिर्वा संबंधो वा समुदायो वेत्या
दिविकल्पेनार्थस्य दुर्निरूपत्वमित्यर्थः· दूषयति नैवमिति· ननु संयोगाभावेपि समवायादिसंबंधान्तरं भविष्यतीत्यत्राह सं
बंधान्तरमिति· नतावत्समवायः युतसिद्धत्वात्· संयोगसमवाययोरभावे चैतद्व्यतिरिक्तसंबंधान्तराभावः· नाप्याश्रयाश्रयिभावः·
आकाशपृथिव्यादिभिन्नाश्रयसंगत्वादितिभावः सिद्धान्तमतं संबंधमाशंकते प्रत्याय्येति॥ परिहरति नेति॥ कथंतर्हि
गामानयेत्यादिशब्दश्रवणानन्तरं पुरुषस्य निष्कंप प्रवृत्तिरत्राह लौकिक इति। समाधत्ते स्यादेवमिति· कथं संबंधाभावे
प्रत्यायकत्वमत आह· स्वभावत इति वाच्यवाचकशक्तिद्वयाभिप्रायोयं न संधान्तरं स्वाभिधेयं प्रत्यपेक्षत इतिभावः· ननु किमि
दं वाचकत्वं नाम· नतावज्ज्ञापकत्वं धूमादेरपि वाचकत्वप्रसंगात्· नाप्यात्मसादृश्येन गमकत्वं· प्रतिबिंबस्यापि वाचकत्वप्रसंगा
त्· नाप्यात्माध्यासेन गमकत्वं· अध्यासस्य निरस्तत्वात्· नाप्यात्माभेदेन गमकत्वं· अभेदे गम्यगमकत्वानुपपत्तेः· नापि रूप राम
त्रपादिरहितं गमकत्वं चक्षुरादेरपि वाचकत्वप्रसंगात्· नैवं अभिधानस्यैव वाचकत्वात्· नचाभिधानमेव न ज्ञायते किंतदिति ७८

तत्राह- पूर्वं दर्शितं- यथेन्द्रियसन्निकर्षमपेक्षमाणो लिंगादिकं वा व्याप्त्यादि- तथायमत्र भवति किंतु सन्निकर्षापन्नमपेक्षमेव पद
र्मवैगुण्यादिति। तदप्यसत्। अतत्कर्मणां फलस्यानिर्निमित्तत्वापत्तेः। नन्वेवं स्वर्गस्यापि कालविशेषाश्रवणादनियमः स्या
तान्नस्वाज्ञाधेतस्यामुष्मिकफलत्वसाधनात्। यश्वादीनामप्यैहिकत्वं योगसिध्याधिकरणे वक्ष्यत इति चेत् न तत्रोप्यामु
98
ष्मिकत्वमेवेति पर्वपक्षं विधायैहिकत्वमप्यस्तीत्यनियमेनैव सिद्धांतकरणात्। यथाहुः यदा कदाचिद्भवदेतद्धि व्य
ते फलं हि यश्वादिनसां परायिकं। तथास्थितस्यैव च तस्य साधनं विधीयते योपि भस्त्रावदान्वितः॥१ साधारणं यत्तु
फलं हि नास्वभावतस्मादशमेव चेष्टं। सर्वस्य चासन्नतयैव कांक्षितं वृष्ट्यादितस्त्वैहिकमेव युक्तं॥२ कर्मिपदे मविशिष्टेय
द्यपि श्रूयते यथा न भवति फलविशेषो नान्यथा काम्यते हि। फलति यदिन सर्वं तत्कदाचित्तदैव ध्रुवमपरमयुक्तं क
र्मशास्त्रीयमास्ते॥३॥ ॥इति चित्राक्षेपपरिहारः॥ ॥एवं तावच्चित्राक्षेपं परिहृत्य संप्रति वाक्यांतरादृष्ट— तां०
विरोधं परिहर्तुमनुवदति। यच्चेति। परिहरति तदिति। अर्थवादस्य निरालंबनत्वस्यानुपपत्तिमाशंक्याह न चेति। सो ९८

पिहि यत्तायुष्मीत्वनश्चाक्यातवक्तुमितिसंबंधः।तदुक्तंसाक्षाद्यद्यपिसंबंधोनात्मनोयत्नसाधनैः।तथापि
तत्सर्गाद्युत्पत्ताश्शरीरद्वारकोभवतीतिननुपुष्करपलाशवन्निर्लेपस्यकथंकर्तृत्वादिरूपपत्तिरितत्राहनही
तिसांख्यमतएवात्मनस्तत्प्यात्मनाऽस्मोकंवेदप्रामाण्यवादिनामितिभावः।येनेति।व्यापकस्यस्यंदासंभवादि
तिभावः।नन्वकर्तृत्वमप्यात्मनउपनिषत्सुश्रूयतेतत्राहश्रुतीति।किंपुनरिति।ननुयत्तायुष्मवाक्यस्यादित्यप
पादिवाक्यवदर्थवादतयापिनेतुशक्यत्वात्देहातिरिक्तात्मप्रतिपादनंव्यर्थं।सत्यंपानेशाम्येहिसाध्यसाधन
संबंधप्रतिपादिकानांचोदनानामप्रामाण्यमापद्येतातथाहि।स्वर्गकामश्चोदनादिभिर्हिस्वर्गस्यामुष्मिकत्वा
ब त्तजन्मांतरफलोपभोगोबोध्यातसोपिकर्तुरन्यस्यतत्तस्यज्ञानमात्रात्वतेषामैहलौकिकत्वात्कर्तृत्वभोक्तृत्वा
नुपपत्तेःशरीरचैतन्येपितस्यविनिपातात्अतिरिक्तस्यचकस्यचिदात्मनोऽनंगीकारात्।इष्ट्यादेश्चादत्तफलत्वा
पातात्तद्वचनस्याप्रामाण्यंस्यादिति।यत्तायुष्मिवाक्यसामर्थ्यबलेनदेहातिरिक्तात्मप्रतिपादनेतस्यामाण्यापा
र्थमेवेति।यथाहुः।तस्माद्वेदप्रमाणार्थमात्मात्रप्रतिपाद्यतेयद्यपिप्रकृतवाक्यंव्याख्यायेनार्थवादतः॥य
थाभाष्यंतावदाहप्राणानादीति।योसौप्राणित्यपानितितन्मृच्छ्वसितिनिमिषमात्पादिचेष्टितवान्सोत्रशरीरयत्ना

99

पुधीत्यर्थः। षु क्तंय न्तरमाहत्त यो मो प्राणा। एत्त देवविवृणोति प्राणानादीति। कथंनसंभवेत्यतत्र्याहत्र्ययाव
दितितदभावेपीति। द्रव्यविनाशाभावेशरीरेसत्यपीत्यर्थः। पुक्तंय न्तरमाहतथेति। तदिदमिति। त्र्ययावछ
रीरभाविन्नं। परप्रत्यक्षायाग्यत्वं चेति द्वयमित्यर्थः। ननुकाश्यादीनामपि देहगुणानामयावद्दिहभावित्वं
दृष्टं॥ काश्यादिवस्थांतरं तत्रास्तीति चेत्। नत्र्यत्रापिमत्पुरावावस्थांतरमस्त्वेवेतिवक्तुं शक्यत्वात्। त्र्यातानाया
वंद्देहभाषित्वंनशरीरगुणत्वनिवृत्तिरिति। मेवंप्राणादीनांशरीरगुणत्वात्तदपगमस्यनिनिमित्तत्वापत्तेः। त
थाहिद्रव्यविनाशाहुतांतन्त्रारापनिपाताद्वागुणस्यविनाशोदृष्टः। नचप्राणाद्यपगतरूपस्यमत्योरन्यत्तरदपि
निमित्तमत्रास्तिपापमितिचेत्। न। तस्यात्मगुणत्वेनशरीरधर्मत्वाभावात्। त्र्यतोमत्यो शरीरावस्थांतरत्वाभा
वात्ननकाश्यादिनुल्यतेति। वस्कुतत्स्कुकश्यादीनांरूपादिवद्गुणत्वमेवनास्तीति। ननुकथंशरीरगुणत्वनिराक
रणेनान्यगुणत्वासिद्धिरतत्र्याहसत्चपतीति। सुखादयः क्वचिदाश्रिताः गुणत्वाद्रसादिवत्तयत्राश्रिताः सत्र्या
त्मेतिभावः॥ दूषणांतरमाहकिंचेति। त्र्यात्रेवमतांतरमाशंक्यनिराकरोतिकश्चिदिति। त्र्यन्यथेतिवेदितुरनव
भासेइत्यर्थः। नचेति। शरीरस्यतथावभासेतास्येवेत्तंत्वंस्यादितिभावः। नहीति। यदिसन्निवशएवशरीरंस्या

त्ततदा तद्प्रतिभासे शारीराप्रतिभासः स्यादिति भावः। न चेत्तेति। तत्प्रतिभासेऽप्यहमाकारास्त्रेरवः स्यादिति भा
वः॥ दूषणमुपसंहरति तस्मादिति॥ मतान्तरमवतारयितुं स्वोक्तमर्थमनुवदति॥ पूर्वोक्तादिति॥ श्लोकचतुर्थपा
दं व्याचष्टे नहीति। नत्वहं जानामीति ज्ञानाश्रय उपलभ्यत एव तत्राह ज्ञानमेवेति॥ अत्राशंकते नन्विति। पूर्वेद्युर्दृ
ष्टे परेद्युरहमिदमद्राक्षमिति भवति प्रत्ययः। स च प्रत्यगात्मन्येवोपपद्यते नान्यत्रेत्यर्थः। इष्टाप्युपलब्धिस
मानकर्तृका सती ज्ञानातिरिक्तं स्थायिनमात्मानमुपकल्पयतीत्यर्थः॥ परिहरति सत्यमिति। ननु योऽहमद्राक्षं
स एवाहमनुपश्यामीत्युपलब्धेः स्मर्तुः क्षणिकत्वं इष्टमेव तत्राह एकस्येति। संतत्यभेदेन तदुपपत्तेरिति भावः॥ य
दुक्तं संतानैकत्वादेवोपपत्तेरिति तत्परिहरति विषयेति। यदि विषयप्रत्यभिज्ञा अन्यथानुपपत्त्या ज्ञातुरेक
त्वं कल्प्येत तदा हि तद् दुस्तरं स्यादित्यर्थः। प्रत्यभिज्ञास्वरूपमाह योऽहमिति। योऽहमित्यादौ ज्ञातैवाहं प्रत्ययस्य वि
षयः तद्यदाहं बुद्धिर्ज्ञानालंबनी तदा ज्ञानातिरिक्तः एको ज्ञाता सिध्यतीत्यर्थः॥ प्रयोगश्च। ह्यस्तनाहंमति
र्ग्राह्यो ज्ञाता तद्याप्यनुवर्तते अहंप्रत्ययगम्यत्वादिदानीन्तनवोद्धृवत्॥ अत्र चोदयति। किमिति। शरीरमेवाहंबु
द्धिगोचर इति संबंधः। अतस्तस्यैवाहंबुद्धिगोचरत्वात् ज्ञातृत्वमापद्यत इति भावः। उक्तं चात्राहं यामीत्यहंशब्द

शारीरार्थः प्रयुज्यते गंगं चात्तस्य नद्यात्मा गमनं प्रतिपद्यते॥ समाधत्ते - उच्यत इति। परानिदमिति परामृशत्रा
तीत्यनुषंगः। कथं तर्हि देहेऽहं प्रत्ययः। अज्ञातविवेकानां भ्रांत्येति भ्रमः। ज्ञातविवेकानां तु नास्त्येव। तेषामपि ज्ञा
इत्वविषयकं अहमिति जानामीति च ज्ञानमनुवर्त्तत एव। यथाहुः जानाम्यहमितीदं ज्ञानं नैव निवर्त्तते। तात्त्वि
कृत्तौ न तेषां स्याध्यानशिष्योपदेशानो। समानविषयबुद्धिधारणो वध्यानेन च स्वात्मन्यहं बुद्धेरन्या बुद्धिः संभव
ति। अतोस्ति योगिनामप्यहंमानः। तथा जानामीत्येवमात्मातमनवगाढतः कथं शिष्योपदेशप्रवृत्तिः। ईश्वरपात
च योगीश्वरस्यापि वासुदेवस्यार्जुनोपदेशप्रवृत्तिरिति हं मानश्च। अहं सर्वस्य जगत इत्यादिभिरिति। फलितमा
ह तेनेति। अस्य। अहं प्रत्ययस्येत्यर्थः। ननु शरीरमेवाहं प्रत्ययगोचरत्वात् ज्ञानं नेत्याह शरीरस्येति। ज्ञानादि
गुणाश्रयनिराकरणेन निराकृतमित्यर्थः। किं चैवंभूतचैतन्यवादी प्रष्टव्यः पंचभूतात्मके शरीरे किं सर्वाणि चेत
यन्ते किं वैकमिति। आद्ये सर्वेषां समत्वात्परस्परमसंबंधापत्तिः। एकचैतन्ये तु। इतरेण विनापि लोष्टादावपि
पृथिव्यादिकस्य चैतन्यस्यान्तरनहितस्य चैतन्येन्यदपेक्षणीयमस्ति। प्रयोगश्च। अयं शरीरगतो भूतान्तरास
स्पृष्टा पृथिवी सा न चेतयते पृथिवीत्वात् लोष्टवत्। एवं जलादावपि दर्शयितव्यानानुकारूर्पादि सामानाधिक

रणापादेहविषयोहंप्रत्ययःस्यादतआहआतइति।देहात्मनोरभेदभ्रमादेहगतंकार्श्यादिकमात्मन्यध्य
स्यतइतिभावः।भ्रांतिश्चकारणमाहतथेति।एवमिंद्रियाणामप्यस्मदर्थाद्भेदग्रहणमशास्त्रज्ञत्वात्।।
यथाहुःइदंमईदर्शनत्वक्षुभीनामभ्रांतमित्यपि।इंद्रियेष्वपिभेदेनव्यवहारश्चदृश्यतइति।ननुत्वल्पच्चेक
थमभेदप्रतीतिरेवभ्रांतिःस्यादतआहततइति।उक्तन्यायेनशरीरस्यज्ञानत्वासिद्धेःज्ञानगोचराहंप्र
त्ययविषयत्वविरोधात्ज्ञातुर्भिन्नेपिशरीरेतत्संसर्गज्ञातायमभेदभ्रमइत्यर्थः।ननुममशरीरमिति
वन्ममात्मेत्यपिभेदव्यपदेशोस्तिनायमर्थोममात्मनाज्ञातइतितत्रआत्मनोन्यदात्मान्तरंप्रसज्येतानान
वदोषः।ज्ञानस्यैवावस्थारूपेणात्मनोभिन्नत्वात्ममेतिभेदव्यपदेशोपपत्तेःनचेहशानज्ञानशरीरा
तिरिक्तंवस्त्वंतरंप्रतीयातयेनात्मांतराप्राप्तिः।।स्याता।भेदस्यज्ञानहेतुकचातननुनैतावताघटपटयोरि
वशरीरात्मनोर्भेदःसिध्यत्यतआहनचापीतितत्रश्रुतार्थापत्तिंदर्शयतिस्वर्गेति।श्रुतिमुदाहरतिश्चवि
नाशीतिननुनास्तिकान्प्रतिश्रुत्युपन्यासोऽयुक्तःनह्यनेनतेप्रतिबोधयितुंशक्यंतेतसत्याउक्तयुक्त्यैव
नत्वतिबोधनात्।यत्तावदवादीशिष्यःयोवाविज्ञानघनएवैतेभ्योभूतेभ्यःसमुत्थायतान्येवानुपरपति

रा०म०
१०१

101

नचेत्यसंज्ञास्तीतिमन्तव्येतच्चैतन्याभिधानाज्ञानश्रोतिर्वेदविरोधमात्मनोमन्यतेऽतइतिबोधनायश्चेत्युपरन्या
सरन्तिविरोधपरिहारंचग्रन्थकारएवायन्तुविज्ञानघनइत्यादिनाग्रन्थेनदर्शयेति।गूढाभिसंधिः इष्टेतिक
थमिति।तत्किमात्मनोभानमेवनास्ति।अस्तीत्याहलब्धावपीति।विषयवज्ज्ञासतेननुज्ञातृत्वेनेतिभावः॥
प्रतिबन्धापरिहरिष्यन्नष्टइतिकः पुनरिति।ननुविषयघटादीनिभासन्तइत्युक्तमेवासत्यन्तर्धापितत्व
संविन्निक्रियाकर्तृत्वेनैवभासात्तदन्तस्तत्स्योदोषइत्याहतस्मादिति।चोदयतिव्यवहारेति।तच्चघटादिष्वेव
संभवतीतिभावः।परिहरतिभवत्विति।भासनरूपस्यफलस्यव्यवहारांगीकारात्तुल्योविरोधइत्यर्थः।परेति।
परसमवेतक्रियाफलभागित्वंकर्मत्वंतच्चात्मनिज्ञातरिविरुद्धमित्यभिप्रायः।एतदप्ययुक्तमित्याहतच्चेति
।लोकेनावदुदाहरतियथेति।नचैवंगमनक्रियाकर्तुरपिकर्मत्वापत्तिरित्याशंक्यनिराकरोति।नचेति।उप
पादितमर्थंनिगमयतितस्मादिति।स्वात्माजनानां।मानसीनोमनोगम्यवृत्त्यर्थः।नदिति।तस्यभासमान
स्यावित्तिकर्मतायेवावभासइतिव्याप्तेरित्यर्थः।अन्यथासिद्धिमाशंक्यनिराकरोतिनवेति।पुरुषेति।मह रा०म०
द्विकारस्यैवंरूपगर्भधारणासंभवादितिभावः।स्वमतेऽक्तविरोधंपरिहरतियत्त्विति।असंबध्यमेवविदित्वा १०१

तियस्मादिति । इदानीमिन्द्रियातिरेकं प्रश्नपूर्वकमुपपादयति । कथमिति । मनसोऽपीन्द्रियत्वेनैकल्पनान्
नतान्त्वं शंकास्तीत्याह मनस्त्विति । ननुक्तं प्रमेवाक्षिचक्षुरादिकं किं मनसेत्यत उक्तं रूपादीति । सुखादिति
ना । र्थं न कल्पनमित्यर्थः । अत्रैवमतान्तरमाशंक्य निराकरोति येत्विति । अनुपपत्तिविरहेणेति तत्रापीति । इत काल
संबंधिनि स्मरणे पूर्वकालसंबंधिनः कथं न संभवति अतः कथं तयेव सिद्धिरित्याह तस्मादिति । वेदान्तिमतमुपपाद
यति । अथेति । ततश्च न कर्मकर्तृविरोधो भविष्यतीति भावः । परिहरति स्वप्रकाशस्येति । अर्थान्तरमिति । जाग्र
दवस्थायामर्थान्तरप्रकाशः सुषुप्त्यवस्थायां त्वात्मन एव केवलस्य प्रकाश इति भेद इत्यर्थः । निरुक्तमिति
नेतादिति । सुषुप्त्यवस्थायामानन्दप्रकाशोऽस्ति तत्सुखभागीन्द्रियविहीनस्यापीत्याह मुक्तेति । ननु सुषुप्तावा
नंदाप्रकाशे सुखमहमस्वाप्समिति व्यवहारः कथमत आह । दुःखेति । गुणवृत्तिमुपपादयति प्रबुद्धेहानि ॥
आत्मन्येव विचारान्तरमवतारयति स्वपुनरिति । ग्रंथो निगदव्याख्यातः । नविकमेवाद्वितीयमित्यादिश्रुते
रेवात्र प्रमाणमत आह येत्विति । तानेवाह ततः शंकुवत्सोऽस्मैकत्वनिश्चयायेत्युमितिसंबंधः । दृष्टान्तमे
वोपपादयति वोत्थितेति । सामान्याभिप्राये आवे लक्षणाभिप्रायमित्यर्थः । प्रसंगान्मोक्षस्वरूपं निरूपयितुमा

मारमतो। कः पुनरिति। मतांतरनिराकरणायंपः स्पष्टार्थः। मतांतरनिराकरणमुपसंहरन्स्वमतमनुसंधत्ते।।
किंचिदिति। मोक्षशब्दस्यान्वर्थतां दर्शयति। सोपमिति।। आ मोक्षवादिमतेन तावत्परिहरति नैवमिति।। अ
त्र चोदयति नन्विति।। समाधत्ते सत्यमिति। प्रियाप्रियशब्दयोर्विषयजन्यसुखदुःखयोरेव प्रयोगदर्शना
दिति भावः। तेषामेवेति। विप्रतिषिद्धसमवायेऽपसंस्पर्शस्वधर्मत्वमिति न्यायेनेत्यर्थः। इतश्चैवमित्याह किं
चेति। प्रकारांतरेणाशंकते नन्विति नहीति। उक्तं चाभियुक्तैः प्रेमानुपाधिः सुखात्मनि नोपलब्धः स प्रत्यगात्मनि
क्षेमेऽपि नित्यसिद्ध इति। अनुभवविरोधादुपहासेन परिहरति किमिति। दूषणांतरमाह यदाप्ति। अभ्युपेत्या
ह यदि वेति। कारणवक्तव्यतत्त्ववक्तुं न शक्यत इत्यभिप्रायः। अशक्तिमुपपादयति। विज्ञानमेवेति। स
माधत्ते उच्यत इति। एवमिति। तामेनमपि मुक्तावस्थायां प्रकृतिबलादेवांगीक्रियत इत्यर्थः।। अत्र मोक्षस्या
भावात्मत्वप्रतिपादनपरवार्त्तिकविरोधं परिहरति यदिवेति। अत्र सांख्याभिमतं मोक्षस्वरूपं निराकर्तुं सु
खोपभोगरूपश्चेद्यदि मोक्षः प्रकल्प्यते। स्वर्ग एव भवेद्देहपर्यायेण क्षयी च सः। न हि कारणवत्किंचिद रा०म०
क्षयित्वेन गम्यत इत्युक्तौ। तस्मात्कर्मक्षयादेवेत्यादिना मोक्षस्वरूपमुक्तं। तथा।। न चक्रियायाः कस्या १०२

श्चिदभावः फलमिष्यते। तत्त्वज्ञानात्मतत्त्वानां भोगानपवर्गक्रियासायायाऽतत्र प्रचयासत्त्वाद्देहो नोत्पद्यते पु
नः। कर्मजन्योपभोगार्थं शरीरं नः प्रवर्तते। तदभावे न कश्चिद्धि हेतुस्तत्रावतिष्ठते। मोक्षार्थी न प्रवर्तेत तत्र
काम्यनिषिद्धयोः। नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासया। प्रार्थ्यमानं फलं ज्ञातं न चानिष्टो भविष्यति
। आत्मज्ञे चैतदस्तीति तज्ज्ञानमुपयुज्यते। परमतमिति। परमतनिराकरणप्रसंगेनोक्तवादित्ति भावः। नन्वान
दमोक्षस्य स्वर्गं एवभाव देषइत्यनेन दूषितत्वात्कथं वार्त्तिकानुसारं तन्मतं स्यान्नासत्यं। मोक्षस्यानित्यत्वा
पत्तिरूपं दूषणमत्र तदुक्तरीत्या परिहर्तुं शक्यत्वात्ऽतो वार्त्तिकाभिमतमेवानंदरूपं मोक्षस्येति कस्यचिद्व्या
ख्यानुमतमित्यर्थः। स्वाभिप्रेतं वार्त्तिकाभिप्रायमाहत्र पारावितिति। एतदनंतरं मतांतरेणानुपन्यासादत्र चयु
क्ताभिधानादेतद्वार्त्तिकरूढमतमित्यर्थः। एतास्विव स्वमतं संस्थापयितुमानंदमोक्षवादिमतं दूषय
ति। नहीत्यादिना। कथंतसंभवत्यत आह नहीति। इंद्रियविषयोरभावे च दृष्ट्यादिशब्दवाच्यानां ज्ञानविशे
षाणामसंभवात्। नहि दृष्टुर्दृष्टेर्विपरिलोपो विद्यत इति यथाश्रुतमनुपपन्नं स्यादत आह। तानशक्त्याभिप्राय
मेवव्याख्येयमिति भावः। उपपादितमर्थं निगमयति। तस्मादिति। ननु ज्ञानवाचकस्य दृष्ट्यादिशब्दस्य कथं

शक्तिपरत्वमतत्रात एवाहेति। वाक्यान्तरं योजयति तथेति। नज्ञानुज्ञातिर्विपरिलोपो विद्यत इत्यस्याप्ये
वं योजनेत्यर्थः। ननु स्तको नाम षष्ठ्यात्पादिशब्दानां शक्तिपरत्वं विज्ञानं ब्रह्मेत्यादीनां नुकपमतत्राह एवमिति॥
नन्वेवं श्रुतहान्यश्रुतकल्पनाप्रसंगो नेत्याह स्वयमिति। श्रुतिरुक्तत्वात् तद्व्याख्याने नायं दोष इति भावः। एतदेव दर्शी
यति विज्ञानेत्यादिना। षष्ठाध्याय इति॥ उपनिषद एव षष्ठाध्याय इत्यर्थः। श्रुतिरुक्तं व्याख्यानमुपसंहरति तेने
ति। चोदयति यदीति। परिहरति ज्ञानेति। एवमिति। अर्थान्तरज्ञानं नित्यात्मत्वे सतीति संबन्धः। निगमयति तस्मादि
ति। वेदेति। मा तन्नस्मभ्यं धातु शंकते नन्विति। निराकरोति नेति। यस्मिन्नस्त्विति। यस्मिन्सति प्रकाशात एवार्थान्त
रं न ज्ञानशब्दवाच्यतापत्तेरित्यर्थः करणात्। नचात्मनि सति किंचिदन्यत्प्रकाशते। अतो न ज्ञानरूपत्वमात्मन इत्यर्थः।
एवमानंदरूपत्वमपि न संभवतीत्याह तथेति। सामानाधिकरण्यानुपपत्त्या भेदमात्रांशं निराकरोति यदिति। दृष्टंत
द्विषयस्पर्शकात नन्विति। इतश्चाभेद इत्याह किंचेति। युक्त्यंतरमाह किंचेति। अस्तु नाम सुषुप्तितुल्यता नतेत्याह किमतत्रा
ह नचेति। एतावतीति। संसारे सुखदुःखसंस्पर्शः मोक्षे तु तदभाव इति। एवमनंगीकारे दोषमाह आत्मा हीति॥ शांम० १०३
तस्मादेतदेव निष्कृष्टं मोक्षस्वरूपं वक्तव्यमित्याह तेनेति। किमतो यद्येवमतत्राह नत्वेति। अपि सुखहानि

मन्तोपि मोक्षस्य दुःखनिवृत्त्यैव पुरुषार्थत्वं तदस्माकमपि तुल्यमित्याह तस्येति। उत्तरमाह येहीति। येषां धर्म्मा
बुध्यादिसंस्काराणां ताः तत्परित्यागेन स्वात्मन्यवस्थानमित्यर्थः। इतोप्येवमित्याह किंचेति। नन्वत्र विज्ञाना ये
ति ज्ञानसन्तानस्य प्रतीतेर्न ज्ञानमभवतीत्यत्र इत्यनुपपन्नमित्याह नहीति। तत्कथं ज्ञानाभावकथनं। पुरुषार्थ
त्वसामान्यादिति। सुखदुःखभावयोः पुरुषार्थत्वं समानमतो दुःखाभावे सुखत्वमुपचर्यत इत्यर्थः। वाक्यान्त
रविरोधे सत्येवमेवकल्पयितुं युक्तमिति वृद्धसंमत्या दृढयति उक्तमिति। बहुत्वोपि षष्प्यवदितव्यमितिन्या
येनोक्तमेवार्थं पुनराह तस्मादिति। उत्पाद्यानां धर्म्माणामनित्यत्वमिति संबंधः। एतदर्थसंवादकं च वार्त्ति
कमस्माभिः पूर्वमभिलिखितं। तदत्रानुसंधेयं। यदुक्तमात्मज्ञानेन विरोधादिति तत्रात्रांकतेनच्छित्ति। पुरु
षार्थीविहितनिषेधयसफलतयाविरोधः स्यादितिभावः। क्रवैयर्थ्याच्चेतावत्संयोगं दर्शयति। यत्तावदित्या
दिना। तस्मादेतज्ज्ञानं दृष्टप्रयोगिवाक्रवर्यमित्यत्रनापानिपुनरित्यादिना विवेक इत्यप्रसन्न पुरुषार्थीवप्र
दर्शने। कर्मज्ञानवदिति दृष्टान्तार्थं विवृणोति यथाहीति। दार्ष्टान्तिके योजयति तस्येति। नन्वनुमानादि
नाप्यात्मज्ञानं सिध्यतीति किमनेनेत्यत आह तद्यदीति। योहं स्थूलोहं गच्छामीत्यादिशरीर एवाहंमानदर्शना

राम०
१०४

104

त्प्रमाणान्तरप्रतिपादितोप्यात्मनः शरीरादिविवेको न स्वरूपेण हृदये च तिष्ठतीति भावः। अत्र वार्त्तिककृत्सम
तिं दर्शयति यथोक्तमिति नित्यात्मसत्तामात्रेणैव चेद् प्रमाणापेक्षितं तस्मात् इह भाष्यकारेण प्रतिपादि
तं दार्ढ्यार्थमिति स्फुटवेदान्तविहितश्रवणमनननिदिध्यासनादिषु यतितव्यमिति श्लोकतात्पर्यार्थः। एते
न भाष्यकारस्याप्ययमाशयो लक्ष्यते यत् नित्यत्वमात्रप्रतिपादकवेदान्तवाक्योदाहरणात् अकर्त्रभो
क्त्रात्मप्रतिपादकवाक्यानुदाहरणाच्च तदुदाहरणे हि कर्तृशरणानां कर्मणि शैथिल्यापत्तेरिति। नन्वात्म
ज्ञानस्य स्वतन्त्रस्य निःश्रेयससाधनत्वेन विहितत्वात् कर्मतन्त्रस्य तद्वैयर्थ्यमत आह यतिवितीत्युक्तं च। आत्मज्ञानं च
न्ये तन्मोक्षार्थं न च चोदितं कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य तस्यात-विविक्तज्ञानस्य पारलौकिकफलेषु ज्योति
ष्टोमादिषु प्रवृत्तिदृष्टमेव प्रयोजनमित्यर्थः। पुरुषार्थत्वमात्मज्ञानमुदाहरति। यानि पुनरिति। उपासना
त्मकस्य तु ज्ञानस्य कर्मणि पुरुषे वा दृष्टप्रयोजनाभावात् अदृष्टापेक्षायां अन्याद्यभावेन चक्रत्वर्थत्वा
सम्भवात् वाक्यशेषोपनीताभ्युदयनिःश्रेयसफलतया पुरुषार्थत्वमेवेति समस्तार्थः। युक्तिभिः श्रुतिभि राम०
श्चात्मनित्यत्वं प्रतिपादितं वाक्यान्तरोत्थितमन्त्रान्तेः शंकेदानीं निरस्यति यद्वितीति तस्य यामवब्राह्मणेन १०४

परिहार उक्त इति संबंधः। उक्तं चासद्दसन्नात्रपनाइपाज्ञ परकीर्त्तनमरूपा। चोदितः पूर्वपक्षोपामिति
सिद्धांतमग्रचीत। उक्तमेवार्थं स्पष्टयति एतदिति। अत्रैव सिद्धांतेऽक्षाति व्याख्यानपरं वार्त्तिकमुदाहरति। न
उक्तमिति। अत्र पादत्रयेणैव सिद्धांतेऽक्षाति व्याख्यानोपपत्तेश्च तुर्यपादानर्थक्यं तटस्थः शंकते। किमिति। प्र
करणार्थोपसंहारपरत्वमजानानस्य समाधानशंकां निराकरोति। यदीति। स्वयं समाधत्ते सत्यमिति। स्वर्गलोकं
यत्नीत्पस्य न प्रत्यक्षविरोध इति संबंधः। अत्र हेतुः नित्यस्य स्वर्गगमनसंभवादिति। नन्वसक्तनामानित्यत्वमा
त्मनस्तथापि मये कर्मकाले कृतमकृतस्यामुष्य कर्मणः फलमिदं मयामुत्पन्न इति अपरामृशतः कर्मणः पुनरा
गाभावान्नानुष्ठानस्यानन्तर्यात् स्वोपभोगे परोपभोगे वा न कश्चिद्विशेषः स्यात् यो यस्य कर्मणः फलसा
धनत्वं फलकालेऽनुसंधास्यामीति निरूपयति स कर्मानुतिष्ठति नान्यः। एवं निश्छिद्रमपि नवजीयन्नन्तरख्या
जित्यपक्षवन्नित्यत्वपक्षेऽप्यात्मनः तेनतनाशाद्धतागमो फलतत् इति। यथाहुः नित्यः कर्तृत्वभोक्तृत्वे प्रति
पन्नोऽपि सन्न यदा न कर्मफलसंबंधफलकाले च बुध्यते। मया यत्पुरा कृतं कर्म तस्येदं भुज्यते फलं। शुभा
शुभं मयैवेति तदा कोऽस्य रसो भाववतां। अपरामृश्यमाने हि स्वकर्मप्रत्यये फलानविरोधो भवेत् कश्चित्स्व

रा०म०
१०५

105

परात्मोपभोगयोः कुर्वन्नप्यश्नुअंकर्मातानेवं चिंतयन्नरः। नस्मरिष्यामिभोगेहमिति तानेव विवर्जयेत्।
तत्र नित्यत्वपक्षेपि कृतनाशाकृताभ्यागमौ फलतस्त्कल्परूपो वेन्नदृष्यात्तत्रातिपादनं। निषेदोषः। भोग
कालीनस्मृतेः कर्मणि प्रवृत्तौ निवृत्तौ वा न कश्चिदुपयोगः भोगस्य प्रवृत्त्युत्तरकालीनत्वात्। यस्तु प्रवृत्त्य
गमत् तः शास्त्रतः परामर्शीः फलसाधनत्वपरामर्शीः स प्रवृत्तेः पूर्वमस्त्येव। भोगकालेपि वा। विदुषा
मस्त्येव परामर्शीः अविदुषां त्वतदभावेपि न दोषः यथाहुः निषदोषो न भोगे हि। स्मृतिर्नः उपयुज्यते॥
न प्रवृत्तिर्निवृत्तिर्वा भोगकाले स्मृतेर्भवेत्। तादृगयः परामर्शीस्तदस्तित्वेवचस्त्व्यते प्राकृ प्रवृत्तेश्चसोस्त्येव
विदुषां शास्त्रतः स्फुटः। भोगकालेपि शास्त्रज्ञा विमृशंत्येव केचन। तेषामेवाधिकारश्च मामदविदुषां हि स
इति॥ इत्यात्मवादः। कर्म। कतत्र दृशनात् तानन्त्वोत्पत्तिकस्तत्रोपात्र शब्दार्थसंबंधनित्यत्वेन वेदप्रामाण्य
रापासि द्धरसंगतः शब्दाधिकरणारंभः निष्प्रयोजनश्चायं विचारः असत्यपि नित्यत्वे वेदप्रामाण्यपसिद्धेः अ
नित्यादपि शाब्दादनित्यत्ववादिनामिवार्थप्रतीतिसंभवात्। शाब्दव्यवहाराणां नाहितपाचपुरुषानुप्रवे
शाभावात्। अनित्यत्वे संबंधनित्यत्वं न सिध्यतीति चेन्न मासेसीन्। अनित्येपि तस्मिन्पुरुषस्वातंत्र्याभा रा०म०
१०५

वादेवप्रामाणापसिद्धेरव्याहतत्वाच्चित्यपाशंकासंगतिं तावत्करोति। शब्दस्येति। कथमनित्यत्वे प्रत्यायकत्वहानिरत आ
आह नहीति। नहि क्षणिकस्य संबंधग्रहणसंभवस्तिजदनपेक्षायां चानन्तादिवत्प्रथमश्रवणोऽपि प्रत्यायायेत अतः
शब्दस्यार्थं प्रत्यायेत अतः शब्दस्यार्थप्रत्यायकत्वान्सम्बन्धानिर्निमित्ते वेचेदादर्थप्रतीतिः स्यादिति भावः। कथं
तर्हि लोके शब्दादर्थप्रतीतिः। निर्मलैरपि विज्ञानैर्दृष्टार्थेषु गतिसंभवादिति ब्रूमः। शब्देकसमाधिगम्ये धर्मे तद
नुपपत्तेः। व्यवहाराणनादित्वेनोपपत्तिरिति चेत् न शब्दस्यानित्यत्वे तदनुपपत्तेः। तदिहाधिकरणोपदर्शनकः श
ब्दउदाहरणं। स किमनित्यः किं वा नित्य इति संदेहे पूर्वपक्षे अनित्यत्वं प्रश्नपूर्वकमुपपादयति कथमिति। नन्व
भिव्यक्तावपि प्रपन्नानन्तर्येऽप्युपपत्तेर्नैकान्ततोऽनित्यत्वसिद्धिरित्याशंकानिराकरणायसत्यं तत्त्रायं चमत्कार्य
कर्मजन्यत्वमेकोनेयायिकादयः शब्दस्यमन्यन्ते नुतः तत्र दर्शनात् तस्मिन्कर्मणि सति शब्ददर्शनात् अतः
कृतकत्वात् अनित्यः शब्द इत्यवगच्छामः। ए नन्वत्र चिन्तमनुमानं कृतकमेवाभिव्यक्तौ पवाप्यथारितिचेत् न त्वा
भिव्यक्तेः प्राक् शब्दसद्भावप्रमाणाभावात् अस्थानादिस्यनेनस्वचितहेतं तरमाहत उपलब्धेः स्यात्ति। उच्चारणां
तरमसहतेमप्यवस्थानाभावाद्विनष्टः शब्द इत्यवसीयत इत्यर्थः। किंच शब्दं ब्रुत्वरूशब्दमाकार्षीरित्यादिक

रामं०
१०६

106

रोतिशब्दव्यवहारादप्यनित्यः शब्दः तदिदमुक्तं करोतिशब्दादिति। हेतुगतविशेषणासिद्धिमाशंक्य तन्निराकरो
ति नचेति। शब्दसंस्कारपक्षे दूषणमाह शब्दस्येति। नित्यत्वपक्षे सर्वगतोयं शब्दः तद्देशोऽसंस्कृतः सर्वैः पुरुषैः
श्रूयेत। कृतकत्वेतु प्रादेशिकत्वान्नायं दोष इतिभावः। ननु शब्दैकदेशो ध्वनिभिः संस्कृतः स दूरवर्त्तिनां श्रोत्रेण
प्राप्तः कथं तेष्वणुपुरत आह अनन्वयत्वेनेति। अत्र वर्त्तिककृत्संमतिमाह तदिदमिति। शब्दः सांक्रियत्वेपदिति भागस्य
विभागोत्पादकदेशापिसंक्रियेत श्लोकशेषः। नन्वाधारद्वारकएवास्य ध्वनिभिः संस्कारः अतो यएवाधारः संस्कृतः
सन्समीपगतिरेव पुरुषैर्गृह्यात नदूरस्थैः मैवं। व्योमात्मादिवद्शब्दस्य निराधारत्वात्। आकाशएवाधार इतिचेत्
तानतस्य निरवयवत्वेन प्रदेशसंस्कारासंभवात्। श्रोत्रसंस्कारपक्षेप्युक्तमेवदोषमतिदिशति श्रोत्रेति। कारणा
देमतेत्राकाशं श्रोत्रं सांख्यमते ऽहंकारः मीमांसकमते दिक् श्रोत्रं मतत्रयेप्येकत्वादिकं समानं अतः सार्वष
शब्दोपलब्धिः स्यादित्यर्थः। अनित्यत्ववादिमते तु कर्णशष्कुल्याएव श्रोत्रत्वान्नायं दोष इतिभावः। अत्रा
पिसंमतिमाह तदिदमिति। विभुत्वात्प्राप्तितुल्यत्वात्। दूरभावविप्रकर्षाद्वानामिति शेषं प्रसज्येत। श्रोत्रस्यापिचे रामं० १०६
वमेकत्वं सर्वप्राणभृतां भवेत्। तेनैकश्रुतिवेलायां सर्वेषु पुंसु सर्वप्रवर्तेत। तस्यानवयवत्वादनधर्माधर्मसंस्कृ

तः तमोमागोमावद्योत्रंव्यवस्थाद्व्युपसिद्धपोवैशेषिकासिद्धांतेषेवंतावत्प्रसज्यते। कापिलेपिविमुखेनश्रो
त्रादेरूपमेवादित्तिजिज्ञप्यशेषः। दूषणांतरमपिश्रोत्रसंस्कारपक्षे दर्शयति। श्रासिश्वेति। अत्रापिसंमाति
माहृतेदिदमिति। सर्वशब्दानवबोधप्रसंगायेतायदापाल्मीलितं चक्षुः पटं नहि न बुध्यते। इति श्लोकशेषः। दूषणा
मेवदर्शयति। सार्वहानि। अत्रापिसंमातिमाहृतदिदमिति। विषयस्यापिसंस्कृतो। समानदेशवृत्तिवासंस्क
रोत्यविशेषतः [illegible]ष्ठिरवाद्यपनीत्याचसंस्कारोस्यभवन्नवेत। दृष्टंचावरणापायेतदेशान्योपलंभनं॥
संस्कृतासंस्कृतत्वेचशब्देकत्वेनासिध्यतः एकावस्थाम्युपेतोवासार्वशापत्तवानावेत्यादिशब्दग्रहीतोग्र
यः सर्वपक्षमुपसंहरति तस्मादित्यादि। पस्मामनित्यत्वेविमुच्यचशब्दस्यक्वचिदेवकस्यचिद्गृह्णाणइतिव्य
वस्थानावकल्पततस्मादिनित्यपर्थ्या। अत्रसर्वांतारचयोगपद्यादितिदेवंतरामिधानार्थंचतुर्थपूर्वपक्षस्य
त्रंतद्वारव्यानार्थंभाष्यंनानादेशादित्यादि। तदनुसंधत्ते। किंचेत्यादिना। तदनुसंधानंचपर्वपक्षोपपादिका
र्थविशेषप्रदर्शनार्थं॥ अत्रभाष्यपुस्तकेषुः नानादेशेषुचयुगपच्छब्दमुपलभामहेइतिपाठः। ग्रंथका
रस्तुनानादेशेष्ववस्थितिरित्यादिनासोपस्कृतेनपत्तिनवानित्यदोषः। नानादेशेषुसर्वांतरप्राणांतरयोग

राम०
१०७

107

पद्यात्र युगपदुपलभ्यमानत्वात्तन्नत्यकृतकएकोयुगपन्नानादेशोपपलब्धुंशक्यते कृतकत्वेनुकारणायतात्वन
सर्वमुपपद्यत इति सूत्रार्थः। भाष्यंव्याचेष्टे तान्नति। अग्निमंभाष्यमवतारयति नवेति। भाष्यार्थमुपसंहरति
तस्मादिति। उपपादितमर्थंवार्त्तिकोत्कंव करोति वार्त्तिकपीति अविभुत्वे हीति। तत्रैवंवार्त्तिकग्रंथः अविभुत्वपियु
गपान्नेकोनानावगम्यत्ते। कार्त्स्न्येन चावगम्यत्वादेकदेशो घटादिवत्। शब्दस्याविभुता। तस्मादनित्यतास्यमुखेवात्ता
राएकः सन्नेकदेशस्थोयादेकेन प्रयुज्यातान्नदाव क्रांतरेनस्पादेकव क्ते मुखादिचत्ता। कार्यत्वस्यक्रियाभे
दात्फलभेदः प्रतिक्रियंजनेकबुद्धिः सादृश्यादुपृष्टेम्यत्वेव कल्प्यत इति। नित्यत्वे इति। नकिंचिज्ज्ञान्तिकारणं की
मं देशाइतिन्यायात्तत्वेकत्वं विरुध्यत इति श्लोक ग्रंथः श्लोकार्थमाहन हीति। भाष्यकारोक्तंन्यायंविवृणोतितत्
प्येति। अपि चेत्यादिर्न तु शब्दस्य तो भाष्यग्रंथः तस्यार्थमाहन हीत्यादिना। अस्त्वेवं कथमेतावता कार्यत्वसि
द्धिरत आह तत्रश्चेति। स्वतंत्रसिद्धं। अनित्यत्ववादिनां शब्दासिद्धमित्यर्थः। पूर्वपक्षं निगमयति तस्मादिति। अत्रा
न्यदपि पूर्वपक्षसूत्र द्वयानद्यापा। प्रकृतिविकृत्योश्चा अत्र दर्शनादिति शेषः दध्याविश्यत्र इकारः प्रकृतिः
यकारो विकृतिः नत्वनित्यत्वे प्रकृतिविकृतिभावः संभवति। यद्विविक्रियातन्नदनित्यं अतः प्रकृतिविकृतिभा

राम०
१०७

वद्दर्शनादनित्यः शब्द इति तथाः वृद्धिश्च कर्तृभूम्नास्याकर्तृणां भूम्ना बहुत्वेनावृद्धिः महत्त्वमस्य शब्दस्योपल
भ्यत इति शेषः बहुषु शब्दमुच्चारयत्सु महाञ्छब्दः श्रूयते स यद्यभिव्यज्यते तदा बहुभिरल्पैश्चोच्चार्यमाणस्सा
वाने वोपलभ्येत वह्नत्यप्रदीपाभिव्यक्तघटादिवत्. कृतकत्वे रूपचितावयवत्वेन सर्वमुपपद्यत इत्यस्मान्नि
त्यकः शब्द इति उक्तं चाहेतुर्वृद्ध्यनुसारित्वात्कार्यतायां घटादिवत्। न हि दीपसहस्रेऽपि व्यञ्जकेवर्धते घटः वृद्धिः सू
त्रे पूर्वपक्षस्थावृद्धिस्तन्निराकृतिः पुनरन्येस्तु सिद्धान्तः वृद्धिरित्येष संग्रहः॥ सिद्धान्तं प्रतिजानीते इति प्राप्त इति॥
अत्र पूर्वपक्षनिराकरणसूत्रे षट्कमध्ये समं तु तत्र दर्शनमित्याद्यसूत्रान्तदभिप्रायेणाह प्रयत्नानन्तरमिति॥
वक्ष्यमाणयुक्तिकलापेन शब्दनित्यत्वसिद्धेः प्रयत्नानन्तरीयकत्वस्याभिव्यञ्जकत्वेनान्यथासिद्धत्वात्कृत
कत्वाप्रयोजकत्वमित्यभिप्रायः। नु शब्दः पक्षव्यावृत्त्यर्थः तत्र प्रयत्नात्प्रेकर्मणीति यत्र शब्दस्य दर्शनं
तदुत्पत्तिपक्षेऽभिव्यक्तिपक्षे च समं तुल्यमिति सूत्रार्थः उक्तदूषणमनूद्य परिहरति यदीत्यादिना। युक्तेऽर्थे
वार्त्तिककृदाशंसतिमाह तदुक्तमिति। सर्वो हि देहेष्विति पदं व्याचष्टे सर्वेति। आन्तरान्तरवार्त्तिकं पठति अन्तरेति। वा
र्त्तिकं व्याचष्टे अप्रसमर्थ इति प्रधानसमानरदशावस्थव्यभिचारं शङ्कते नत्विति। परिहरति नेति लोके कर्मापि

राम०
१०८

108

लक्षणामितिन्यापनात्तद्दर्शनबलादेवमंगीकृियत इतिभावः।नन्वाकाशमिंद्रियं तत्त्वेकमेवेतितत्राह यत्वितिनहि
तिनस्तस्येवं प्रकृतिकिमायातमतआहततस्त्वति।।तस्याकाशमात्रंश्रोत्रं किंतर्हि धर्माधर्मोपगृहीतविशिष्टशब्दानु
ष्टेतकर्णशष्कुल्यवच्छिन्नआतोयस्यतादृशीकर्णशष्कुलीनास्तिधर्माधर्मलोपेनवाताघातहतत्वात्तस्यसद्
प्याकाशेतदनवच्छिन्नत्वाद्भोगपमितिसंबधिरोभविष्यतीन्यपिष्ववस्थासिध्यतीतिभावः।ध्वनयो हीतिाशब्दोप
लब्धिव्यवस्थांदृष्ट्वातद्बलेनप्रतिवर्णंसंस्कारहेतुभूताध्वनिजातिभिन्नाः कल्प्यंतेततस्संयोगएवश्रोत्रस्यसंस्का
रोनसिर्वाघपनेपोयनातिप्रसंगःस्यादितिभावः।अथतात्वादिसंयोगविभागएवशब्दस्यकारणंनवायवी
यइत्युच्येततत्राहितस्यविजातीयत्वाद्धिलक्षणसामर्थ्याच्चव्यवस्थेतिभावःशब्दसंस्कारपक्षोक्तदूषणप
रिहारोपिध्वनिजातिभेदाश्रयणेनकर्तव्यइत्याहशब्देतिाननुविजातीयानामवयवानामेवप्रतीपादीनाघटाद्यामि
व्यंजकत्वंदृष्टमतआहदृष्टेतिाएतदेवविवृणोतिसावित्रमितिाआम्मिन्नेवपक्षेदूषणान्तरंपरिहरतिन
चेतिाअत्रवैशेषिकाहयः संयोगाद्वाविभागाद्वाशब्दाद्वाशब्दनिष्पत्तिरित्याहुः।तथाहि प्रथमभेरीदं राम०
डसंयोगात्तवेणुदलविभागाद्वाशब्दोनिष्पद्यतेसचवीचीसंतानवत्समीनजातीयान्शब्दान्सर्वंसततः १०८

नोत्तितत्रषु च संतन्यमानेषु स्वप्रदेशप्राप्तः शब्दः। श्रोत्रेणाग्ह्यत इति। एतच्चायुक्तं लोकविरोधात्। लोको हि एकमे
वशब्दं परस्मै श्रावयितुं विवक्षति न तु शब्दान्तरं श्रावयितुं शब्दान्तरं विवक्षतीति। तन्नेयं विवक्षानुसारिणी शब्दश्रुतिः
शब्दसंतानपक्षे च न्य एव शब्दो वक्त्रा विवक्षितः श्रोत्रा चान्यः श्रूयत इति न विवक्षानुसारिणी शब्दश्रुतिः स्यात्। अ
दृष्टचरः शब्दानेकत्वकल्पने गौरवं च स्यात्। आरंभकावंतु नाकेवलमदृष्टं प्रमाणविरुद्धं च निष्क्रियत्वात्। नादेशान्तर
कार्यारंभश्च मूर्त्तानाममूर्त्तस्याभिघातमन्तरेण तो नुपपन्न एव। यच्चेयमारंभनियं प्रति नातिदूरमारभत इति दे
शो यत्नान च नस्याः किंचिन्निमित्तमस्ति। अन्त्यमोऽपि शब्दः शब्दान्तरमारभेतैव विरोधात्। स देशं सजातीयं वा
करोतीत्यत्र दपि न दृष्टचरं। यत्तु वीचीसंतानवदित्युक्तं तदनुपपन्नं। तत्र सक्रियत्वादभिघातकरणाद्गव
त्वाच्च यथाक्रममारंभो पपात्तः। यथाहुः। वेगवत्सक्रियत्वाम्भस्तरंगाणां च युज्यते। कार्यदेशान्तरारंभो
यावद्वेगं च तत्क्रियेति। देशान्तरे कार्यारंभो यावद्वेगं चेत्युपपन्नमिति सर्पः। प्रयोगश्च शब्दो न शब्दारंभ
कः शब्दत्वादन्त्यशब्दवत्। एवं संयोगभागावपि न शब्दारंभकौ संयोगविभागत्वात् तत्वादिसंयोगविभाग
वदिति। अतो भाष्यकारोक्त एव पक्षः साधीयान्। यदाह भाष्यकारः। अभिघातेन हि प्रेरिता वायवः स्तिमि

राम० १०९

109

त्रानिवार्यंतरारात्प्रतिवाध्यमानाः सर्वात्ता दिक्कोसंयोगविभागानुत्पादयंतो यावद्वेगमपि प्रतितिष्ठंते। तेन
वायोः प्रत्यक्षत्वात्संयोगविभागानोपलभ्यंते। अनुपरतेष्वेव तेषु शब्देषूपलभ्यंते नोपरतेषु अत एव न दो
षः अत एवानुवातं दूरादुपलभ्यते शब्दो न प्रतिवातमिति। अत्र। अभियातेन हीत्यादिना यदुक्तं तत्स्व
पक्षसिद्धं न कल्पनीयं। सर्ववायुः शब्दविशेषाभिव्यक्तौ तात्वादिस्थानविशेषसंयोगमनुरुध्यते स्थान
विशेषवशेन शब्दविशेषोपलंभात् यावद्वेगमपि प्रतितिष्ठंत इत्येतदपि वेगवत्वाद्देववायुनोशरादिवत्कृतमेव
यदपि स्तिमिता निवातेत्तरात्सीत्याद्युक्तं तदपि सर्वं ध्वंससमवेतानानुत्से मिथ्या स्थिरत्वमेव न चतत्सायोः संभव
तिसदागतित्वात्। सत्यात्सूक्ष्मत्वानुपदार्याततरानचालयन् स्थिरवद्भवतीति स्थिराभिधानं। अत्र वार्त्तिकका
रिध्वंनिजन्यः संस्कार एव श्रोत्रमित्यादिभिर्यन्निन्नमतो इममेव च संस्कारं शब्दग्रहणकारणं किंचित्तुपंडितं
मन्याः श्रोत्रमित्यभिमन्यत इत्यादिना महता प्रबाधेन दूषयित्वा श्रोत्रमाकाशं द्रष्टं च भौतिकेंद्रियवादिनं
इत्यादिनान्तेवांतरविरोधं च प्रदर्शयित्वा चावरूपकत्वं व्यस्ताः किंकाक्ति चिपर्ययः ततो वेदानुसारेण का
र्यादिकं श्रोत्रनामतिः दिशः श्रोत्रमिति स्थितस्य च प्रलापयत्रमभिधीयात् तच्च प्रततिगामि ववचनं च क्षुरादि राम० १०९

वत्तादिघ्कसर्वगतत्वाचैका यावद्व्योमव्यवस्थिताकाश[illegible]द्रपरिछिन्नाश्रोत्रमाकाशदेशवर्त्तायावांश्चकश्च
नन्पायोनभोभागप्रकल्पने दिग्भागेषुसमस्तोसावागमात्रो विशिष्यत इत्याद्यैक्तं तत्रैवावगंतव्यात्रत्र
त्रंयकारणानुक्तः परिहार्थस्तत्र द्रपार्थउच्यते। तत्रअस्थानादित्येतस्य परिहारसूत्रं। सतः परमदर्शनो
विषयानागमादिति। तत्परं कारणमनित्यत्वे कथितं त्र्यस्थानादिति तत्र सतो विद्यमानस्यैव शब्दस्य अद
र्शनं परो न त्वभावः कुतः विषयानागमात् विषयं शब्दं प्रति अनागमात्। उच्चारयितृमुखोद्भूतवायवीय
संयोगविभागानां स्तिमितसमीरणापसारणेन शब्दाभिव्यंजकानामभावात्। सतोपि शब्दस्याग्रहणं न तु स्वरू
पाभाव इति सूत्रार्थः। वार्त्तिककारैस्त्वस्थानादित्यस्य हेतोरनैकांतिकत्वप्रदर्शनार्थत्वेन तत्सूत्रं व्याख्या
तं यथा दुःकूपपरणायत्नेन खं तिरोधीयते यदा। अस्थानादित्ययं हेतुस्तदानैकांतिको भवेत्। आकाश
धीप्रबंधो हि तदा तस्मिन्निति छतितितिरोहितो नाभिव्यक्तेः शब्दबुद्धिप्रबंधवत्तानन्च प्रत्यक्षस्याकाशस्य किमिद
तिरोधानं नाम। ना प्रत्यक्षमिति भ्रमः अपरोक्षावभासावभ्रप्रत्यक्षस्य प्रमाणांतराणं संभावनासिध्यापत्तिश्च।
शब्दलिंगकमनुमानमेव प्रमाणमिति चेत् न गुणत्वाभावेन गुणपनुमापकत्वासंभवात्। गुणत्वं चावा युगुणत्वा

रांम० ११०

110

त।प्रसिद्धस्यगुणिनोनुमानं।वायौहिश्रोत्रंप्राप्तेशब्दउपलभ्यतेयथाचंपकद्रव्येघ्राणसंन्निकृष्टेगन्धमात्रस्यगंध
स्यतद्गुणत्वं।यद्वावायुरेवताल्वादिस्थानसंयोगात्तत्तच्छब्दगुणकोनिष्पद्यातेतस्मिंश्चश्रोत्रंप्राप्तेसंयुक्तसमवाय
सन्निकर्षेणश्रोत्रेणशब्दोगृह्यते।अनित्यवायुधर्मत्वाच्चशब्दकंपनित्यतेतिचेन्नगोत्वशुक्लत्वादिगुणवच्चैवदिति
क्रमः।नीरूपस्यापिचापराक्षावभासान्नानुपपन्नंप्रत्यक्षत्वं।एवंदिक्कालयोरपिप्रत्यक्षतासमर्थनीया।यारव्य
पाराक्षावभासात्प्रमाणांतरासंभवाच्चेतिहेतू।ननुनानुपलम्भमात्रत्वंहेतुःकिंतु॥सत्यंतदप्यसिद्धत्वादसाधकं
।यथाहुः।अप्यपरापरासत्त्वाद्धेतुस्तत्राप्यसिद्धता।सान्नवसाधनाभावाच्छब्दोजोनोपलभ्यात्।हंतनहियदाव्यं
जकेलब्धंतदाकिन्नचिरमुपलभ्याते।उच्यते।वायवीयाहिध्वनयोभिव्यंजकाः।नचश्रोत्रंप्राप्यैवाप्यतःप्रया
ताःशब्दबुद्धिरपितदनुवर्त्तिनीनचिरमनुवर्त्तते।यपामेघांधकारविघ्नजनिताघटादिबुद्धिरिति।तदुक्तं।क्षणि
कंसाधनंचास्यबुद्धिरप्यनुवर्त्ततामघांधकारशर्वर्य्यांविघ्नजनितदृष्टिवत्।यथाघटादौदीपादिरभिव्यंजकद्रष्ट
निचक्षुषोनुग्रहादेवंध्वनिःस्याच्छ्रोत्रसंस्कृतः।अत्रेदंचिंत्यतेकिमिदंतमोद्रव्यांतरमुतालोकाभावइति।तत्रद्रव्य रांम०
गुणकर्मनिष्पत्तिविधर्म्याद्वदभावस्तमइतिकाश्यपीयास्तन्नयुक्तिसहं।नीलबुद्धेर्निर्मिमित्तत्वापातः।अभा ११०

वस्यनीलिमाभावात् । न चासत्तो नीलिम्नो किंचिद्ग्राहकं स्मारकं वास्ति ॥ मु ॥ गुणाणां पस्य च त्वत्त्रसादृश्यं विनानुप
पत्तेः । नेदं रजतमिति वद्बाधाभावाच्चा । अभावं चेनु प्रतियोगिविशेषो ह्येर्व स्वस्यात् आलोकनं दर्शनमात्रेणानुत
द्भूतो महत्त्वं तत्-तच्छून्य भागे पि स्यात् । अतो द्व्यान्तरमिदं वायुवान्नीलिमगुणको । वा युरूपस्पर्शवान्नद्वंद्वं चास्यत्रांन्रूप
वदित्स्येनावाच्चिन्नो षः । ननु रूपां तरग्रहणवदेतद्ग्रहणो णालोकापेक्ष यामवितव्यां सत्यं आलोकनामान्यत्र तत्याः एतन्नी
लरूपग्रहणे चालोकापेक्षा नासीति दृश्रान वलादेवाभ्युपगम्यते । निमीलिते नेत्रस्यापि का । तच्चित्राश्रुषाणि ते जोसिनि स्व
रस्त्वेव पिनीलरूपं मध्यान्ह वस्त्वंतरमपि गृह्यते नेति तच्चेताए तावद्भिस्तद्ग्रहणासंभवात् । जान्य धानामुद्धत नेत्राणां च
पद्यंधकारदर्शनमस्तितत्तेषामपि संविकानिश्चितं जोसीति कार्यवलादेव कल्प्यते । आधिकं तु टीकायाम वगंत
व्यं भाष्यवार्त्तिककाराभ्यामनुपक्षेप्यात्मत्र तद्विचारानुपयोगाच्चास्माभिर्न प्रपंचिता आलक्यादीनां । वतद्देव विचार
सर्वस्वमितिति तिः प्रपंचितानानुसजातीयानामवाभिव्यंजकत्वं दृष्टं पार्थिवं घ्राणगं धनगंधानमिव्यनक्ति । आ
प्यं रसनं रसेन रसोनन च वायवीयानां ध्वनिनां शब्देन सजात्यमस्ति न च शब्दास्तेषां गुणो ऽतः कथमभिव्यंजकं च
स्यात् ॥ नैष दोषः विजातीयानामप्यभिव्यंजकत्व दर्शनात्-दृश्यते हि तैजसः प्रदीपादिर्घटाद्यभिव्यंजकः । यत्तु

कारात्तिशब्दादित्युक्तं तास्यैतत्परिहारसूत्रं॰ प्रयोगस्य परमितीयत्परं कारणमुक्तं हृत्तकाविशब्दं कुर्वित्यादित
त्प्रयोगस्य उच्चारणस्य॰ नन्वत्पत्तेः गोमयान्कुर्वितिसमाहारेपिकरोत्यभिधानदर्शनात् यथा पादौ कुरुष्वावकाश
कुरुतयाशब्दप्रयोगं कुर्वितिसूत्रार्थः॥ सत्त्वांतरे च योगपद्यादितियदुक्तं तत्परिहारसूत्रं आदित्यवद्यौगपद्यमिति
॰ यथा एक एवादित्यो नानादेशस्थनेकैर्दृश्यते तथा शब्दोपीतिसूत्रार्थः। एतदभिप्रायेणाह युगपदिति। एतेन प
र्वपक्षोक्तहेतोर्हेतोरनैकान्तिकत्वमुक्तं भवति। अत्र चोदयति किं पुनरितिसमाधत्ते उच्यत इति। दूरस्थस्य सन्निधिर्ध्यास
त्तितो नानादेशभ्रम इत्यर्थः। अस्य॰ सवितुः॥ निगमयतितस्मादिति। नहि स देशोस्ति यत्रोच्चरितः शब्दो न गच्छेत आत्
देशानवच्छेदादाकाशवद्विभुत्वमिति भावः॥ विभोरपि न सर्वव्यापितया ग्रहणं व्यञ्जकाधीनत्वादिति भावः। नन्वस्तु नामैवं
तथापिकथं देशाभेदभ्रान्तिः। इत्यं। व्यापको हि शब्दो पदाभिन्नदेशो युगपद्भूतैर्ध्वनिभिरभिव्यज्यते तदा शब्दोपि त
देशोवगम्यते ध्वनीनां चापरितोन्तरालत्वात शब्दोप्यन्तरालेनवगम्यमानाविच्छिन्न इवभासते अतो ध्वनेरल्पदेशवाच्छे
प्यविभुत्वम्भ्रांतिरितिउदाहरणांतरमाहतथेति। उक्तं च॰ जलपात्रेषु चैकेन नानेकः सवितेक्ष्यते युगपन्नं च भेदस्य प्र
माणं नुत्ववेदनात्। दृष्टं च नेत्रप्रहत्तिभेदादेकस्यापि चंद्रादेरनेकधादर्शनं। यथाहुः ईषन्निमीलिते गुल्माय यथा च

सुषिदृश्यते। एष यो गेको ऽपि भिन्नदेशत्वप्रसुद्धिं जनस्तथैव न इति अत्र भ्रमो यदा तावज्जले सौरतेजसा स्फुरणाच्चा सुषन्तेजः प्रति
स्रोतः प्रवर्त्तितं स्वदेशस्य वश्यत्याति सवितारमानकधेति। उपपादितं स्यात्रा एव निगमयति तस्मादिति। अत्राशंकां तन्न
त्रिविति। अस्फलनाभावाग्रहणात्ततः किमत आह तदिति। समाधत्ते उच्यत इति। यदि ध्वनुत्पत्तिदशाविशिष्टशब्दग्रहणं स्यात्त
दा यं दोषः स्यात्। न तु तथास्ति इत्यर्थः। साहीति। यस्मात्सादिः स्रोत्रदेशाभवतीति भावः। भ्रान्तित्वमुपपादयितुं भ्रमि
मारचयति ध्वनय इत्येति। ध्वनुत्पत्तिदेशे नुमा। दृष्टान्ताय विवृणोति यथेति। उपपादितं विशिष्टग्रहणं निगमयति
ततश्चेति। भ्रान्त्यैतद्विशिष्टग्रहणं संभवतीति भावः। नानु दयमागच्छति ननु श्रोत्रेण गृह्यत इत्यभिप्रायः। कथम
तावता भ्रान्तित्वमत आह न तु [illegible] त्यत्रानुमानेन ग्रहणादिति केचित्। चोदयति नश्चेति। बाधकप्रत्ययवि
ना भ्रान्तित्वे प्रत्यभिज्ञाया अपि भ्रान्तित्वं स्यादिति भावः। परिहरति अयमिति। नन्वनित्यत्वपक्षे तत्र तत्र शब्दोत्पत्तिसं
भवान्नानादेशोपलब्धेः भ्रान्तित्वमत आह अनित्येति। अत्रैव मतान्तरमाशंक्य निराकरोति यदपीति। दूषणान्तरमाह
किंचेति। तस्मादिति। यस्मात्स्थायित्वे श्रोत्रैकदेशो प्राप्यकारित्वं न संभवति तस्मात्प्राप्यकारित्वमेव वाच्यं तदा च ना
नादेशोपलब्धे भ्रान्तित्वमेव गतिरित्यर्थः। स्थायित्वपक्षो [illegible] दूषणान्तरं स्वमतेन परिहरति। अस्मत्पक्ष इति। महाप्रकृतं नि

चोदयति नन्विति परिहरति नेति। एतदेवोपपादयति नहीति। इतोप्येवमित्याह किंचेति। कथमविद्यमानस्य त
त्प्रतीतिरत आह तस्मादिति। यथाः ॥१२

रा०म० ११२ गमयति तस्मादिति। अत्र यं यकारेणापरिहारसूत्रं द्वयं सिद्धान्तसूत्रं च परित्यक्तं तत्प्रसंगाद्व्याख्यायते॥ यदुक्तं
यकारादिरूपेणाविक्रियमाणाच्चादिकारादिरनित्य एवमिति तन्नस्येतत्परिहारसूत्रं। शब्दान्तरं च विकार इति॥ यस्तु याद
ध्यत्रेत्यत्र इकारस्य यकारो विकार उक्तः न स शब्दान्तरमेव न विकारः। परमते शब्दस्य गुणत्वात्तस्य च मतेन च विभुत्वेन विका
राद्योगात्। ननु विको यणाचीति स्मृतिवशादिकारः प्रकृतिर्यकारो विकृतिरित्यवगम्यते तामेवं। स्मृत्या प्रतीतिवित्तति
112 भाव वा प्रतिपादनात् उक्तं हि शब्दे सिद्धे शब्दार्थसंबंधे नियमार्थं व्याकरणमिति प्रकृतिविकारभावं च ब्रुवता दध्यत्र
पदमसिद्धमेव साधितं स्यात्। आत्तायमभिप्रायः सूत्रकारस्य। आविपरतः संहितायामेव यणां तानां साधुत्वमन्यत्र चे
गत्वानामिति। एतेन संप्रसारणं व्याख्यातं। नापि सादृश्यात् प्रकृतिविकारभावावगतिः इकारयकारयोः सर्वात्मना साद
श्याभावात्। यदुक्तं वृद्धिश्च कर्तृभूम्नास्येति तत्परिहारसूत्रं। नरदृद्धिपारतिः। या तु या परा शब्दस्य वृद्धिरुक्ता सा ध्वनिरू
पस्य संयोगविभागात्मकस्य नादस्य च न शब्दस्य निरवयवत्वात्। बहुभुः ध्वनयस्तु उत्पद्यमानाः संयोगविभागाः ए
यकृद्य कृत्स्नं शब्दं व्यंजयंतः स्वगतमुपचयं तत्राणापयंतः शब्दे महत्त्वव्यवहारमुपजनयंति न स्वतः शब्दे वृद्धिरुप रा०म०
पद्यते निरवयवत्वात् एवं परस्यापि उक्तं चावर्णो निरवयवत्वात् तु वृद्धिह्रासौ न गच्छति। व्योमादिवदतो ऽस्ति शब्दवृद्धिरस्य स्य ११२

रूपत्त इति भाष्यकोराण्याह वायवीयाः संयोगविभागा नैरन्तर्येण क्रियमाणाः शब्दमभिव्यंजयन्तो नाद
शब्दवाच्याः तेन नादास्य वाद्वृद्धिर्न शब्दस्येति ननु यदि वायवीयाः संयोगविभागाः संयोगविभागविशिष्टो
वा । वायुरेव नादो ननु शब्दविशेषः स्तर्हि वायोरश्रावणत्वान्न इष्यस्य शंखवादिनादस्यश्रवणं न स्यात् । अत्र
केचित् वायुगुणाभूताः ध्वन्याख्याः शब्दविशेषा एव श्रोत्रेण गृह्यन्ते तएव च वायुना सहताल्वादिभिः प्रेरि
ताः श्रोत्रसंस्कुर्वन्तः शब्दस्य व्यंजका इत्याहुः ननु वर्णोच्चारणवेलायां ध्वनयो यान्नश्रूयन्ते तत्कथं तेषामभिव्य
जकत्वमेवं वा वर्णोच्चारणे ध्वन्युपलब्धेः सर्वजनीनत्वात्तथा च दूरादधीयाने षु वर्णान् श्रुत्वोपि ध्वनिमात्रमपाव
ति । तवताल्वादिसंयोगविशेषबलाभेसति वर्णान् व्यंजनं तिस्वयं चोपलभ्यन्ते · भेर्यादिध्वनयस्तु केवलं स्वयमेवोपलभ्यन्ते ।
भाष्योक्तवायवीयध्वनिपक्षेतु · ध्वन्याख्यशब्दाभावेपि वायुना नादे इव शंखवादिघोषश्रवणमुपपद्यते । अधिके
नुवार्तिकवर्गत्रव्यं । एवं तावत् साङ्ख्यैः सूत्रैः परपक्षं प्रतिक्षिप्य तावन्मात्रेणास्वसिद्धान्तासिद्धिं मन्यमान आह । नित्य
त्वमस्तु स्याद्दर्शनस्य परार्थत्वादिति । सिद्धान्तसूत्रमिमं नतरां तु शब्दः पक्षं व्यावर्त्तयति नित्यः शब्दो भवितुमर्हति कुतः
दर्शनस्य परार्थत्वात् चस्पात शब्दो नैमेति दर्शनमुच्चारणं तस्य परार्थत्वात् अर्थप्रत्यायनार्थत्वात् · उच्चारितमा

शब्दोऽर्थवान् सर्वेषामभिनवत्वात्। नन्वसिद्धोऽयं हेतुः पारार्थ्यस्य दर्शनधर्मत्वेन शब्दधर्मत्वाभावात्। स्वरूपेणासिद्धस्या

राम० ११३ त्रोविनत्र्यपतिचेच्छब्दः तदार्थावगत्यर्थं नाचार्येत। अगृहीतसंगतिकत्वेनार्थावबोधकत्वासंभवात्। अर्थवत्त्वादर्थाव
गम इति चेत्तान कश्चिदपि पक्षधर्माविनासिद्धिः। नैष दोषः अर्थापत्तेरत्र विवक्षितत्वात्। यथाहुः अनुमानप्रयोगे हि
वक्तुमित्यादि युज्यते। अर्थापत्तिरियं चोक्ता पक्षधर्मादिवर्जितेति। अर्थापात्रो च यद्वा त्वेव दोषो। अन्यथाप्युप
पत्तिरन्यथैवोपपत्तिः तदिहापि यद्यपि तिष्ठन्नित्यत्वेप्यर्थप्रत्यायकत्वमुपपद्येत। अनित्यत्व एव वा। ततो दूषणास्या

113

दितिज्ञाताऽर्थप्रत्यायकत्वेन नित्यत्वमेवांगीकर्तुं युक्तमिति स्त्रार्थः। ग्रंथकारा अप्येतत्सर्वमभिप्रेत्याह। अर्थप्रतिप
त्त्यंगत्वाच्छब्दस्य नित्यत्वमेव युक्तमित्यर्थः। अतो चपलवद्व्यवहारांगभूतार्थप्रत्यायकत्वान्नशब्दस्ययो
ग्यत्वादेवधार्यत इति। अनुपपत्तिमेवोपपादयति नहीति। कथं न संभवत्यत आह संबंधेति। अगृहीतसंबंधस्य चा
र्थप्रत्यायकत्वेऽपर्वोपि सर्वः शब्दः सर्वं प्रकाशयेदिति भावः। संबंधज्ञानं च न क्षणिकस्य संभवतीति भावः। ननु कंचि
त्कालं शब्दोवस्थास्यति यावत्संबंधदर्शनं व्यवहारश्च संभवतीति नित्यत्वानित्यत्वासिद्धिः। सिद्धत्यमेतत्। यद्यवस्था
नं स्यात् कंचित्कालमवस्थाने वा कालांतरेवस्थानं कानिवारयेत्। यथाहुः संबंधदर्शनं चास्य नान्यस्योपप राम०
द्यते। संबंधज्ञानसिद्धिश्चात्र। ध्रुवं कालांतरस्थितिः। शंकते सत्यमिति। परिहरति नेति। असंभवमेवोपपादयति। ११३

नहीति। तदुक्तं। कस्य चैकस्य सादृश्यात् कल्पितां वाचकोऽपरः। अदृष्टसंगतिश्चेन्न सर्वेषां तुल्यतापतेः। उक्तेऽर्थेऽवा
र्त्तिकक्सं भजति माह तदुक्तमिति। यएव हि कस्याश्चिद्धुतशब्दोत्तरस्य चरमाक्षरात् तार्थवान्स्यात्स एवाक्षरशब्दान्तरस्या
न्यस्य प्रथमाक्षरतत्वादनर्थकः स्यादिति विरुद्धमाद्योतितं श्लोकार्थः। अत्रापि सम्मतिमाह तदुक्तमिति। कैश्चिद्दर्शनगम्यानु
तानुत्पमुत्तरस्येति किं सादृश्येन वाचकः इति श्लोकशेषः। तदुक्तमिति। अथानन्यपक्षतीन्प्राप्ता। पूर्वस्मिन्नपि तस्य वा सर्व
नर्वानर्थकताभावदिति शेषः। अन्यदप्युदाहरति तदुक्तमिति। यो वाक्षरतवर्त्ता यतः मुख्यो सावक्षतीनां। स्यात्तादकवे
।नयुज्यात। एकस्य वर्णबहुः अक्षरार्थवछब्दोत्तरस्य गोणः। अक्षरार्थवछब्दस्य मुख्यः स्यात् न चैकस्य गौणत्वं मुख्य
त्वं च युक्तमित्यर्थः। एतच्च श्लोकाग्रंथकारेणोपव्याख्यातप्रायाः। अत्रैव किंचिदाशंक्य निराकरोति। अथेति॥ २
वाक्तीति। अत्रानुसएवायं गकार इति प्रत्यभिज्ञया व्यक्तैकचाभवावगम्यत इति भावः। कथं निष्प्रमाणकमत आह
यत्रेति अतोत्रेति। विविकारग्रहणादेवात्र प्रत्यभिज्ञानव्यक्तैकवाततात्यान्तिरूपेत्यर्थः। किमितिनाग्द्धत इति चे
त्तत्राह शवनेघ्येति। प्रकृतमित्यागमयति अत इति। ननु प्रदीपेऽपि स एवायमिति प्रत्यभिज्ञास्त्येव। न च तत्र पाबल्यमप्य
मित्यर्थः। प्रमाणाभावाभवात् प्रदीपस्यानित्यत्वमत आह प्रदीपेष्विति। प्रदीपेनु प्रत्यक्षमेव भेदग्राहकं प्रमाणं

रा॰म॰
११४

114

शंकात पररूपाम इति। सतो वस्तुनः स्व+ वेद्नुनत्वाद्द्रशंकि चित्स्रमाणम + त्सेति विपस्पतित्यर्थः। प्रमाणाभावाम
वोपपादयति प्राप्य क्षमिति। क्षणिकाच्च प्रयमाणत्वं+ भाव एव क्षणिकत्व प्रमाणं। कथमित्यत्ते क्षायामाह सा
त्तेति। सत्तामात्रानुबन्धि यस्याध्यं क्षणिकत्वं तद्विपक्षाद्व्यक्तस्वभावस्या यत्र व्यक्तत्वं क्षणिकमिति नियमादिति
भावः। एतादव प्रश्न पर्वकमुपपादयति कथमिति। अन्तोऽन्तरं विपक्ष इति। अक्षणिकत्व सत्तायाबाधकप्रमाणप्रवृत्ते
सत्तानुबन्धसिद्धिरित्यर्थः। एतादेव विवृणोति क्षणिकत्व इति। ननु स्थापि चेपि सत्तोपपात्तेर्न क्षणिकत्वे सत्वव्यापकमि
त्याभिप्रायेणाटष्ठतिकिं पुनरिति। उक्तमर्थं विवृणोति नि यादृशी ति। अर्थक्रियाकुर्वत्त एव सत्ता लाभ इतिभावः। अ्स्व ही
वं कथमेतावता क्षणिकत्व सिद्धिरत आह साचेति कथं न संभवतीत्यत आह स्थाहीयोति। पुत्तयं तरमाह किंचेति। येषा
यत्तध्रुवभाविता तांनत्र हेवंत्तरापेक्षानास्तीत्यर्थः। न्यायं प्रकात योजयति। ध्रुवेति। विरुद्धव्याप्त्या पलब्धिं विवृणो
ति। ध्रुवभाविनेति। निषिध्यमानं यत्राह वंत्तरापेक्षित्वात्तनव्याप्त्या पथान्यत्रुल्लक्ष्य ध्रुवभावित्वान्नाहत्वं त्तरापेक्षंत
यानाशस्य ध्रुवभावित्वेति। निषिध्यमानं यत्राह वंत्तरापेक्षित्वात्तन व्याप्तता हे वंत्तरापेक्षां प्रतिक्षिपतीति संब रा॰म॰
धः। एवमंन्च यमार्गेणोत्का व्यतिरकेणाह। अयापावत्ति। वस्त्रे रागादीनां हेवंत्तरापेक्षित्वेम ध्रुवभावित्वनव्याप्ते ११४

दृष्टमितिदृष्टान्तार्थः। फलितमाह निरपेक्षश्चेति। विनाशस्य हेत्वपेक्षास्तीति चेत्तत्राह मुद्गरालेति। उत्तरग्रन्थो निगद
व्याख्यातः। तदेतन्निराकर्तुमारभते अत्रेति। यदुक्तं किंचित्करत्वादित्यादि तत्परिहरति सहकारित्वेति। भावाद्भि
न्नो भिन्नो। भिन्नमेव वा। भावनिष्ठमतिशयं कुर्वन्तित्यतो भावस्यैव कारणतानानुतस्येति भावः। चोदयति नान्वि
तितदनन्तरं कार्योपलम्भादिति भावः। आत्रेव विशेषं कातनन्विति। अनपेक्षस्त्वेकं सहकारिणमपेक्ष
स्तेऽतआह निरपेक्षोपीति। स्वरूपलाभार्थमेव तस्य सहकार्यपेक्षा न कार्यजननार्थमिति भावः। परिहरति स
त्यमिति। विपक्ष इति। क्षणिकत्वविपक्षस्स्थायित्वपक्षे अर्थक्रियाकारित्वे बाधकप्रमाणाभावादित्यर्थः। तत्तः। किम
तआह अनियतेति। सत्तायाः क्षणिकत्वव्यभिचारादगमकत्वमित्यर्थः। उक्तदूषणपरिहारो न चेत्यादिना। न चे
ति प्रतीतापाहेतुः घटसंतान इति। किमिदमितिसिद्धान्ति प्रश्नः। भावस्वभावादिति। क्षणभङ्गवादिन उत्तरं। ननु भा
वादपीत्यादि सिद्धान्ति ग्रन्थः। द्वौ पक्षमेवाह पूर्ववदिति। यथाविनाशात्पूर्वकाल उपलम्भस्तथा विनाशोत्तरकाले
प्युपलम्भः स्यात् घटवृत्तान्तानिपटस्यैवेत्यर्थः। एतच्चाभ्युपेत्यवादेनोक्तं वस्तुतस्त्वाभद एव न संभवतीत्याह। अ
न्यत्रेति। अन्यदप्याशङ्कां निराकरोति॥ अयापीति। नानेति। नानावस्थानामपि अविरुद्धानामेकस्मिन्धर्मिणि युग

राम० ११५ पक्षंभवान्-विरुद्धानां च क्रमेणासंभवात् तन्नावस्थाभेदमात्रेणासपिकत्वासिद्धिरिति तात्पर्यार्थः ॥ विनाशस्य पुन्यात इत्या
हतत्वं चेति सत्तायाः इति ॥ विपक्षे स्थायित्वे सत्तायाः संभवाद् व्यभिचारणान्ते तु त्वमित्यर्थः ॥ निराकरणमुपसंहरति
तस्मादिति ॥ स्वपक्षे विनाशः प्रतिक्षणं विनाशः ॥ महाप्रतते निगमयति तस्मादिति ॥ युक्तिभिरुपपादितमर्थं प्रयोगेण
द्रढयति प्रयोगश्चेति ॥ न चास्य वायुधर्मत्वं मते ध्वनिभिर्व्यभिचारस्तेषामपि स्थावरणत्वादिति वाच्यं ध्वनिधर्मान्यत्वे सती
ति विशेषणात् ॥ यथा दुर्वृद्धाः हेतुरेवं वसोऽस्पष्टो नित्यत्वस्योपलम्भात् ॥ एतावयवधर्मा स्वध्वन्यन्यत्वविशेषितं इति
॥ अर्थापत्त्यप्राप्यपराणवर्णानामपि स्वत्वं प्रयोगाभिप्रायेणापि वर्णापि नु शक्यन्ते ॥ यथा दुः आत्मत्वात् स्थिरः शब्दोऽर्थ
मगो वा दिजातिवत् संबंधानुभवापेक्षसामान्याद्यविबोधनात् ॥ यथाधर्मवद्भाग्यगमकगोत्वं वर्णविशेषणात्त्वस्य
लिदृष्टान्तार्थः ॥ न चानित्यत्वानुमानेनास्य सत्प्रतिपक्षतेति वाच्यं तस्य दुष्टत्वात् ॥ न तावत्कृतकत्वेन तस्माद्ध्वने
कृतकत्वस्य परं प्रत्यसिद्धेः ॥ नाप्यैन्द्रियकत्वाहेतुः आद्यमध्यमशब्दयोरैन्द्रियकत्वासिद्धेः औलूक्यादिभिरस्यास्य व
तदङ्गीकारः अर्थान्तर एवं पक्षोऽस्तु निवृत्तं मीमांसकं प्रत्याश्रयासिद्धेः तेनोक्तिमच्छब्दानङ्गीकारात् ॥ अविशेषेणाउ राम०
सर्वशब्दपक्षीकरणे भागासिद्धो हेतुः ॥ आद्यमध्यमयोर्व्याप्तेः ॥ न च पक्षतावच्छेदकनानात्वमेव दूषणमिति वाच्यं ११५

115

एतस्य परिमाणत्वात् आद्यमध्यमशब्दयोरनित्यत्वासिद्धेः किं चेन्द्रियकत्वं सामान्येष्वपि सत्त्वाद्व्यभिचारि सामा-
न्यवत्त्वे सतीति विशेषणेऽपि व्यभिचारः गोत्वादीनामपि सत्तासामान्ययोगित्वात्। व्यक्त्यतिरिक्तजात्यङ्गीकारमीमां-
सकं प्रति तत्सिद्धत्वमसिद्धं अस्मदङ्गीकारे तु तार्किकं प्रत्यसिद्धिरिति दिक्। पक्षसाध्यादित्वादिदूषणप्रपंचस्तु वार्त्तिके
व गन्तव्यः। प्रसंगादवान्तरसामान्यं साधयति पयेति। अवान्तरसामान्यसाधनस्य प्रयोजनमाह तैरेवेति॥ अत्र सं-
ख्या नाम सत्वरजस्तमः स्वभावशब्दः आहतानां पुरुषारब्धः श्रोत्रकण्ठानामाकाशगुणः। तादात्म्याच्छंखादिविषयः।
शिक्षाकारस्यार्थवाचकरूपेण शब्दात्मना परिणतो वायुरेव शब्दः॥ वैयाकरणानां तु स्फोट एव शब्द इति॥ तदत्र
नानामतातिरेकेण स्वमते दर्शयितुमाह यदा चेति। अस्त्वेकमेवाश्रयरूपं द्रव्यं तत्राह एकत्व इति। द्रव्यत्वेनैकद्रव्या-
श्रितमेव दृष्टं अतः एकद्रव्याश्रितस्य द्रव्यस्यासंभवात् नादस्य द्रव्यान्यत्वमित्यर्थः। कर्मत्वमपि न संभवति तद्ध्व-
सणाभावादित्याह शब्दस्येति। एवं गुणत्वे सिद्धे स्वमते वायुगुणत्वे वक्तुं परिशिनष्टि तत्रेति। एवं शब्दमात्रस्य वा-
युगुणत्वे प्राप्ते वर्णेषु विशेषमाह वर्णानामिति। ननु तावदिति। अतो नोच्चारणं वर्णानां कारणमिति भावः। कथं
तर्हि तदनुविधानं वर्णानामत आह एवमिति। ततश्च दर्शनस्य परार्थत्वादित्यस्य उच्चारणस्य शब्दाभिव्यक्त्यर्थ-

राम० ११६ त्वादित्यप्यर्थः संभवतीति भावः। अधिकरणार्थमुपसंहरति। अत इति। अत्र द्वितीयं सिद्धोत्तरसूत्रे। सर्वत्र यौगपद्या
दिति। इतोपि नित्यः शब्दः पातीत्। गोशब्दात् सर्वत्र सर्वगवीषु युगपत्प्रत्ययोजायते। अत आकृतिवचनोयं न वा
नित्यः शब्दस्य संबंधः शक्यात् कर्तुमिति संबंधनित्यत्वद्वारा शब्दनित्यत्वं साध्यते। विनष्टे शब्दे तन्नित्यताया अ
संभवात्। विनश्वराणामपि व्यक्तीनां जातिबंधो नित्यो दृष्ट इति चेत्। तत्र जात्याश्रयाणां व्यक्तीनामनंतत्वानुच्छेदात्
संबंधनित्यत्वं। नीहीनुच्छेदरूपेण सर्वथास्त्येव। गोशब्दानां त्वनुच्छेदरूपेण स्थित्यभावात्। ननु संबंधनित्यताया
अभावात्कथं तद्द्वारा शब्दनित्यत्वसिद्धिः। नैष दोषः। संबंधस्य तत्त्रिमवैगुल्यात् कंचिदेकमर्थं निर्दिश्य संबंधः क्रि
येत। अनेकव्यक्तिष्वंगुलीनिर्देशासंभवात्। ततश्चैकव्यक्तिनिष्ठः संबंधो न सार्वत्रिकः स्यादिति न सर्वगतो प्रत्य
यः सिध्येत्। जातिमेव निर्दिश्य संबंधः क्रियतामिति चेत्। न। बहुजातिसन्निधाने हि सत्सु बहुत्रस्य गोशब्दस्य गोत्वमात्र
सक्तिनिर्धारणं न स्यात्। यथाहुः पार्थिवद्रव्यसत्वादिलिंगुलत्वादिसंकरात्। विना प्रयोगमस्पष्टत्वान्नस्याद्दोवावधार
णोति। नित्ये तु गोशब्दे सति बहुत्र वृद्धोच्चारितः। अन्तर्वयस्यान्यासु गोव्यक्तिषु न्वयव्यतिरेकाभ्यामात्ततिवचनता राम० ११६
वगममपिष्यतीति तस्मादपि नित्यः प्रयोगश्चात्र वार्तिककारेण दर्शितः। तस्माद् कृत्रिमः शब्दो न कदाचिदिन्नरपत्तिनित्ये

116

ननित्यसंबंधादाकाशपरमाणुवत्॥ अथ वा शब्दनित्यत्वमेवानेन सूत्रेणोच्यते न संबंधनित्यत्वं नित्यत्वेऽनित्यादिभाष्य
पर्यालोचनयैवमर्थावगमात् यथाहुः बहुभिः श्रवणैरप्राणिवादीनि वर्जयन्॥ निष्कलवाचित्वं विशेषा प्रतिपद्यते-
नावकाले स्थिरश्चैतन्यकः पश्चान्नाशायिष्यति। तथा परं सूत्रे संख्याभावादिति। अष्टकृत्वो गोशब्द उच्चारित इति हि वदन्ति नी
ष्टौ गोशब्दा इति तेनैकत्वमवगम्यते भिन्नत्वे तु शब्दस्याष्टौ गोशब्दा इति संख्या स्याद्भाव्यं सा च नास्ति अतः स एवायमिति प्रत्यभि
ज्ञानादेकत्वं शब्दस्य। सादृश्यात्प्रत्यभिज्ञानमिति चेत् न। तादृश इति प्रतिपत्त्यभावात् एवमुच्चारणस्यानुपपत्तिश्चायोग्य
क्रियाप्याहृत्तिगणानि विहितः एवमुच्चारणस्य सत्क्रियावत्तामभेदमवति॥ तन्न पर्वोच्चारितस्यैव गोशब्दस्य पुनरुच्चारणा
क्रियायाप्यनुवर्तनमित्यवगम्यते। न तु तो॥ क्रियावत्ताभेदे हि क्रियावृत्तिर्युक्तवमुच्चारितस्य योगानुक्तं तस्य शब्दस्यावर्त्तिनः क्रि
यामुक्तवत्त्वोऽष्टकृत्वो ब्राह्मणा इति प्रयोगदर्शनात् व्यभिचारीत्वमुच्चारणस्य इति चेत्॥ नैष दोषः तत्र मुख्यप्रयोगान्न
प्रत्यभिज्ञानरूपप्रमाणान्तरोपस्थापनान्नापि तत्र मुख्योव्यभिचारः एकब्राह्मणत्वविवक्षया तत्र स्यात्प्रयोगो निष्पत्तेः अ
त्र बुद्धिकर्मणोरिकाभाष्यं ष्यत्तत्परिहारभाष्यं न हितत् प्रत्यक्षे अथ प्रत्यक्षे तेऽपि नित्यत्वे तादनुपपन्नमिव-
प्रत्यक्षत्वेन हि नित्यत्वं साध्यते घटादिभिर्व्यभिचारः स्यात्। अप्रत्यक्षत्वेन चानित्यत्वसाधने व्योमादरप्यनित्य

नास्पात्नात्ततः परिहारभाष्यस्यायमभिप्रायो वर्णनीयः। नास्माभिः प्रत्यभिज्ञाशब्दस्यानित्यत्वे हेतुत्वेनोक्ता येनानैकान्तिक
त्वमुच्येत। किं च नित्यत्ववादिनं प्रति प्रत्यभिज्ञाप्रत्यक्षविरोधोऽयमुक्तः। न च प्रत्यक्षस्यानैकान्तिकत्वं दूषणं स्यात्। अपवा
लिंगत्वेपि प्रत्यभिज्ञायाः नानैकान्तिकत्वं प्रत्यक्षत्वेन विशेषणान्न नहि बुद्धिकर्मणोः प्रत्यक्षत्वमिति भाष्यार्थः। न च घटादि
भिर्व्यभिचारः स्थायित्वमात्रसाधनत्वस्य दृष्टान्तत्वात्। नित्यत्वे साधने तु श्रोत्रप्रत्यक्षत्वमेव हेतुः शब्दे वं च दृष्टान्त इति। न
नु कर्मणः प्रत्यक्षत्वात्कथमप्रत्यक्षत्वाभिधानं। नैष दोषः परमाण्वाद्याश्रितकर्माभिप्रायत्वात् प्रत्यक्षत्वाभिधानं तु प्र
त्यक्षद्रव्यवृत्तिकर्माभिप्रायं तस्य तु शब्दवादेव प्रत्यक्षत्वान्नित्यत्वमिष्टमेवेति। दीधय्याहुः यत्कर्मार्त्तीच्छिद्रियाधा
रं तद् प्रत्यक्षमिष्यते। प्रत्यक्षद्रव्यवर्त्तिन्यो दृश्यन्ते याः क्रियाः पुनः। तासां वर्णवादवद्वेष्टं नित्यत्वं प्रत्यभिज्ञया। यदि
नित्या एव ताः किमिति नित्यं नोपलभ्यन्ते। व्यंजकाभावादिति ब्रूमः। किं तदभिव्यंजकमिति चेत्कर्मोत्पादकत्वेन यद्व
दभिमतं नोदनाभिघातादयस्तादेवास्माकमभिव्यंजकमिति। गहाणां व्यंजकाभावाच्च सततानुपलंभः। यथाहुः
द्वत्कर्म वै नित्ये आपि सन्नी यथा। न नित्यमुपलभ्यते तत् यथैव बुद्धिकर्मणी। बुद्धेश्चैकत्वेपि प्रयत्नभेदाद्भेदः कर्मणा
श्च देवदत्तश्चलति यज्ञदत्तश्चलतीत्याश्रयभेदाद्भेद इति। ननु कर्मणः संयोगविभागाख्यकार्य्यनाशपत्वात्कथं नि

त्यत्वसिद्धिः। सत्यं न तु कर्मणा द्रव्यसंबंधाभावनाशः यतिन कर्मस्वरूपं द्रव्यसंबंधाभाववाभिव्यक्तिः। क्रिया हि ज्ञानिवदेवय
स्मिन्द्रव्ये तादात्म्येन समवायेन वा संबंधं प्रतिपद्यते तत्रैव गच्छति जन्यते। अतः संबंधनाभाववाभिव्यक्ति। ननु धर्मावैतन्यरूपत्वादेव
नित्यत्वं। चैतन्यं चितिशक्तिः तच्च पुंसः स्वाभाविकत्वान्नित्यमेकं च। गोबुद्धिरश्वबुद्धिरित्यादिभिदस्तु विषयनानात्वात्य
था हुः बुद्धीनामपि चैतन्यस्वाभाव्यात्पुरुषस्य नः नित्यत्वमेकता चेद्याभेदस्तु विषयाश्रयः। ननु भाष्ये बुद्धेरेव नित्यत्वमु
च्यते न तु तद्युक्तेः। सत्यं चैतन्यमेव भाष्ये बुद्धिशब्देनोच्यते तत्तु समर्थशक्तियुक्तमिति यावत्। यदि नित्यचैतन्यः पुमा
न् किमिति सर्वं सर्वदा न जानाति। मैवं शक्तस्यापि सहकारिसन्निधापेक्षणात्। उक्तं च। स्वरूपेण यथा चाग्निर्नित्यं दहनकर्म
कः। उपनावं दहत्येधं दाह्यं नान्यं न चान्यथा। ननु विषयान्तरसंचारे पूर्वबुद्धेर्भंगो वावगमालोकयन्नित्यं चासत्यमेव। न। विष
योपनेत्रं चक्षुरादिकरणव्यापारभंगात्तन्निमित्तो व्यात्मविकारा भ्यस्त इति भंगबुद्धिर्न पुंश्चैतन्यभंगादिति। ननु बुद्धिश्चै
तन्यं चितिशक्तिः तस्याश्चाप्रत्यक्षत्वालोकयप्रत्यक्षत्ववचनासत्यं। चितिशक्तिरप्रत्यक्षा न त्वन्तु चैतन्यस्वभावः प्रमातैव
लक्षणया बुद्धिशब्देनोच्यते स च प्रत्यक्षो नित्यश्च तस्य ज्ञानाख्यो विकारः। प्रत्यक्षोऽनित्यश्चेति तदपि प्रायः पूर्वभाष्यं तद्दे
वभाष्यार्थः यत्पूर्वपक्षवादिना बुद्धिकर्मणो नित्यत्वप्रसंजनं कृतं तद्धि ज्ञानस्वरूपविकाराभिप्रायेण तद्युक्तं तस्याप्रत्यक्षत्वा

रा०म० तत्राप्यचित्त्वं जातिस्वभावपुरःसरमिति प्रायेण तु नित्य एवेति। एवं शुक्लादिगुणानामपि नित्यत्वे चैकावयवान्तर्भेदबुद्धिः कामि न्याप्र
११८ यसंसर्गात्। स्वरूपैकत्वे च तत एव प्रत्यभिज्ञोपपत्तेर्न गुणस्वरूपत्वमिति। एकेन शुक्लत्वादिजातिः कल्पनीया। यो ह्ययमतिशुक्लो
यमीषच्छुक्ल इति भेदः सोऽपि संसर्गभेदात्। तथा हि केवलद्रव्यसंसर्गे अतिशुक्लः। नीलादिसंसर्गे त्वीषदिति। यदपि धूसरत्वं च
118 मात्सुरभ्युपाधिं वाप्याति जसेषु द्राव्यशुक्लस्याविलक्षणापत्तेः दपि भिन्नजातीयद्रव्यसंसर्गभेदेनावान्तरव्याप्तो लादेः
स्फाटिकस्यापि प्रत्यभिज्ञास्तीति चेन्नस्यैवापादितसामान्यविषयानादोषः कश्चिदेतस्य नित्यत्वे गीकारात्। व्यक्तिविषयानु
तद्वताभेदबुद्ध्यैव बाधितानो लेनित्यत्वसाधयितुं प्रत्यभिज्ञातु ज्वालानां सादृश्यादपि संभवतीति शब्देऽपि नैव बाधकमस्तीति दि
क्। शब्दो नित्यत्वे तु प्रयोगावार्त्तिकवर्गं तत्व्याः। तथापरस्मन्नायमनपेक्षत्वादिति। तथाभिनवपटादिके कृपमाणमनुपलम्भा
पि वर्त्तमानदशायां तत्त्वादिसंयोगापेक्षजन्मापटादिरित्यध्यवसाय नूनमेतत्तत्त्वादिनाशात्संयोगनाशाद्वा विनष्टपटी
त्यनित्यतयाध्यवसीयते। न त्वेवं शब्दस्य कश्चिदकारणमवगम्यते यद्विनाशाद्विनष्ट इतीत्यवधारणं भवति। आतावयवतः सं
योगादिकारणानपेक्षत्वात् संभावितविनाशो नित्य एव शब्द इति स्त्रार्थः। ननु वायुरापघातशब्दता मिति शिक्षाकारवचनात् रा०म०
पटादिवदवयविद्रव्यविशेषाशब्दो ऽवस्तु दिवावयवसंयोगविभागविनाशसंभवत्येवास्य विनाश इति शंकानिराकर ११८

गार्थस्त्वं प्रख्याभावाच्च योगास्यानिप्रकृष्टाप्रत्यक्षाख्याप्रख्याप्रत्यभिज्ञेति यावत्तावायवीयावयवयोगस्य । अस्वप
स्य । कार्यशब्दप्रत्यभिज्ञाभावात्ननन्तकारणकं वं शब्दस्येति सूत्रार्थः । यदाह भाष्यकारः । वायवीयअवयवेह्यो भावत् वायोः
सन्निदर्शविशेषः स्यात् न च तानस्य वायवीयानवयवान् रशब्दगतान् स्पृशामः तस्मान्न वायुकारणकः शब्दः अतोनि
त्य इति । वार्त्तिके चाशब्दोपपत्तौ हलिकोनिषिद्धः स्पर्शात्वायवीयस्य तत्पुवमार्गः तस्मादनिर्द्धारितान्हतुभागः सर्वत्र साक्षा
द्भवतानिनित्यः इत्यत्र अनित्यः शब्द इत्याहलिंगदर्शनाच्च । एतच्च वार्त्तिककारैः स्पष्टार्थत्वात्प्रोक्तं । अन्ये परं वाक्यम
न्यार्थद्योतकलिंगमित्युच्यतातदत्र शब्दस्यानित्यत्वेदरूपतेवा चाविरूपनित्ययोति । रूपयतीति रूपं वाचः कर्त्तं । तद्धि
तत्त्वेनानित्यावेदवाक्यविरूपनित्येत्युच्यते नयोतिश्चात्यर्थः । द्रयं चान्य परान्नमकू । अतोत्रलिंगत्त दर्शनान्नित्या श्र्वं
इति । उक्तं च अन्ये पराहादं वाक्यवाचोनित्यत्तामनुवदन्तीति । भाष्यवार्त्तिकयोर्दृष्टमुपयुक्तं स्वदर्शनं । ग्रंथकार
राचत्यक्तं प्रमेयं त्रिखत्रेमया । नन्वस्तु नामैवं शब्दनित्यत्वं तथाप्यानुपर्व्वनिपवादनिबन्धमापन्नं । पदं हि वा
चकमिष्टं तच्च क्रमाधीनं विशकलितानां वर्णानामवाचकत्वात् क्रमश्चानित्यः तथा हि देशतः कालतो वा क्रमो भव
ति न च वर्णानां सर्वगतानां नित्यानां च स्वतः क्रमः संभवति । ध्वनयो हि क्रमवर्त्तिनः क्रमेणाशब्दानभिव्यंजयंतः स्वा

राम० ११९

यं क्रमं वर्णा अपि दर्शयंति। क्रमरचना च पुरुषाधीना यथाविवक्षं तदुपपत्तेः अतः पुरुषपारतंत्र्याद् अप्रामाण्यापत्तिः।
अतो निष्फलम् एव वर्णानां नित्यत्वप्रतिपादनं न हि तन्नित्यत्वेन वाचकस्य पदस्य नित्यत्वं सिध्यति। न हि परमाणूनां नि-
त्यत्वाद् आरब्धे घटादौ नित्यत्वं दृष्टं यथाहुः वर्णाः सर्वगतत्वाद्धि न स्वतः क्रमवृत्तयः। अनित्यध्वनिकार्यत्वात् क्रमस्या-
तो विनाशिता। पुरुषाधीनता चास्य तद्विवक्षावशाद् ध्वनेः। वर्णानां नित्यतेति नन्निष्फला परमोऽणुवत्। किं च क्रमं विना

119

वर्णानां प्रतिपादकत्वासंभवात् क्रमस्यैव वाचकत्वात् पदत्वं येन क्रमविशिष्टानां वर्णानां तस्य चानित्यत्वाद् वाचका-
नित्यत्वम् इति। अत्रोच्यते। नन्वेवं क्रमस्य पदत्वप्रसक्तिः वस्त्वंतराधारस्यास्वतंत्रस्य क्रमस्यादर्शनात्। अतोऽत्र गुण-
प्रधानभाव एव विचारणीयः। किं क्रमविशिष्टा वर्णा एव वाचकाः उत वर्णाश्रितः क्रम इति। एवं च सति क्रमवत्त्वाद् व-
र्णानाम् एव वाचकत्वं प्राधान्यात् न क्रमस्य। सर्वपदार्थगामिनस्तस्यावगमाराद् नत्यसौ स्वतंत्र एव वस्त्वंतरत्वेन क-
ल्पितव्यो वहि यत अत एव क्रमविशिष्टा वर्णा एवास्माकं प्रतिपादका न क्रममात्रं नन्वस्तु नामैवं तथापि क्रमस्य पु-
रुषकार्यत्वात् तद्विशिष्टवाचकस्यापि पौरुषेयत्वम् आपद्यते। तन्न अत्राहुः न च क्रमस्य कार्यत्वम् अपवर्गसिद्धप-
रिग्रहात् एवम् आन हि क्रमं कश्चिद्विरचयितुं प्रपद्यते। यथैवास्य पारंसंतिस्तथैवैनं विवक्षति। पारोक्ष्येवमतः

राम० ११९

स्यसंबंधवदनादिता। ततो नैव व्यवहारान्स्यात् कौटस्थ्येपि नित्यता। यत्र नः प्रतिषेध्यान: पुरुषाणां स्वतंत्रतेति नतु
वर्णानामपि प्रवाहरादेवानित्यद्वव्रयमवरूपनित्यत्वमस्तु। किं कूटस्थनित्यत्वयेति चेत। नैवं। वर्णानामनित्यत्वे व्यवह
रस्यैवानुपपत्तेः। तथाहि वर्णा ध्वनित्वे ध्वनस्तु ताल्वोपादानप्रयोगविशेषेणाश्रयात् क्रमविशेषेणोत्पाद्यमिति तु। परमा
णुभिर्घटादीनि। वर्णाभावे तु किं मताचर्चनास्यात् नहि निरुपादानं कार्यस्य संभवति। न च नित्यविभक्तानां क्रमानुप
स्व५ पत्तिरिति वाच्यं ध्वनिवशात्तदुपपत्तेः॥ ताल्वादिसंयोगविभागक्रमवशेन तत्प्रेरितानां ध्वनीनामपि क्रमो भवति। ना
त्पादयो ध्वनयश्च व्यज्ञात्पानित्याः तेन गकारौकारविसर्जनीयानां क्रमपि तदभिव्यंजकानां ध्वनिजातीयानां त
दनुरूपेण क्रमेण प्रेरणां चिकीर्षन्नताल्वादिसंजातीयानां ज्ञानानां संयोगविभागौ क्रमेणारभत इति तद्वशेन व्य
यकानामपि वर्णानां क्रमग्रह इति। केचित्तु क्रमस्य कूटस्थत्वमिवाहुः। तथाहि। पूर्वापर्यं क्रमः। चिरक्षिप्रात्मकं च
दीर्घादिरूपं पूर्वापरं चिरक्षिप्रप्रत्ययाश्रयकालालंबनात् न ध्वनिभिर्वर्णेषु पूर्वापरभागेन व्यज्यमानः काल एव
क्रम इति। ननु काल एव चेत् क्रमः स च एको विभुर्निरवयवश्च कथं पूर्वापरादिरूपेणाविभक्तो भासते उच्यते। यथाव
रोति नित्यः सर्वगतोपि दीर्घादिरूपेणाविभक्तो भासते ध्वन्युपाधिवशात् तथाकालोपि स्वयमभिन्नोपि क्रियादित्य

राम० १२० गतिक्रियोपाधिवशाच्छिन्नो भासते तेनोपाधयः पश्चाद्विनष्टवर्त्तमानानागतताः सूर्यादिक्रियाश्रितत्वेन कालेष्वती
तादिविभागाः क्षिप्रत्वं चाल्यक्रियावाच्छेदात् बहुक्रियावच्छेदाच्चिरत्वमिति क्रमस्यानित्यत्वे पदस्यापि नित्यत्वं सिद्धं॥
यदाहुः तस्मान्न पदकर्मास्ति विनाशी कश्चिदीदृशाः तेन नित्यं पदं सिद्धं वर्णानित्यत्ववादिनां ।ननु ध्वनिधर्माः क्रमादयः
कथं वर्णानाम धर्मप्राप्ता पयत्ता भंगं भवन्ति। अत्राहुः परधर्मेपि वागवमुक्त मरवन्न वादिवत् ।किं पुनः क्रमादिना व्यवहा
120 रनित्यत्वप्रमाणी । अर्थापत्तिरेवेति ब्रूमः पर्वोक्तात्यर्थापत्तिर्वा च कः पश्येवनित्यत्वं कल्पयति नव सम्मस्वरूपमात्रस्पे
ति॥ इति शब्दाधिकरणं॥ उत्पत्तौ वा वचनाः स्युः॥ ननु पदपदार्थसंबंधस्य नित्यत्वे साधिते पुरुषानुप्रवेशाभावात् प्रति
ज्ञाते चोदनाप्रामाण्ये सिद्धमेवेति किं वाक्यविचारेणेत्याशंक्याह॥ यद्यपीति । अनेन पूर्वोत्तरविचारयोराक्षेपसंग
तिर्दर्शिता । अत्र कश्चिन्नत्वावत्पदार्थनित्यत्वं क्वचित् साधितम् आनन्तर्यं चेतस्सद्भावमात्रप्रतिपादनात् अतः पदप
दार्थसंबंधानामापौरुषेयत्वानुभाषणमनुपपन्नं उच्यते । शब्दनित्यत्ववदतोत रपि प्राप्यामित्येयानित्यत्वे वेकवे राम०
सिद्धे दृष्टेकगोव्यक्तेः परदर्शनेन सएवायमितिनिश्चयात् यागादिहि स्वर्गादिफलसाधनत्वाद्धर्मः स च चो १२०
ना येनिवैनपदेनोच्यते इति संकेताग्रहणं त्रिमलो वाक्यार्थः प्रत्यक्षस्य पर्षः । निर्मलत्वामदर्शयितुं यावत्संभ

वंमल्लानिविकल्पानिराकाराणीति तथाहीति। ननु वाक्यस्य पदसंघातरूपत्वात्कथं पदपङ्क्तिर्देशः। आकांक्षादिमत्पद
संघातरूपत्वेन एकपङ्क्तिर्देश इति क्रमः। अतोपि न संबंधग्रहणमित्याह। वदार्थस्येति। न च दृष्टसंगतीन्यपि च सुरा
दीन्यर्थबोधकानि स्युरेवसत्यं। तथा सत्यामात्रेणैव बोधकत्वात्। ननु शब्दस्य तद्योग्यताह। न चेति। अत्र चोदयति यद्यपीति।
अनंतरोक्तदोषद्वयपरिहाराशंकात अथेति तद्रहितानां पदार्थानामवगतिरहितानां वाक्यार्थस्य तयाऽप्रतीतिः अ
गावेकल्पानामसाद्दृष्टगामेव न भवतीत्यर्थः। द्वयमेतिततदिति। पदपदार्थव्यतिरेकेण वाक्यवाक्यार्थयोः। पारार्थ्यं तत्र तम
तयोरनवगमादितिभावः। अपि संबंधादिति। यथा पदपदार्थयोः संबंधोस्ति न तथा पदार्थवाक्यार्थयोः संबंधो
स्तीत्यर्थः। किंच पदार्थानां परस्परमप्यसंबंधाद्वाक्यार्थावगतिर्दुर्लभा तथा हि जातिपदार्थपक्षे तावद्गोशब्द
न गोत्वमात्रमभिहितं शुक्लपदेन तु तादृक् वाक्यं भवत तस्य वशुक्लगुणानुरागं प्रतिपादयतीति संसर्गो वाक्यार्थः तत
श्चैकवाक्यपदानामेकवाक्यता। व्यक्तिपदार्थपक्षे त्वेगोशब्देन वशुक्लकृष्णादिव्यक्तिषु पर्वास्वभिहितास्तु
शुक्लपदेन शुक्लसंसर्गं प्रतिपादयदपि तत्पराच्चसत्पानर्थक्यात्कृष्णादिव्यवच्छेदेनैव विशेषेराणाम वनीतिभे
दो वाक्यार्थः तत्राद्यपक्षे संसर्ग एव मुख्यो वाक्यार्थः। कृष्णादिव्यवच्छेदस्त्वार्थिकः। द्वितीयपक्षे तु शाब्द एव कृष्णा

श्री· १२१ दिव्यवच्छेदः तत्रपदाभिधेयं लक्षणापादकमितिरितिचेत्। आनन्तर्यं दोषादिति चेत्। इकारान्तमप्यकारेण पारणसंहितादो-
दोषात् यकारान्तमपि वर्णान्त्यापादकमप्यत इति॰ अथवा पदान्तरागमवेदं पारमार्थिक एवायं यकारः दधिशब्दार्थप्रतीतिस्तत्र त-
दामानार्थत्वात्॥ इको यणचीति सूत्रेण समानार्थत्वावगमात् अनेन हीकारस्य स्थाने यकारो च्चारणसंहितायां भवतीत्यु-
च्यते तेनेकारान्तपदसमानार्थत्वमप्यकथितं भवति॥ प्राप्यमिति यापादेकत्वमिति चेत्। न प्राप्यमित्ता याप्त्यभावात्। य-
दि कालस्थानवगमस्तत्रार्थदधीत्यत्र व्युत्पन्नस्य दध्यत्रेत्यत्रात् दर्थावबोधः स्यात्। न त्ववमस्ति॥ विकारान्तस्यासंबन्धाग्र-
121 हणमिति चेत्। न। लक्षणेन तद्धि दुक्तं वर्णसंबन्धग्रहणासंभावनातिकेशाभावात्। ननु दध्यात्रेत्यत्राविभक्तस्यान्तात्प-
च्छेनार्थवच्चमतः कथं तदतो दध्यर्थप्रतीतिरिति॥ नैष दोषः। अवध्यग्रहणोच्येतस्मादवपदान्तरात् दध्यर्थावग-
ममनार्थवत्त्वापपात्तः। अथवा तत्र यत एवावधिर्मनत्तुविच्छिद्योच्चार्यते संहितायामवास्य साधुत्वात् विभिद्यमानस्या-
साधुत्वप्रसंगात्। यथा कुंभकारादिसमासेन कदाचिदुत्तरपदविभिद्योच्चार्यते एवमिहापि संहितायां। असंहितायां तु द-
धिपदमेवनित्यं प्रायात्तत्व्यमिति। यथा दुःखायतिचावधिस्तत्र व्यंजनं तेन न च्यते। दधिशब्दावावाध्यत्वान्नित्यं॥ नित्य- राम०
समासवदिति। एवं राजराज्ञादिपदेष्वपि व्यतिरेकव्यभिचारः परिहर्त्तव्यः तत्रापि पदान्तरस्य किंचिदंशसमानस्त्रस्यतदर्थ- १२१

योर्जातिगुणयोः पार्श्वे योनुरागव्यवच्छेदाभावात् विशेषणविशेष्यत्वमनुपपन्नं। अनुरागारंभवेचतन्निबंधनोव्य
वच्छेदोप्यनुपपन्नः। यथाहुः गोत्वेन न हि शुक्लो वेगो वेत्यादि न रस्यात् अन्योन्याश्रयप्रसङ्गो वा व्यक्तिगवात् हुयोरपि न
नुमाल्क परस्परानुरागस्तथापि व्यक्तिरेवताभ्यामनुरज्यमाना वाक्यार्थो भविष्यति। मैवं तस्याः शब्देनाप्रतिपाद्यमाना
या वाक्यार्थत्वासंभवात्। तदसंभवाच्च न शब्दयोरप्येकवाक्यतासिद्धिः इतरत्र न संसर्गभेदयोर्वाक्यार्थत्वं। यथा
हुः संसर्गे वापि भेदे वा वाक्यार्थे परिकल्पिते तस्य तावत्पदार्थत्वान्निवृवाक्यार्थसंभवः पदार्थव्यतिरिक्तत्वेना
स्तिसंसर्गभेदयोः। पदार्थैरेव संसर्गभेदानुगृहीतैर्वाक्यार्थो नाम वस्त्वन्तरमारभ्यत इति चेत्। न। जातिगुणयो
र्वस्त्वन्तरानारंभकत्वात्। वाक्यार्थातिरिक्तस्य तस्य प्रमाणान्तरेणानुपलंभाच्च। अत्र वैयाकरणोक्ता वाक्यविकल्पाः
।आख्यातं सत्वं न्तरानारंभकत्वात्। वाक्यार्थातिरिक्तस्य तस्य प्रख्या शब्दसंघातो जातिः संघातवर्तिना एकोनव
यवः शब्दः क्रमो बुद्ध्यनुसंहृतिः पदमाद्यं पृथक्सर्वपदं साकांक्षमित्यपि वाक्यं प्रतिमतिर्भिन्ना बहुधा न्यायवाद
नां। तत्र तावदाद्यस्य पदस्यान्त्यस्य वा साकांक्षं वा प्रत्येकमपि योनुग्रहापेक्षया संघातस्य वाक्यत्वं कल्पने
तदयुक्तं। इतरेतरानुग्रहासंभवात्। तत्र न तावदाद्यस्येतरेणानुग्रहः कश्चिद्दृष्टपातन च संभवस्य योगपद्यात्

किंचाद्यस्येव सर्वैः संस्क्रियमाणस्य प्राधान्यान्न वाक्यत्वं स्यात् नान्त्यस्यस्य सर्वेषां वा संहतानां· दयपयन्तानंबी
स्यस्यानुग्रहः उक्तदोषात्· अनुग्रहहारहितानां च स्वतन्त्राणामेव वाक्यत्वे व्यस्तो। चारितानां गौरश्व इत्यादीनां च
वाक्यत्वं स्यात्। नाप्येकोनवयवः शब्दो जातिः स्वघातवर्त्तिनीति पक्षो पदस्फोटवादिनिराकरणेन निराकृतत्वात्
। नापि क्रमो बुद्ध्यनुसंततिरिति पक्षः। क्रमस्य बुद्ध्यानिर्छ्व्यापसंहर्तुमशक्यत्वात्। यथा च वर्णक्रमस्य पदत्वं निराकृ
तं तथा पदक्रमस्य वाक्यत्वमपि निराकर्तव्यं। किंच वर्णक्रमस्य पदत्वं युज्यतामपि अर्थप्रतीत्यौपयिकत्वात् क्रमा
न्तरे चार्थप्रतीत्यभावात् पदक्रमस्य तु वाक्यार्थप्रत्ययानौपयिकस्य कथं वाक्यत्वं। औपयिकत्वे वाक्यभेदे सति
वाक्यार्थभेदः स्यात्। अस्तु तर्हि आख्यातपदमेव वाक्यं। प्राधान्यात् पदान्तरस्य तदर्थत्वात्॥ प्राधान्यं चाख्यातस्य
पदार्थान्तरानुरक्तप्रधानभूतभावनाप्रतिपादकत्वात्। एतदप्ययुक्तं। नदाकारतानोत्पत्तावपि पदार्थानां परस्प
रसंगत्यभावात्। कारकाणां क्रियायां वा परस्परसंबन्धाप्रतीतेः। न तावद्द्रव्याणां परस्परसंबन्धः। तादात्म्याद्यसंभ
वात्। यथाहुः अत्यन्तभेदनिष्पन्नषष्ठ्याभावान्येषणोः स्वतीयाद्युपहाररासन्निधेरपि बाधनात्- हंत तर्हि का
रकविभक्त्यवगतक्रियायैव सह द्रव्याणां संबन्धोऽस्तु मेवं। स्वरूपेण द्रव्याणां क्रियासंबन्धासंभवात्। न ह्याद्रैः काष्ठैः

पाकक्रियासंभवति। शक्तिरेव कारकं न चाद्रीणां शक्तिरस्तीति चेत् न असमर्थस्य व्यापारासंभवात् शक्तिविशिष्टं द्र
व्यं कारकमिति चेत् न। शक्तेरपि तेनाश्लिष्टद्रेः पाकासंभवात्। ज्वलनादिमुपेतनात्तं पाकसंबंध इति चेत् न क्रिय
बंध इति चेत् योः परस्परान्वयासंभवात् काष्ठादीनां चतत्त्वनोपसृष्टानां पाकसाधनत्वासंभवाच्चेति दिक्। अत्राधि
केवार्त्तिकवचनं तद्वा। एवं धात्वर्थप्रत्ययवाच्ययोः क्रिययोरपि संगति न संभवति। भावनासंबंधाद्धि साध्यतया साधनतया
वास्यास्तावन्नापि पर्यायापि संभवति साध्यसाधनवाचिन्योर्द्वितीयान्वितीययोः पचतीत्यत्राश्रवणात्। नापि विध्यन्वयः संभ
वति। सकृदुच्चरितस्य विधिप्रत्ययस्य श्रोतीनेकव्यापारासंभवात्। धात्वर्थान्वितभावनाविधानादर्शात् धात्वर्थे विधिरपि
तेस्यतीति चेत् न। धात्वर्थान्वयात्सा गोवत्समानप्रत्ययोपादानलक्षणापात्रत्वात्स्यात्केवलाया एव भावनायो विधा
नात्। मास्तु धात्वर्थविधानं तथापि पदश्रुत्याभावनायां विनियुक्तो वा तत्तस्याप्यनुष्ठानं संस्यति। मैवं। विधिसंबंधवि
नानुष्ठानासिद्धेः विध्यधीना हि प्रवृत्तिर्नभिधानविनियोगमात्राधीनेति। यदा च समानपदोपात्तस्यापि धात्वर्थस्य वि
धानं तदा पदान्तरगतस्य सोमादेः कारकस्य वाक्यान्तरस्य च प्रयाजादि विध्यन्तरस्य द्वारापास्तं विधानो विधिना त्वसंगतस्य
प्रयाजादर्विध्यन्तरसमारव्यापिनि निर्मितास्यात्। यदा शात्र यस्य विध्यसंबंधाज्ज्ञानेवाविधान्तव्यानदा तस्या केवला।

श्री०
१२३

123

यांपुरुषप्रवृत्तावपि नुमङ्गाक्यत्वात्तयाप्यन्वयासंभवात् निर्विषयत्वं विधेरिति दिक्। ननु माभूदभावना द्वारं शानां वि
धिः। सा क्षादेव भविष्यतीति चेत्. नेति ब्रूमः। समानप्रत्ययोपात्तभावनावरुद्धत्वविधेरन्यत्र गमनासंभवात् पु
रुषवा। पारविषयवाच्यविधेः। कारकाणां चात दूपवात्र साक्षाद्विधानमिति। एवमनुपसर्गनिपातानामपि न। का
नचित्संगतिः। नन्वावत्परस्परमुपसर्गाणां संगतिरसंभवात्। नापिनामभिः। उपसर्गाः क्रियायोग इति स्मरणेन नाम
भिः संबध्यमानस्योपसर्गत्वमेव नस्यात्। नापि धात्वर्थेन क्रियया वाप्यगतिरकारकत्वात्। न त्त कारकस्यापि विशे
षणात्तयो भविष्यति। नैवं। अयाऽननुरंजकत्वात्। अननुरंजकत्वं चात्रानर्थक्यान्यवाचित्वविपरीतप्रसाधनात्। नचु
प्रत्वंवाते यस्मिन्नत्र कश्चिदतिरिक्तोर्थोऽस्ति। प्रासाद इत्यादौ चान्य एवार्थः। प्रतिष्ठत इत्यत्र च विपरीत एवार्थः। नचै
वं रूपस्य विशेषणत्वं संभवति। यथाहुः। यन्नरोषार्थविरोधेन विशेषमुपजन्यतां। विशेषणं तदेवेष्टं ननु यदृष्टार्थे
नाशकं। नन्वागच्छतु होमेनीत्यादौ आभिमुख्यादीविशेषोपजननाद्विशेषणत्वं भविष्यति। नैवं आभिमुख्यादेः
कर्तृधर्मत्वेन धात्वर्थांगत्वाभावात्। कर्तृसंबोधाच्चोपसर्गत्वविरोधात्। नापि भावनया संगतिस्तदर्थानामेव भावनं
त्वमेवात। नन्वादयस्तु निपातविशेषा। यानेवसंबद्धुमिच्छात्ततास्येवार्थे विरुद्धत्वेनाकनचित्संबद्धुमर्हतीति॥ किं च

राम०
१२३

पदार्थपूर्वको वाक्यार्थो भवतीति न चोपसर्गनिपातानां गवादिशब्दानामिव अयमस्यार्थ इति प्रतिनियमतः स्वातन्त्र्ये
णा कश्चिदर्थो ऽवगम्यते यद्वारेणैते वाक्यार्थावबोधं गच्छेयुरिति तस्मादेतत्पदार्था एव वाक्यार्थः न च गौरश्वः पुरुषो हस्ती
त्यस्यापि वाक्यत्वप्रसंगः पदार्थमात्रस्य तदनीकारात् अर्थान्तरान्वितरूपविशेषस्यैव वाक्यत्वाभ्युपगमात् तथा हि
पदं केवलोच्चरितं पदार्थस्वरूपमभिधत्ते पदान्तरसमभिव्याहृतं तु तदर्थान्तरान्वितं शेष।मिति। ननु तदपि युक्तं। यदि हि
पदानि केवलोच्चरितानि कंचिदर्थस्वरूपमेवाभिदध्युः पदान्तरसमभिव्याहारे चानयनान्वितं तदुत्रिवा कंचिद्बंधनान्वितं
तर्हि पदार्थः कश्चिदप्याभ्यासो न स्यात्। सर्वत्रान्वितमेवाभिधत्त इति चेत् न। केवलोच्चारितो पदार्थस्वरूपमात्रावगमात्।
अथ पदार्थासंगतं एवार्थो वाक्यं प्रवर्तत इत्युच्यते। तर्हि पदार्थज्ञानस्य तत्र दृष्टोपकारितानस्यात्। अज्ञातपदार्थस्या
पि वाक्यार्थावगतिप्रसंगादित्यलमतिप्रपञ्चेनासंबंधमाशंकते न चेति। परिहरति सत्यमिति। येन प्रतिनियतविशेषा
वगतिर्भवति स एव संबंधो वाच्य इति भावः। असाधारणापि क्रिमतावता स्यादिति तत्राह तत्र क्रोति। विशेषमात्राक्षेपेण
तत्पर्यवसानसंभवादिति भावः। सत्स्वपीति। एतच्च सन्निधिमात्राभिप्रायेणादूषणं भवति। ज्ञाव सन्निधौ तु नैतद्दूषणं
भवतीति चिन्त्यं। ऽपपादितमर्थं नियामयति तस्मादिति। ननु चोदनालक्षणोऽर्थो धर्म इत्युक्तं चोदना च वाक्यमेवातो

श्री० १२५ वाक्यमेव वाक्यार्थप्रतीतमूलमिति कथं निर्मूलत्वं। सत्यं। सदपि वाक्यमगृहीतसंबंधत्वान्न वाक्यार्थावगतिः पुरुषा
णामित्यर्थः। अयं च सूत्रार्थः। उत्पत्तौ चेति चकारोऽस्यायमर्थ इति संकेतः कृतो वृद्धादिवत्। ततश्च वाक्यार्थावगतिः
पुरुषाणामित्यर्थः। अयं च सूत्र+ प्रतीतमूलो संप्रति कः पारिभाषिकः। केचिद्वेदान्तेवाऽस्य वाक्यस्यायमर्थ इति सं
केतः कृतो वृद्धादिवत्। ततश्च वाक्यार्थो+ त्रार्थः। उत्पत्तौ चेति चकारोऽप्यर्थः। शब्दार्थयोः संबंधो नामुत्पत्तौ। औत्प
त्तिकात्वपि नित्यत्वेपीति यावत्। न चोदनायाः प्रामाण्यं यत्रात्र परात्मकाः शब्दा वाक्यार्थस्यावचनात्। ते हि सामान्यमभि
दधति वाक्यार्थश्च विशेषरूपः। ननु पदाभिहिताः पदार्था एव वाक्यार्थाबाधं तं तुत्राह अर्थस्यात न्निमित्तत्वादिति॥
अर्थस्य पदार्थस्य अनन्निमित्तत्वात् वाक्यार्थाबाधनिमित्तत्वाभावात् पदार्था नो वाक्यार्थाबाधकत्वेऽ शब्दात्ते व वाक्या
र्थस्य स्यात्। तत्र पपत्स्यं तं रं तु ग्रंथकाराः क्रमवज्ञेयाः। अथवा। शब्दार्थसंबंधानामौत्पत्तिकत्वेपि वेदवाक्यार्थस्य धर्मस्याव
चनाः अप्रत्तपादकाः स्युः अप्रमाणमिति यावत्। न च पदार्थानां तन्निमित्तभावो असंबंधादिति सूत्रार्थः। असंबंधाप
पपत्तिश्च ग्रंथोक्तेवानुसंधेया। मन्त्यान्त्रिशब्देस्यकथमौत्पत्तिकशब्दार्थत्वं। औत्पत्तिकशब्दलक्षकत्वेनेति क्रमः। पथ्या राम०
धावोरित्यस्य धावाष्टथिव्योरिति। वेदप्रस्थानाभ्यासवतो मतमेषः प्रायशास्त्रेष्वपु छांदसपदप्रयोग एवमेवतिति १२५

125

न दोषः कश्चित्॥ एकदेशिमतेन तावत्पूर्वपक्षं परिहर्तुमाह अत्रेति संबंधग्रहमुपपादयति वाक्यमिति॥ तदेतद्धं
गीकारेण निराकरोति॥ सा(?)पमिति॥ अस्त्वेवं तथापि त्वन्मते साक्षाद्देववाक्याद्वाक्यार्थावगतिर्न संभवतीत्यर्थः कथं न
युक्तेत्यत आह तिरोभावेपीति॥ एतदेव विवृणोति परावेति॥ श्लोकं व्याचष्टे यद्योवति॥ हरपत इति॥ यस्माद्देवमाता नस
साद्वाक्याद्देववाक्यार्थावगतिः त्वन्मते संभवतीति भावः। अत्र परिहारमाशंक्य निराकरोति। न चेति। अगत्या प्रमाणाद्याभ्य
यणामिति च तानसिद्धं तन्नीत्यागतिसंभवादित्याह। अन्वितेति वक्ष्याम इति स्वसिद्धान्तविरूपणावसर इत्यर्थः। अन्वि
ताभिधानपक्षे तमपेन्नघप्रतीतिसिपतीतायेपीति। अस्मिन्नेव पक्षे दूषणान्तरमाह किं चेति। ननु समभिव्याहृतयोः
पदयोः स्पष्टमेवैकवाक्यत्वं गम्यते॥ सत्यं तथाप्यन्वितभेदाद्वाक्यभेदः स्यादित्याह गामिति। न हीति विशिष्टैका
र्थप्रतिपादकत्वेनैवैकवाक्यत्वमिति भावः। अविदिताशयं श्चोदयति नन्विति। अभिप्रायमुद्घाटयन्परिह
रति सत्यमिति। भयानु प्रत्येकस्समेकवाक्यत्वं तत्वापादितमित्यभिप्रायः। उक्तं दूषणं लौकिकवाक्येति दिशति॥
एवमिति भिन्नार्थपर्यवसितत्वादिति भावः। दूषणमुपसंहरति तस्मादिति। अनेकार्थत्वं विवृणोति गोश्वे
ति। ननु प्रत्येकप्रभिधाने नैकार्थत्वापत्तिः न त्वेवं किं त्वेको हलोपेवानयतान्वितस्वार्थमभिधत्तेऽतो नानेकार्थत्वमत आ

श्री० १२५ हानहीति। गोशब्दाद्गोरूपस्थितौ सत्यामेव तद्विशिष्टानयनाभिधानमिति व्यापारभेदाद्वाक्यभेदः स्यादेवेति भावः
इतोप्येवमित्याह। किंचेति। नन्वत्र समभिव्याहारवशेन गामानय गुणान्वितस्यैव पुरुषस्य प्रतीतिरेकपदान्वयः सि
125 ध्यतीत्यत्राह। समासे हीति। ततः किमत आह। नचेति। असो अन्विताभिधानतो न सिध्यति समासपदार्थस्यान्ये(?)
केनापि पदेनानभिधानादित्यर्थः। एतदेवोपपादयति पुरुषेति। कथं तर्हि तदवगतिरत्राह। अतइति। अन्विता
नामपि पदार्थानां पुनराकांक्षादिवशेन परस्परान्वय इत्यर्थः। इतोप्येवमित्याह। किंचेति। विपरीतमेव विष्टणोति अ
त्रैवेति। ननु रूढेः शीघ्रप्रवृत्तित्वात्तेषु सजातिरेवाहोस्मर्य्यते तत्राह। अतइति। अतलक्षणात्मिकायाः सदसंभवादिति भावः।
नन्वेवं सति कथं योगस्य बलवत्वासिद्धिरित्याशंकावशादिशयमाह। अभिधानेत्विति। अस्मत्पक्षेतु नैषदोषो भवतीत्याह
स्वरूपेति। अन्विताभिधानपक्ष एव पदान्तरापेक्षास्यादिति भावः। रूढ्यर्थो योगिकाद्बलवान्न भवतीत्यर्थः। एतदपि
स्वरूपमात्राभिधानपक्षे सिध्यतीत्याह। एवमिति। यस्माद्वाक्यादेव साक्षाद्वाक्यार्थप्रतीतिर्न संभवति तस्मादयमेव
पक्षोङ्गीकार्य इत्याह। तस्मादिति। यद्यपि प्रत्येकं पदानि संहतानि चानसाक्षात् यत्नेनापि(?) पदार्थाः पादे। प्रति राम० १२५
पादिताः प्रत्यासत्त्यपेक्षायोग्यत्वसनाथाः मत्तेभविष्यन्ति० तज्ज्ञापकवाक्यार्थप्रत्ययस्य भावादित्यर्थः। पदार्थप्रति

पदैर्व्याहृतानां पदानां पुनर्वाक्यार्थेपि व्यापारे गौरवम् दृष्टकल्पना · दृष्टहानिश्च स्यात् · यथाहुः · पदार्थैः प्रयुक्तानां पुन
र्व्यापारकल्पना पदार्थानां च सामर्थ्यागम्यमानम् अङ्गीकृतं । वस्तोस्यो हि पदार्थेषु प्रतीतिषु तत्रद्वं तत्र रामेव वाक्यार्थप्रतीतिर्जायेत न वा
सामर्थ्यगम्यत इत्यर्थः । अत्र कश्चित्तु मुख्यमेव पदं पदार्थस्य वाचकं प्रवृत्ति प्रत्ययरूपो वाक्यभेदस्तु प्रक्रियामात्रं न यावेको
कनगौः कल्पित इत्याहुस्तदयुक्तं । प्रत्यक्षेण प्रकृतिप्रत्ययपदद्वयानां भेदावगमाच्च · ह्रस्वपात हि ह्रस्वं ह्रस्वं राज्यत्र प्रकृ
त्येकार्थमिति दिक् । आस्मिन्पक्षेन्विताद्युक्तवादपि प्रत्ययभेदात्कर्मचकारण्वं तत्पार्थभेदः तथा च क्षपंचेत्यत्र प्रकृति
तदर्थभेदे प्रत्ययार्थभेदेन कर्मत्वरूपैकार्थत्वमिति दिक् ॥ आस्मिन्पक्षेन्विताद्वयोपि सिध्यतीत्याह यत्रापीति ॥ लक्षणा
हातीति । क्रियामात्रलक्षकत्वेन प्रवृत्तान्यानपदपादेकेवाकाङ्क्षितयानयनमेव लक्षयतीत्यर्थः । अन्विताभिधानवादिमा
ध्यतदंगीकृतमित्याह यत्रापीति । एतादृशदृष्टान्तेनोपपाद्विकेवाकाङ्क्षितयानयनमेवहृदयति । तथाहीति । एतच्च वृद्धि
कानां मतं । अस्यार्थः आविक्रियत इत्यधिकारात् पदार्थस्तस्य युगपद्वाच्यतायै केन पदेन पदार्थद्वयस्यैकदयस्थोप
नतम्भिन्नद्वोभवतीत्यर्थः । पताब्रिरूपणाचाधिकारलक्षणो करिष्यते । अत्रान्विताभिधानवादी चोदयति नन्विति । अत्र तः
पदार्थवगात व्यभिचारान पदानामेकान्विताभिधानं युक्तमिति शङ्कार्थः । प्रतिवचायपरिहरति आन्वितेनेति । तुल्यत्व

श्री० १२६ ह ३ विद्दरणो त्ति यावित्ति। यद्योति तत्काले गोशब्ददेवदत्तशब्दौ स्मृतिस्थौ भवतः तथापि न तावन्वयं प्रतिपादयत इति नु
त्योदोषइत्यर्थः। विशेषं शंकते। अथोति यादृगवस्थितिः समभिव्याहृतैरित्यर्थः॥ सामान्यनपारहरति। तदिति। सामा
न विद्दरणोतित्ते पाति। ननु समानौ रस्य पुरुषाधीनत्वाद प्रामाण्यस्यादत्त आहातिषौ चेति। वाक्यस्फोटनिरासोपि पद
126 स्फोटनिरासवद्दवगंतव्य इत्याह वाक्येति। यथानंशस्य पदस्याविशाद्याावेशाद्येन पुत्पेतेत यानंशस्य वाक्यस्यापि
सामान्यविशेषत्वानामनुभूयमानताहि विशाद्यः सागान्य मात्रस्य तन्मात्रस्य वाावदनमावेशद्यं न। वितन्निरवि
ल सामान्यविशेषविरहिताः स्फाटस्य संभवति। तदागमन्यायेन चान्वयव्यतिरेकाभ्यामथाविगमादनंशानानुप
त्तिः। ननु पदविभागेत्रैव प्रकृतिप्रत्ययाभ्यामर्थद्वयाभिधानं तर्हि यत्र प्रकृतिमात्रं प्रयुज्यते अग्निचिदित्यादौ य
त्र वा प्रत्ययमात्रं अर्थकं नेति॥ कथमत्रार्थद्वयाभिधानं। तत्र प्रतीतिबलेन तन्मात्रस्यैव द्विशक्तत्वादिति क्रमः॥ शब्दस्य
भावस्यान्यथा केतुमशक्यत्वात्। अत्रैकदेशानुमानेनेभयार्थत्वमितिकश्चित्० तत्र० न हि केवलप्रत्ययस्य कदाचि राम० १२६
दपि प्रयोगोस्ति यत्रास्त न ज्ञातसाहचर्यो च्छिन्ता तस्मनुमापयेत्० आक्षेपेति च इह शब्देन विनेवसर्वदा प्रयुज्य
मानः कथमिदं शब्दमनुमापायत। नाप्यर्थेकदेशेन लक्षणायानत्यन्तीतिलक्षणानुगतत्वभावात्। किं वंत्तादिषु मुख्य

त्वेनैव प्रतीतेः । दूषणान्तरं तु स्फोटवादोक्तमनुसंधेयं ॥ अत्र स्फोटवादी यत्नज्ञाननाम्नैव पदव्यतिरिक्तासंभवादानर्थक्य
माहुः । तथा हि नामाख्यातादिसाकल्पाविकल्पापूर्गमेसति । तदर्थानुगमोऽदृष्टः पदवाक्यान्तराश्रयः । विप्राश्वः प
पचन्ति पालेराजदुहितृन्यायादिति । तथान्यरूपमन्यरूपमन्यत्राराजादृध्यत्रगाम्निति । अस्यार्थः पदवाक्यान्तराश्रय
इति पदान्तराश्रयो वाक्यान्तरत्वं । तत्र साकल्पानुगमे तदर्थानुगमाभावादन्वयो नास्ति विकल्पानुगमे तदर्थानुग
मो दृष्टः । तत्र नामपदमाख्यातपदमित्यादिरूपेण पदान्तरत्वं । पदमेदौ द्वचनवाक्यान्तरमेतु । सकलस्य वा
चकरूपस्य व्यतिरिक्तेपि तदर्थे संभवाद्यतिरिक्तोपि नास्ति । तत्र च पाभावोदाहरणं विप्रेत्यादि । विप्र इत्यादौ तु
स्वातन्त्र्याद् उपसर्गार्थवाचिनो रष्टो । तत्र पुदायस्वल्पवप्राह्मणवाचकः । अश्व इत्यपि नामेदमाख्यातं लुङि
चेदृशः । आख्यातं पचन्ते शावदः पचन्ते इति च द्वयं । स्त्रीद्विवं पुंबुद्धं वा । तत्र षष्ठ्यर्थे चतुर्थ्यां पापचते इति तां
सर्वे चतुर्थ्यं तेरानुः पदं । यातं लोपमध्यमद्विवमं यातं लङि वा भवेत्तके । निष्ठाद्वितीयान्तं प्रथमान्तं नपुं
सकं । अयातमित्यत्र यातं शावद्स्यस्य कल्पानुगमे स्वार्थासंभवः । तथा यातमयातमिति द्वयोः पदयोः प्र
त्येकमाख्यातानिष्ठाप्रथमान्तद्वितीयान्तत्वेन त्रेधा त्रेधा विभागे तत्र तदर्थव्यभिचारः । राजहस्तीसमासे

श्री० १२७

127

वाराजलोरामध्यमोपवा॰हास्तिनीत्यपसप्रम्यामथस्त्रीप्रसयांतरं॰आगादितिलुडु॑न्तोवाअगोवापंचमीपरः।ए
वमेकरूपेपिपदेनानानार्थविकल्पेनतत्रदर्थानुगमाभावः।आदमेदानामपिपदानांनकश्चिदर्थोव्यवस्थितः।ज्ञा क्यो
निश्चेतुंतदानिश्चयेचतदर्थानिस्पवावाक्यार्थस्याप्यनिश्चयः स्यात्॰निर्भागवाक्यवादिनांतुप्रसेकंवाक्याभेदान्नास्तिव्य
भिचारः।तथान्यरूपमितित।नुव्यतिरेकव्यभिचारोदाहरणां।राजेतिज्ञानेन्यपवाचकोदृष्टोराजेसत्रतवृद्धव्यति॥
रकेपिन्यपप्रतीतिर्भवति।तथादथ्यात्रस्पत्रदधिशब्दव्यतिरेकेपितदर्थप्रतीतिर्दृष्टा।गामित्यत्रगौरित्यस्यपदस्या
भावेपितदर्थप्रतीतिरिव्यतिरेकव्यभिचारः।पर्वपदव्यतिरिकेपिपदान्तरागादवात्रार्थप्रतीतिर्भविष्यतीतिचेत्त
न्नपदान्तरस्यतत्रसंकेतग्रहणाभावात्नचपदान्तरेपिसंकेतग्रहोस्त्विवितिवाच्यं।आनंत्योनततत्रसंकेतग्रहासं
भवात्।अन्नाहुः।अत्रक्रमः पदात्मानःसार्वद्यतेषुमिद्यतोकेनचिद्धर्मायायोगेनजराराजादिवकमात्।केनपु
नरूपायेनायंधर्मभेदोवगम्यते।क्रमोन्यत्वेन्यत्नवादिभिरितिक्रमः।यथाहुः॰पदावधारणोपायान्वहू
न्निच्छन्तिसूरयः॰क्रमन्यूनातिरिक्तत्वस्वरवाक्यश्रुतिस्मृतीः।नदीहीनेत्यत्रक्रमान्यत्वं।भुनः॰स्मनइतिन्यूना
तिरिक्तत्वंभुनइतिकर्मोभ्यतः॰भुनकउच्यते॰स्मनइतिचद्विमापन्नः॰तत्रक्रमान्यत्वेन्यूनत्वेवाविकल्पस्यवा रांम० १२७

वकत्वाभावाद्वाक्यार्थानवगतिरित्यविवादः । अतिरेके च पदान्तरत्वमेवास्वरसस्तु बहुव्रीह्यादिर्निर्णयो
पायः ॥ भोक्तुकामः पचत इति वाक्यवशेनाख्यातनिर्णयात् । पचते दक्षिणां देहीत्यत्र नामाधात्वन्तारेकवा
क्यवशेन शत्रन्ते । आकृतिः सामानाधिकरण्यात् । तत्र यातः पुनरयातीत्यत्राख्यातसामानाधिकरण्यात् यात इति
कर्तृनिष्ठाप्रथमान्तनामपदनिर्णयात् । पातो देवदत्तयज्ञदत्तावित्यत्र द्विवचनान्तनामपदसामानाधिकर
ण्यात् इति दाख्यातनिर्णयः । स्मरणमत्र व्याकरणं । यथा मातापित्रः सम्बन्धानुभवान्निमित्तस्मरणात्समानेपि
मनुष्यत्वे ब्राह्मणत्वादिकनिर्णयात् । तथात्र स्वस्वदेवदत्तयुक्तैः स्वपदलोकेसंकीर्णमपि व्याकरणास्म
रणादाख्यातनिर्णयात् । एवमन्यदप्यूह्यम् । एतत्स्वपचस्य वार्त्तिकवृत्तं व्यः । नापि व्यतिरेकव्यभिचारः । दध्य
त्रेत्यत्र दधिपदव्यतिरेकाभावेन प्रत्यभिज्ञयादधिशब्दार्थस्यैवावगमात् । कर्णितं हि विलक्षणापावगतिरिति
चेन्न । आनन्तर्ये होषादिति यमः । इकारान्तमप्यकारेण पारेणसंहिताद्योषात्पकारान्तमिवम्न्तोप्यवगम्यत
इति । अथवा पदान्तरामवेदं पारमार्थिकं एवायं यकारः । दधिशब्दार्थप्रतीतिस्तु तत्समानार्थत्वान्नारेको
यण्णचीति सूत्रेण समानार्थत्वावगमात् । अनेन हीकारस्य स्थाने यकारोच्चारणं संहितायां भवतीत्युच्य

श्री० तेनैकार्थं त्रपदसमानार्थत्वमस्य कथितं भवति। प्रत्ययमित्यपादिकत्वमिति चेन्न प्रत्ययमित्यात्मभावात्-
१२८ पदैकत्वस्थानवगमस्तत्रार्थं दधीत्यत्र व्युत्पन्नस्य दध्येत्यत्र तदर्थावबोधः स्यान्नात्रवदत्यमिति चेन्न प्रत्ययमि-
मस्ति। विकारेणैत्याक्षं बंधाग्रहणमिति चेन्न। नालस्य सतो न तद्विदुक्तेर्वीसंबंधग्रहणासंभवनात्ति के-
128 शाभावात्। ननु दध्यात्रेत्यत्राविभक्तस्य ज्ञातावधो नार्थत्वमतः कथं तदंतो दध्यर्थप्रतीतिरिति॥ ने-
ष दोषः। अवध्यग्रहणोप्येतस्मादवपदोत्तरात् दध्यर्थावगम। मनार्थवत्त्वोपपातः। अत एवाज्ञायत ए-
वावधिर्मनुविच्छिघोच्चार्यतेन संहितायाममवास्य साधकत्वात् विभिघमानस्यासाधुत्वप्रसंगात् यथा-
कुंभकारादिसमासेन कदाचिदुत्तरपदविभिघोच्चार्यात एव मिहापि संहितायां। असंहितायां तु द-
धिपदमेवनित्यं प्रायाक्तव्यमिति। यथाहुः त्रा पात चावधिस्तत्र व्यंजनो त्तोनरव्यतो दधिश्राद्धाव-
द्वाध्यवानित्यं। नित्य समासवदिति। एवं राजरात्रादिपदेषु पिव्यतिरेकव्यभिचारः परिहर्तव्यः तत्रा-
पि पदोत्तरस्य किंचिदेश समानस्त्वस्य तदर्थप्रतिपादकत्वात्। यातु ब्राह्मणकं बलादौ ब्राह्मणार्थाव- राम०
गतिस्तत्रावधंतरवेन पदोत्तरत्वात्। अवधंतरवे पितत्स्य दमविकलमस्त्येवेति कथं तदर्थानावगमः १२८

प्रतिपादकत्वात्तयानुब्राह्मणकंबलादौ ब्राह्मणार्थावगतिस्तत्रावच्छिन्नत्वेन पदान्तरवाच्यात्। अवच्छिन्नत्वेपि तस्य
दमविकलमस्त्येवेति कथं तदर्थो नावगम्यत इति चेत् न उत्सर्गस्यापवादेन बाधात् अत्र हि प्राच्यस्य पदरूपस्यावच्छिन्न
रमेवापवादकं पदावच्छिन्नत्वं दूरीकृत्य प्राच्यरूपेण पदान्तरमुख्यार्थात्तत्पदात्तदर्थावगतिर्भवत्येवेति न दोषः कश्चित्॥
यत्राप्यपभ्रंशकर्म्मादावन्यूनानधिकमेव पदद्वयं तत्रापि वाजिकर्णाद्याख्यानाभिधाने उत्सर्गरूपापा अवयवप्रसिद्धेरपवा
दरूपपासमुदायप्रसिद्ध्याबाधात्। पूर्वामवेदस्यार्थावगमात् अयं प्रकरणाधानेन श्रोत्राबाधितस्वार्थयोरपि न
सर्वदा तद्बाधः। तथा हि अश्वमानयकर्णौ विध्यतीत्यादौ व्यस्तप्रयोगे तावत्तावयवार्थापायाः किंचिद्बाधकदोषमस्ति। सम
स्तप्रयोगेप्यश्वकर्णौ परिमाष्टीत्यादौ प्रमाणान्तरवशेन समुदायार्थबाधात्। द्वयवयवार्थनिर्णयः सिध्यतीति। ननु
पदानां स्वपदार्थमात्रप्रतिपादनावसितानां नविशिष्टरूपवाक्यार्थबोधनसामर्थ्यमस्तीति निर्भागं वाक्यमेव वा
चकं कल्प्यमेवं। पदार्थानामेव वाक्यार्थे सामर्थ्यात् न वाक्यस्य तत्र सामर्थ्यं कल्प्यं। यथाहुः। न विमुंचति सामर्थ्यं वा
क्यार्थेपि पदानि नः तन्मात्रावसितेष्वेषु पदार्थेभ्यः स गम्यते। इति तर्हि पदार्थेभ्योवगम्यमानो वाक्यार्थो न शा
ब्दः स्यात्तानैष दोषः। पदार्थानां शाब्दत्वेन द्वारा वाक्यार्थस्यापि शाब्दप्रतिपाद्यत्वसंभवात्। वाक्यार्थे हि शब्दानां

श्री॰
१२८
129

ज्ञात्पयान पदार्थेषु ज्ञातेषां प्रमाणान्तरासिद्धत्वात्। आज्ञाताय घ्यभिधाव्यापारः पदार्थेष्वेव पर्यवसितस्तथापि ते
षु तात्पर्याभावात् वाक्यार्थपर्यन्तत्वतात्पर्ये च शाब्दस्य प्रामाण्यान्तरासिद्धमिति शब्दप्रमेयतया वाक्यार्थस्य शाब्दत्व
मिति नाप्यसंबन्धोपालम्भः अविनाभावरूपस्य संबन्धस्य सत्त्वात्। यथाहुः संबन्धमवाचेते पर्यागमयन्त्यपविनाभुवं॥
सामान्यं स्वविशेषेण विना नत्युपपद्यते। हन्त तर्ह्यनुमानाद्देव वाक्यार्थावगतिरापद्येता नैवं पक्षाद्यभावदना
नुमानासंभवात् न तावत्पदार्थाएव वाक्यार्थविशिष्टतया पक्षीक्रियन्ते तएव हेतव ततः प्रतिज्ञार्थैकदेशता
ता अपवाक्यार्थमवपक्षीकृत्य पदार्थानां हेतुत्वमुच्यते तात्तदप्यसत्। परैर्वमप्रतीतस्य पक्षत्वानुपपत्तेः पदार्थ
स्य एव हि तत्संसर्गात्मा वाक्यार्थोवगम्यते न ततः प्रागिति दिक्। एतत् दूषणप्रपञ्चस्तु वार्त्तिककारैरुक्तः॥ किं चाति
लक्षणलिङ्गजन्या हि धीरनुमानं न चेयं तज्जन्या पदार्थैरवगृहीतसंबन्धैरपि जन्यत्वात् अतः प्रमाणान्तरमेव
शाब्दमिति। अपि च भावनावचनस्तावल्लिङादिः स्यात्पतिलौकिकवदित्येतावदविवादं सा च यजते पचतीत्यादावाख्या
तप्रत्ययान्वायः स्वरूपात् यागपाकशब्दान्वायपवारव्यानत्यतिरेके व्यतिरेकात्तस्मादाख्यातप्रत्ययार्थ इति केचित् राम॰ १२८
धातुरेवाख्यातप्रत्ययसन्निधानानुगृहीतशक्तिर्भावनावक्तीत्यपरे। अन्ये पुनर्धातुप्रत्यययोरन्यतरामा

चेपि भावना याऽत्र प्रतीतिस्तत्समुदायार्थो भावनेत्याहुः॥ अस्तु नाम यः कश्चित्प्रयत्नो न चान्वयविवेकेन प्रयोजनं किंचित्
प्रकृतमेव निरूपयामः सा चेयं भावना स्वर्गकामो यजेतेत्याख्यातामिहिता साध्यसाधनेतिकर्त्तव्यतांशत्रयसामान्येना-
क्षिप्यान्यतो विशेषमपेक्षते। एवं स्वर्गोपि कामिकर्तृतयावगतः सिद्धे कामनायाश्च भावात्साध्यतयावगतो भावनामपेक्ष-
ते॰ तयोश्चाकांक्षासन्निधियोग्यत्ववशेन परस्परान्वयो गम्यते। ततः साध्यसंबंधाच्च भावना साधनमपेक्षते तदस्त्या च
धात्वर्थ एव साधनत्वेनोपस्थाप्यते। गोदोहनादिद्रव्यस्यापि साधनत्वेनाश्रवणात्तत्कथं धात्वर्थस्यैव भावनान्वय इति
चेत् सत्यं तस्याप्यप्रणयनादिरूपधात्वर्थाश्रयेणैव तत्साधनत्वेनान्वयः। निराश्रयस्य तदनुपपत्तेः ननु धा-
त्वर्थस्याप्यसिद्धत्वात्साध्यतापि वान्वयः किं न स्यादिति चेन्न। तस्यापुरुषार्थस्य विधुपष्टत्वभावनया साध्यत्वे-
नाग्रहणात्॥ नन्वेवमपि तृतीयाभावात्कथं यागस्य करणत्वं॥ स्वभावादेवेति ब्रूमः नहि करणत्वं तृतीयया निय-
तं यत्तस्तन्निवृत्त्या निवर्तेत॥ सत्को हो तृतीयां विनापि करणत्वदर्शनात्॥ प्रयाजादेषतृतीयायां सत्यपि करणत्वाभा-
वात्। कथं तर्हि यागेनेति तृतीयोपदर्शनं॰ स्वभावसिद्धमेव करणत्वसंबंधं स्पष्टीकर्तुमिति ब्रूमः॥ यथाहुः नके-
वलं तृतीयैव करणत्वं नियच्छति प्रमाणांतरगम्येपि न किंचिद्विहृणाद्विसा। तथा॰ प्रत्यासत्तिनिमित्तोयं संबंधः क

श्री० १३० त्पत्तेस्तयोः तच्च विस्पष्टमाख्यातुं यागेनेति प्रयुज्यते। यथोपगवशब्दार्थस्तस्यापत्यमिति द्दशान्तक्रपयन्त्रिनचैत
स्मिन्नर्थे न्यायोपगुसंभवः। किंच यथा यागशब्दाज्जातीयामवति निर्वंपजेतेत्यत्र धातोरप्रातिपदिकत्वात्। अतस्तदर्थ
माख्यातार्थं यागेनेति तृतीयान्तस्य प्रयोगः। एवं च लब्धसाधनसंबंधाभावनाकरणोपकारसाधनमुपायमात्रम
पेक्षते प्रयाजाद्युपायश्च भाव्यमात्रे॥ तयोश्चाकांक्षासन्निधियोग्यत्वैर्मिथः संबंधसिद्धिः॥ सचोपायः कचि
130 त्स्ववाक्यगत एवलभ्यते० यथारेवतीषु वारवंतीयं कृत्वा यजेतेति कचित्तु वाक्यान्तरगतो यथा प्रयाजादिः
वाक्यान्तरगतस्याप्यपेक्षावशाद्दन्वयः। उपायरहितानां करणानां फलसाधनत्वासंभवात् प्रयाजानां च निष्प्र
योजनत्वापातः॥ ननु विश्वजिद्वत्स्वर्गप्रयोजनवत्वात्तर्कर्प्रयाजादेर्निष्प्रयोजनत्वोपत्तिः। मैवं। अपेक्षि
तसन्निहितक्रतूपकाररूपदृष्टप्रयोजनलाभे सति प्रयोजनान्तरकल्पनानुपपत्तेः। नन्वेवं शाब्दीभावना सं
बंधे सति परस्परसंबंधानुपपत्तिः परस्परसंबंधे कान भावनासंबंधः स्यात् संबंधद्वयविधाने वाक्यभेद
प्रसंगात्। अत्राहुः एकभावनयोपात्तास्तयोर्ध्वंशाः परस्परं उपकार्योपकारित्वेनापेक्षावदनुभवन्तीति भा राम०
वनायेक्षमाणा हि साधनं किं फलस्यमेति साधनानुग्रहः। काचेत्यनुस्मृतमापह्सते। आकांक्षैव मावि छेदसि १३०

ध्याम्युक्तं गवादिषु। एकत्रिंयाग्रहीतेषु संबंधश्च परस्परं द्रव्यद्वारेण चैतेषां विशेषणविशेष्यतेति। ततश्च
भावनामेव विशिष्टां विदधत्प्रत्ययोऽर्थो यागादीन्विदधाति न सामान्यादिति तदुक्तं एवं पदार्थवाक्यार्थसंप्राप्ति
रूपकल्पितां विशिष्टां भावनां प्राप्य वृत्तिर्विधिनिषेधयोः। यत्तु प्रत्यासत्तिविशेषात्केवले भावनात्मनि पर्य
वसितो विधिर्न पश्चाद्यागादीनंशान्विधातुमलमित्युक्तं। तत्र क्रमः। नत्वावत्केवले भावनात्मनि विधिपर्यव
सानं संभवति॰ अंशत्रयापरिपूर्णाया भावनाया अनुष्ठात्रमयोग्यतया चेतनप्रवर्त्तनात्मके विध्यन्वया
संभवात् योग्यताया अपि संबंधकारणत्वात् अयमत्र क्रमः प्रत्यासत्तिविशेषाद्विधिभावनयोरन्वयेन भ
वितव्यमित्येतावत्प्रथमम् अवगम्यते। तादृशी चावस्था विधिसंस्पर्श इति विधिप्रक्रम इति चोच्यते तथा
च भवितव्यं यथावगतभावनान्वयो विधिर्योग्यत्वात्तादृशी चावस्था विधिसंस्पर्श इति विधिप्रक्रम इति चो
च्यते तथा च क्रमविदधद्यावदंशत्रयपरिपूर्णा परीक्ष्य पश्चात्सर्वांशसंपूर्णामंशान्तराण्येक्षितां विदधाती
ति। यथाहुः। यद्यप्यन्यैरसंस्पृष्टो विधिः स्पष्टशक्ति भावनां तथाप्यशक्तितां नासौ तन्मात्रे पर्यवस्यति। अ
नुष्ठेये हि विषये विधिः पुंसां प्रवर्त्तकः। अंशत्रयेण चापूर्णां नानुतिष्ठति भावनां। तस्मात्स्वक्रान्तरूपोऽपि वि

श्री०
१३१
131

ध्विस्तावत्स्वतीस्मृत यावद्योग्यत्वमापन्नाभावनाम्यानपेक्षितागत्ति। नन्वेवमेतनामेवं नामाख्यातसंबंधात् उपसर्गनिपाता
नानुक्रवींगवादिवत्स्वतंत्राणामर्थावधारणाभावात्। सत्यमेवंत आख्यन्यसहितानामेव प्रयोगनियमात् तदागमन्याये
नार्थवत्वं सिध्यति च कारागमेहि समुच्चयोवुगम्यते नन्ततः प्राक्। वाचकत्वद्योतकत्वविवादस्तु नात्रोपयुज्यते उद्धापि
वाक्यार्थोपयोगित्वसिद्धेः। तदुक्तं। वाचकद्योतकत्वं तु नात्रोपयुज्यते तज्ज्ञावाद्वाचकत्वं वा परस्यानुग्रहोस्तु वा॥
यत्तु निपातक्रियपानाम्नां वा संबंधः संभवत्तापुक्तं तत्राप्याहुः ईषदप्यादि पस्ता वत्साक्षान्नाम्नैव संगताः अप्रयुक्तक्रि
याद्वारविशेषाधानतोपरेः आपिंगः प्रवयाश्चेतिद्ध्यास्येतन्निदर्शितं। अचित्रकृष्टतादीनांभावतोपनिपातिनां॥
इतिकर्तृव्यताद्वेन प्रतिपत्तिपरिग्रहे॥ नन्वाभिमुख्यस्य कर्तृधर्मत्वात्कथं क्रियया संबंध इतिचेत्। क्रियैकार्थसम
वायसंबंधेनेति ब्रूमः। वहि कर्तृस्वरूपांगमभिक्रमणमानर्थक्यात धातुसंबंधश्च णमुलो विधानात्। अतः क्रियांगमे
वेति। ननु प्रासादः प्रतिष्ठात इत्यादावन्यार्थविरुद्धार्थाश्चोपसर्गाः धातोः स्वार्थशक्तिं लोपयंतः कथं धातुनासंबध्य
न्ते। उच्यते। वाचकत्वादिमाततावन्नेते विशेषणां किंतु धातुभागाएवतत्पाहि शब्दांतराणि ष्ठातः सकाशात् प्रतिष्ठ राम०
तिरश्वकर्णशब्दवत्समुदायशक्त्यैवगमनेवर्तते आमिदधातीत्यादावपि समुदायशक्तिः तथा प्रलंबतिरपिलंबने। १३१

समा२

सकाशात्शब्दान्तरं समानार्थेन तुल्यं वर्तते: प्रशब्दो विशेषणमिति। द्योतकत्ववादिनस्तु विशेषणत्वाभावमभ्युपेत्ते यथा
हुः। प्रशब्देनोपसृष्टस्य तिष्ठतेर्गतिशक्तता न हि प्रशब्दवेलायां गमनं जायते मतिः। ननु तिष्ठतिमात्रेणापि न गम
नमिति जैन्यते ततः कुत एव तत्र तिष्ठतिर्वाचकः प्रशब्दो द्योतक इति विपरीतमेव किं न स्यात्॥ उच्यते। धातूनां तावत्सा
मान्यक्रियामात्रे शक्तिः लक्षणयैव ततस्तिष्ठतेर्गमनाख्ये विशेषे एव शक्तिकल्पनं भवति। प्रशब्दस्य तु सामान्ये विशेषे चो
भयत्रापि अक्लृप्तैव शक्तिः कल्पनीयेति गौरवं। अतो द्योतकत्वमेव प्रशब्दस्य न वाचकत्वमिति॥ कथमेतावता वि
शेषणत्वं प्रशब्दस्य। धात्वर्थान्तरविषयकशक्तेरीज्ञावनेनैव विशेषणत्वमिति भ्रमः। अत्रोपसंदानिकाश
क्तिरेव द्योतनमिति हि प्रसिद्धिः। अयमत्र विवेकः। तिष्ठतेर्गतिनिवृत्तिर्गतिश्चेत्युभावर्थौ। दधातेरपि धारणमभिधा
नं च। तत्रानुपसृष्टयोर्गतिनिवृत्तौ धारणे च शक्तिराविर्भवति। प्राभ्युपसर्गौ तु तां शक्तिमयोग्यगतत्वाभिधाने च शक्ति
माविर्भावयतः। उक्तं च। तेन शक्त्युपवादोयं भावदर्शोपवादवत्॥ अयं च द्योतकत्ववादिनोऽभिप्रायः। वाचकत्वपक्षे तु
समुदायशक्तिरेवेति। अत्र केनचित्। कर्मणः कर्मसाध्यत्वाभावात्तन्नत्तलनादिद्वारकोष्ठादेः पाकान्वय इत्युक्तं
तन्निराकरणप्रसंगेन कर्तृत्वकरणत्वादिनिरूपणं वार्त्तिककारैर्महता प्रबंधेन कृतं तत्तत्रैवावगंतव्यं॥ नन्वस्तु नामैवमुप

श्री०
१३२
132

सर्गाणां संबंधः नञादेस्तु वस्तुस्वरूपविरुद्धा प्रतिषेधविकल्पादिवाचकत्वात्कथं संबंधः स्यात् उक्तं च स्वपक्षे तेः प्रथमं वस्तु स
द्भावेन निरूपितं कथं नञादिभिः पश्चादभावमुपनीयत इति। अत्रोच्यते। न तावन्नञा वस्तुभावः क्रियते यतस्तस्य वस्तुनो वि
रोधः स्यात्। किं तु विद्यमानमेवाभावं वर्तमानमतीतमनागतं वाभिदधाति। निषेधो हि नञो वृत्तिः पर्युदासाभावप्रतिषेधैः। तत्र घ
टेनाभासं युज्यते अब्राह्मण इति तत्र ब्राह्मणवस्त्वंतरं पर्युदस्तं क्षत्रियादिवस्त्वेव नञा प्रतिपाद्यते। तथाने क्षेत्रे त्या
दो धात्वर्थो यागोपि स्मरणपर्युदस्तं मनोस्मरणं संकल्पात्मवस्त्वंतरमेवोच्यते। तच्च वस्त्वंतरं पर्युदस्तवस्त्वंतरस्यानुगु
णमेव सर्ववस्तूनामितरेतराभावात्मकत्वात्। यत्राप्याख्यातसंयोगः नास्ति घटो नासीन्न च भविष्यतीवादि वृत्तिः प्रती
यते तत्रापि न वस्त्वभावो भज्यते किं तु ज्ञानसंज्ञापदपर्यायमात्रविचारणां। यथा दुःनाम धात्वर्थयोगी च निषे
धोऽन्यार्थभासमेव तत्र वस्त्वंतरमुक्तं वस्त्वेवानुगुणं च तत्र आख्यातप्रत्यायार्थयोजनिवृत्त्यर्थः प्रतीयते तत्र चाज्ञानसं
दिग्धविपरीतार्थवारणां। नञ्च वस्तुरूपाभाववाचकस्य कथं शब्दांतरसमभिव्याहारः। एवं अभावस्य वस्तुत्वप्रतिपा
दनात् तदभिधायिनो नञो षष्ठ्यादिवत्तदुपपत्तिः। ननु प्राप्तिपूर्वकानिषेधो भवति न तद्यदि घटस्तत्र प्राप्ताक थं निषि रा०भा०
ध्यते न हि विद्यमानस्याविद्यमानता संभवति स्यादेवं यद्यपि प्रतिषेधः स्यान्न त्वेवं न हम्यात्रापि वेदित्यादाविव॥ १३२

विधिसंयोगाभावात्। किं च भावस्वरूपमात्रकथनं न च तत्प्राप्यपेक्षा हि नञ् तदभाववाचिनो नञः कथं सद्भाववाचिना घ
टशब्देन समभिव्याहारः स्यात्। अस्ति नास्ति शब्दयोर्विरुद्धार्थत्वात्॥ नैष दोषः। न ह्यत्र घटशब्देन घटस्य सत्त्वावा
ध्यते किंतु सदसत्त्वसाधारणं स्वरूपमात्रं। तत्र प्रादेशिकत्वाद् घटस्य क्वचित्सद्भावं क्वचिच्चासदिति न विरोधः सत्त्वबोधने तु य
दोऽस्तीत्यस्ति शब्दप्रयोगः स्यात्॥ ननु मीमांसकानां मते जातिरेव शब्दार्थः तस्याश्च नित्यत्वात् कथं सदसत्त्वसाधारण्यं॥
नैष दोषः। नास्तीत्यस्य व्यक्तिविशेषणत्वांगीकारात् तदावार्थरूपाज्जातेः सदसंभवात्। यथाहुः जातेरस्तित्वनास्तित्वे न
च काश्चिद्विवक्षति॥ नित्यत्वात् लक्ष्यमाणाया व्यक्तेस्ते हि विशेषणे। नन्वेवमपि ब्राह्मणान् हन्यात् सुरां न पिबेदित्यादौ नञ्
प्रतिषेधरत्नेरस्ति विरोधः। तथा हि प्राप्तिपूर्वकः प्रतिषेधो भवति न यदि रागादिना पानं हननं वा तन्नानुष्ठितं तदा कथं त
स्याभावः कथ्यते यदि तु नानुष्ठास्यते तेन तः प्राप्त्यभावात् प्रतिषेधानुपपत्तिरिति। उच्यते। नात्र नञोऽभावार्थत्वं किं तु चि
कीर्षिताद्यापरान्निरुद्धनं संभवति च पुंसः पानादौ वैराग्यजननान्न तदभावावस्थापनमित्यविरोधः। उक्तं च विधिना पु
ज्यते यत्र न हन्यान्न पिवेदिति॥ तत्राभावार्थतानैवास्वयं पुंसो हरणं द्विहि॥ एतत्सर्वं पंचकरनाकरे वगंतव्यः॥ प्रकृतमनु
सरामः। इतश्च वाक्यार्थस्य निर्भागत्वं निरसनीयमित्याह प्रसंगादीति। यदि निर्भागो वाक्यार्थः स्यात्तदा वाक्यार्थावयव

वपदार्थविषयः प्रासंगिकादिव्यवहारानस्यादित्यर्थः। यथाहुः प्रासंगिकादि यत्कार्यं पदार्थोपनिबंधनं। आकां
क्षादिदितप्रश्नौ यौ च दृष्टौ पिकादिषु०। असत्यं वद यो यो हृत्यं न चैनं कस्यापि प्रसतिः। तथा। असत्यैर्गम्यमानत्वे सत्य
ज्ञाने स्युदाहृताः स्वरूपेणासत्ता दृष्टं तोपायत्वं हि कस्यचिदिति। प्रसंगादीत्यादिशब्दार्थं विवृणोति तथा हीति॥ उक्तमर्थ
मुपपादयति यदा हीति। उपपादितमर्थं निगमयति तस्मादिति॥ अत्र सिद्धांतसूत्रं॥ तद्भूतानां क्रियार्थेन समाम्नायोर्थ
स्य तन्निमित्तत्वात्। तद्भूतानां तद्भूतेषु पदार्थेषु भूतानां वर्त्तमानानां पदानां क्रियार्थेन पादेन समाम्नायः समुच्चारणं तान
पेक्ष्य पदार्थान् पार्थग्र्येन वाक्यार्थी कुतः। अर्थस्य पदार्थस्य तन्निमित्तत्वात्॥ वाक्यार्थप्रत्ययनिमित्तत्वात् पदा
नि तावत् स्वार्थानभिदधति पश्चात्ते पदार्था आकांक्षादिवशेन वाक्यार्थमवगमयंतीति सूत्रार्थः॥ अथ वाक्यं यत्का
राभिप्रेतः एवं सूत्रार्थो वर्णनीयः। इह केचिद्वाक्यमेव वाक्यार्थस्य वाचकमिति मन्यंते। केचित्तु निर्मूलमेव वाक्या
र्थज्ञानमित्याहुस्तेषामुभयेषामपीदं सूत्रेण निराकरणं। तथा हि लोकसिद्धेषु पदार्थेषु वर्त्तमानानां पदाना
मेव वाक्यार्थज्ञानोपायत्वात् न वाक्यस्य वाचकत्वं। कुतः। अर्थस्य तन्निमित्तत्वात् पदार्थानामेव तन्निमित्तत्वोप
पत्तेर्निष्प्रमाणकं वाक्यस्य वाचकत्वमित्यर्थः। नापि निर्मूलं वाक्यार्थज्ञानं अर्थस्य पदार्थस्य तन्निमित्तत्वात् तन्मूल

त्वात्॰ न चैवं वाक्यार्थस्याशाब्दत्वापत्तिः यतस्तेषां क्रियार्थेन समाम्नायः ननु यदि पदार्थेषु पदार्थनिवर्त्तीत प्रदार्था
श्च वाक्यार्थस्य क्रियायाः विशिष्टभावनाया निमित्तं ततः कथं पदानां क्रियार्थत्वेन समाम्नायः सिध्येत्। वाक्यार्थावगतावेव
तावत्पर्यवसानादिति ब्रूमः तथा हि पदार्थस्वरूपस्य प्रमाणान्तरसिद्धत्वात् तन्मात्रप्रतिपादने निष्फलत्वात् ततः पदार्थावसिताभि
धाव्यापाराणामपि पदानां। तत्रानवसितत्वात्तत्पर्याणां वाक्यार्थावगतावेव तात्पर्यमिति युक्तमेवोक्तं तेषां क्रियार्थेन स
माम्नाय इति। यथाहुः साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनं वर्णास्तथापि नैतस्मिन्पर्यवस्यन्ति निष्फले॰ वाक्यार्थ
मितत्येतेषां प्रवृत्तौ नान्तरीयकं॰ पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनमिति तान्येवमपि पदैरनभिधेया भावना कथ
मर्थ इत्युच्यते प्रयोजनतयेति ब्रूमः। क्रियार्थेन समाम्नाय इत्यत्रार्थशब्दस्य प्रयोजनवचनत्वात् यथाहुः प्रयोजनत
या चैषामर्थमिच्छन्ति भावनां क्रियार्थेनेति तेनेह समाम्नायप्रयोजनं यत्रापि लोकेषु क्रोगोरिति नित्यक्रियामेव वाक्यं श्रुत
तत्राध्याहार्यतामित्यध्याहर्त्तव्यं॥ आख्यातवर्जितपदस्य प्रयोजनाक्षमत्वात्। किं चान्वयव्यतिरेकाभ्यामपि पदा
र्थानां निमित्तत्वमवसीयते उच्चरितेभ्योपि पदेभ्यः कदाचिन्मानसादपचारात्पदार्थाग्रहणे॰ वाक्यार्थाग्रहणात् वाक्यमप्य
त्र न गृहीतानामिति चेत्॰ न॰ पदोच्चारणं विनापि श्लोकादिपदार्थावगममात्रेणामुत्र गुणकट्वाद्यवगमदर्शनात्॰ तस्मा

श्लो ३

श्री० द्वाक्यव्यतिरेकेऽपि पदार्थद्वये न्वीयमानः पदार्थनिमित्त एव वाक्यार्थप्रत्ययः एवं च सति सिद्धपदार्थनिमित्तत्वे यत्रा
१३४ पि मानसाद्यपचारादग्रहणं तत्रापि पदार्थाग्रहणादेव वाक्यार्थाग्रहणं० ननु वाक्याग्रहणादित्युत्तरं युक्तं। संवि
धिराधात्तायथाहुः परस्परतः श्रोतिमात्रपोह्याशावद्वचस्स्यावतः॥ खुरनिक्षेपशावद्वचम्येतो धावेतातिधीः। दृष्टावा
क्यविनिर्मुक्ता न पदार्थैर्विनाक्वचित् रामानसादित्यत्तो नस्याद्वाक्यग्रहणमुत्तरं मानसेना परापधन पदार्थाक्रमेन म्य
134 हृत्वान्तेउवाकं गृहीत्वापि नार्थं गम्यतिकर्हिचित्॥ प्रयोगास्तु वार्त्तिकवर्गन्तव्याविस्तरभयान्नेह लिखिताः॥ नन्वेव
मपि लौकिकवाक्यवद्वेदेष्वानुपपत्तिः पौरुषेयत्वं दरपत्ते च लोकनीलोत्पलवनेषु द्यावरंत भ्रमरुसंज्ञावा नीलको
त्रापसंवीताः प्रणरूपत्तीवकादं वा इतिश्रुतो वैदिकाऽप्यपि पुरुषकृता इति। तन्निराकरणार्थमिदं सूत्रं लोके सन्नियमात्
प्रयोगसन्निकर्षः स्यात्॥ एतच्च व्यवहितत्वि परिणतानुषंगेण व्याख्येयं। लोके सन्निकर्षात्० प्रमाणान्तरसंवेद्यात्० प्रयो
गसन्नियमः स्यात् पुरुषाधान प्रयोगव्यवस्था युक्ता स्यात्० नन्विह प्रमाणान्तरागोचरार्थविषयत्वादितिसूत्रार्थः॥
इति वाक्याधिकरणं॥ वेदांश्चैके सन्निकर्षं पुरुषाख्याः॥ ननु परपदार्थसंबंधनित्यत्वाद्वाक्यार्थस्यस्य विवक्षया च चो राम०
दना प्रामाण्यमुपपादितं चोदनैव प्रमाणमित्यवधारणात्सम्यगवधारणासिद्धेरन्यमविचारानर्थक्यमित्याशंक्याह सूपानं १३४

रनिराकरणोनार्थं चेदमुपपादयितुं वृत्तमनुवदति सं केतानपेक्षैरिति ॥ अत्र केचिदाहुः संबंधनित्यत्वाद्युपपादनम
चोदनाप्रामाण्यपक्षोपरिरचितकठादिसमाख्यायाश्चापौरुषेयत्वाच्च गमात्तदेव यवानां चोदनानां पुनः
प्रामाण्यमाक्षिप्यत इति । तन्न युक्तं । सामान्यप्रवृत्तोसत्यां विशेषनियमाख्या समाख्या भवति यथा वैजां सामान्य
तः पदार्थेषु नियामनकर्त्रा च प्राप्तेष्वाध्वर्यवादि समाख्या यानि यमः क्रियते । न चेह वेदानां सामान्येन क
श्चित् कर्त्ता प्राप्तो यतः काठकादि समाख्या काठकादायानि यम्येरन् । प्रवचनेनापि वेदसमाख्यापपन्ना नित्यो
त्ततः स्यात् काठकादिकं च प्रसिद्धिरन्तो वा कर्त्ता वाद्यवात्र पौरुषेयत्वमाशंक्य निराक्रियत इत्यापत्तिप्राय वाना हुः
इदानीमिति ॥ ननु पौरुषेयाणामप्यायप्रमाणतानां दृष्टमेव प्रामाण्यं पतैः कथं तेन नोदना प्रामाण्यापवाद इत्य
त्राह । अपौरुषेयत्व इति । इदं हि । लौकिकप्रमाणागोचरोपूर्वपक्षमाह तत्रेति । समाख्याबलमुक्तम पहेतुरत्रेत्या
ह काठकादीति । नन्वेतदपि कर्तुरस्मरणादित्यनेन पूर्वमेवपरिहृतं । सत्यं । अत्र तत्पमेवानागतावेक्षणेन प्र
संगात्पूर्वमुक्तं । इहैव तु वेदानां पौरुषेयत्वं निराक्रियते । तन्नात्र वेदमुपन्यसनायं निराकरणीयं चेति स
वमनवद्यं किंचजायते वाक्यतापत्तिः पदानां रचना वशात् । न च सा पुरुषाभावे कथंचिदुपपद्यते तत्राताव

श्री० रूपमात्रस्य परागयोर्वेदानां कर्तृत्वं ति । सिद्धान्तिनः शाक्यमुपाटयन्निनन्विति । प्रतिबन्धापरिहरति भवानपीति ।
१३५ पद्येवं शक्तिरियन्हरतां तर्हि वाक्यरचनाप्येवं भविष्यतीत्याह । अधिकारादिति श्लोकार्थमुपसंहरति तस्मादि
ति । ननु प्रवचनेनापि समाख्योपपत्तौ नित्यानां तत्र तत्स्तकर्तृत्वसिद्धिरित्युक्तं तत्राह नहीति । कश्च पक्षे नु काठ
135 कादिविशेषणावसंभवतीत्याह कर्तृत्वमिति । किंपुनरिदंकर्तृत्वं पादकस्यैव संभवति न प्रवक्तृनामित्यभि
प्रायेण पृच्छति किमिति । उत्तरमाह यदिति ॥ पूर्वपक्षमुपसंहरति तस्मादिति । अघं चस्तत्रार्थः ॥ चकार
स्तु शब्दार्थः । एके वादिनः सन्निकर्षं० शब्दैः कृष्टकालत्वं तत्रक्षीकृत्य तत्तत्कानवेदानन्यतः यतस्ते पु
माख्याः पुरुषेणाख्या यत्र कठादिरूपेण० कृतिग्रं ये इत्याभियुक्तस्मरणात् अतः समाख्यातः पौरुषे
यत्वं वेदानामिति ननु सामान्यप्राप्तौ सत्यामेव विशेषनियमे समाख्याव्याप्ति पतत इत्युक्तं सत्यं इहाप्यस्त्येव सामान्यप्रा
प्तिः लौकिकवाक्यसाधर्म्यपदसंघातत्वादिदर्शनात् उक्तं च वाचवचनान्तरसाधर्म्यात् कृतत्नुः सामान्यसंभवे समाख्या यावि
शेषाय कठादिरवधार्यतः । अनित्यदर्शनाच्च । जननमरणवन्तः तथा नित्याः एव वेदार्थाः । अपत्तबबरः प्रावाहणिरका राम०
मयत कुसुरविंदुरोद्दालकिरकामयतेत्यादिः अतएव प्राक्तेषां नाभवन्निति गम्यते अतोप्यनित्या वेदा इति सिद्धां १३५

त्वं प्रतिजानीत इति प्राप्त इति ॥ ७ ॥ नानुशब्दपर्वत्वं आख्या प्रवचनादिति च सिद्धान्तसूत्रं हृदयं भाष्यकारेणाहृपकूलि
खित्वा व्याख्यातं ग्रंथकारेणानुपरिहारसौकर्य्यायतदेकीं तत्पपठितं । श्लोकार्थमुपपादयदाति ॥ अनादरादिस्मर
णामिति चेतन एतादृशो विषये नादरानुपपत्तेरित्याह नदितिदरपाह इनिति आत : स्मर्त्तव्यस्य सतः सर्वथैवास्मरणा
त् असत्त्वा मामान्यतः कर्तुः प्राप्तेन समाख्यापाविज्ञोपनिगम इति भावः । उक्तेर्थे सूत्रं योजयति । तदिदमिति । शब्द
शब्देनात्र शब्दाध्ययनमुच्यते उच्चारणमिति यावत् तत्पूर्वकत्वमध्येतॄणां मोत्पत्तिकसूत्रादावुक्तमित्यर्थः । एत ।
दवविदृशो ति । सावेति । सूत्रार्थमुपसंहरति तस्मादिति । न च प्राप्तस्यापि कर्तुः समाख्येवमस्तं कस्मात्त्वं भवत्यत आ
ह समाख्यापीति । समाख्यायाः प्रवचननिमित्तत्वेनाभुपपद्यमानत्वात् न कस्य कल्पनाम्लत्वे तेन प्रोक्तमित्यपि स्म
रणादर्शनादि किं च दुर्बला हि समाख्या अक्षरत्वाद्यपेक्षया आदिमती चाकर्यंत याअक्षरत्वायात्मकस्य शब्दराशेः क
र्तृपस्थापकत्वेन प्रामाण्यमापादयितुं शक्यमतो पि प्रवचनामिति तेयमिति न तु प्रवचनस्यानेकपुरुषसाध्य
त्वात् कस्य विशेषणत्वानुपपत्तिस्तत्राह प्रवचन एवेति । प्रकर्षवशाद साधारणोपपपत्तेर्विशेषणत्वं स्यादि
त्यर्थः । यथाहुः स्तस्यामसाधारणाद्यत्न । आध्यवाहृदिरेवेयमष्टकस्मादिशब्दवन्निर्निमत्तेत्याह यद्वेति । यथा

श्री० १३६ स्मर्यते च विशंपायनः सर्वं शाखाध्यायी कठः पुनरिमां केवलां शाखामध्यापयांबभूव अतस्तास्यां शाखामनधी
यानस्तस्यामसाधारणा इति। अथवा "छिरे वैयमश्वकर्मादिशब्दवन्निर्निमित्तं त्याह यद्वेति। यथाहुः कामं वा निमि
मित्तं यं शाखामेको वादिष्यति। आकृतिसामान्यमात्रं हि नात्र दोऽनवार्थ्यत इति। पचनित्य दर्शनादिन्सुक्तं तत्परि
हारार्थमस्त्रं। परं आकृतिसामान्यमात्रमिति। आकृतेः शब्दस्ये चात्र सामान्यमात्रं न तत्वर्थः समानः नस्यत्त्र प्रवांहण
136 स्यापत्यं प्रावाहणिः। बबा पत्ये चेति इञ्प्रत्यय क्रियायामपि कर्त्तरि तस्माद्यः प्रवाहयति स प्रवाहणिरिति। बवर इति शब्दानु
नुयः बवरः एव वहनस्य कर्ता। यदाह। बशब्दः प्रकर्षे सिद्धो वहतिश्च प्रापणे। न च स्य समुदायः क्वचिसिद्धः इकारस्य य
च्येव + करणं वा येण किंकिंदी विनेति वत। तेन यो नित्यो र्थो वा पुरुषस्तमेवैतौ शब्दौ वदिष्यत इति एवमुदा
हरणान्तरेष्वप्यूह्यो अनुलिंगन्यायेन वा प्रतियुगमनुवर्त्तमानाववरादयः प्रवाहनित्यतया नावदस्यानित्यत्वमापा
दयन्तीति। किंच आपञ्च दोनित्यः स्यादनित्यो वा। अथ अनित्यमर्थमसंभवादेव वर्जयिष्यति। अन्यैव प्रमाणवादे
वसुतरामिति। दर्शितं वा तात्र च नित्यान्तेनार्थेनाभाव्यं। यथाहुः अनित्यार्थाभिधायित्वं स्वयं वेदे प्रमुंचतीति नि राम० १३६
त्यनित्यविकल्पेन वेदस्तादर्थ्यवर्जनात्। अनित्यस्य नित्य एवार्थः कृतकस्य प्रमाणतातितिनानुवनस्यतनयः सत्रमासत

सपाः सत्रमासत गावो वा एतत्सत्रमासतेत्यादीन्युन्मत्तबालप्रलापसदृशानि वाक्यानि भ्रूयन्ते पतानि च जरदु
वादिवाक्यवद् प्रमाणम् तानि कथमिव तस्य वेदस्य प्रामाण्यं न पादयेयुरिति । तन्निराकरणार्थमिदं सूत्रं
तत्तु वा विनियोगः स्यात् कर्मणः संबन्धात् । वा शब्द पक्षव्यावृत्त्यर्थः । तत्तु कर्मणोऽस्मिन् त्रा के प्रस्तावे तारणाविनियो
गो विधिः स्यात् । तत्र कर्मणः संबन्धात् विनियुक्तं हि दृश्यते पारम्पर्येण संबन्धार्थ । कथं ज्योतिष्टोमः स्वर्गकाम इति धायक
र्त्तव्यं तस्मिन् विहिते केनेत्याकाङ्क्षिते सोमेनेति किमर्थमिति स्वर्गायेति । कथमिति ध्रुवपृत्रेन । पतिकर्त्तव्यत चेति । एवं प
दार्थैरभिः संस्कृतं विहितं वाक्यार्थमवगच्छतः कथमुन्मत्तबालवाक्यसदृशमिति वक्ष्यामः । ननु वनस्पतीनां स
र्प्याणां गवां वा सत्रकरणमनुपपन्नमिव । सत्यं तद्योऽधेतारः सत्रस्य वनस्पत यो नाम चेतनाः तद्दृष्टं सत्रमुपासित
वेत्तः किं पुनर्विद्वांसो ब्राह्मणा इति । वनस्पति चाक्षर प्रामाण्यानुपपत्तिरिति । किं चितु संबन्धादि त्यस्य स्थान बा ४
समत्वादिति पठित्वा व्याख्यातं । कर्मणः अङ्गत्वयोपेतस्य सत्रभावनाख्यस्य ज्योतिष्टोमेन यजेतेत्यादि विधे
णा समत्वादिति तत्तु माष्यविरोधाद् उपेक्षणीयं तदेवमुपपादितं चोदना प्रामाण्यमुपसंहरति तस्मादिति । तर्हि
प्रमाणरूपस्य समाम्नायवादनन्तरं विधिमदविचार एवारब्धव्यः किं त्रिपाद्यार्थवादादि विचारेणेति तत्राह चोदने

श्री० १३७ ति। आनन्तपादेन चोदनाया एव प्रामाण्यमुक्तं। अर्थवादादीनां तु त्रिपाद्यां साधयिष्यत अतः पादत्रयमपि चोदना
सूत्रवादवर्जितानां सामस्त्येन कृत्या कोधर्म इत्यनन्येव प्रतिज्ञायासंगच्छत इति नासंगतिः। नापि प्रमाणलक्षणसमाप्तिरितिभा
वः एतदेव विवृणोति दूषयमिति। ततः किमत आह तदेवमि। त्रिपाद्याः हि चोदनासूत्रशेषत्वं चोदनासूत्र प्रतिज्ञातार्थ
137 साधितं तद्वर्योपि साधितं इति नैकप्रकरणारंभः स्यादिति भावः। चोदनासूत्रलक्षणे तिसृता चाराम प्रायं न लक्षेनावधारणे ना
र्थवादादीनां निरस्तं नापि साधितमिति संबंधः। तत्किं प्रमाणमेवतेषामभिमंतव्यं नेत्याह उपरितनेनेति। अस्मिन्नर्थे सम्म
तिं दर्शयति यथाहेति। अत एव परमित्यनेनैतदाह प्रमाणलक्षणं समाप्तं अर्थवादादिप्रामाण्यप्रतिपादनात् तेनात्र
सिद्धेपि चोदनाप्रामाण्ये तत्समर्पणाय तत्र येणाविध्यर्थवादमंत्रनामधेयं त्रेधा विभज्यतत्तत्स्तुत्यादिप्रयोजनप्रतिपादनेन
तत्सहस्यावदस्य धर्मे प्रति प्रामाण्यं प्रतिपादयिष्यत इति॥ नानार्थयत्स्थितं सर्वं प्रमेयं पञ्चिकाख्यता संविविच्यप्यक्षिति वि
ज्ञानानत्र कल्पितं लिखितं मया॥ येषामादर एव नास्ति च तेनां शास्त्रेषु न तेषामयं ग्रन्थः क्वाप्युपयुज्यते जडधियां तं आनन्द
मात्सिनां। येषां धर्मविचारणे सुकृतिनां श्रद्धादरो तत्कृते ग्रन्थोयं रचितो गभीरमनसां शास्त्रार्थकल्पद्रुमः॥ ॥इति श्रीम राम०
त्पारत्नागोत्रसकलशास्त्रविशारदश्रीमाधवात्मजरामकृष्णभट्टविरचितायां शास्त्रदीपिकाटीकायां युक्तिस्नेहप्रपूरण्यां १३७

श्री० १३८

सिद्धांतचंद्रिकाख्यायांप्रथमस्याध्यायस्यप्रथमः पादः॥ ॥समाप्तश्चायंतर्कचरणः॥

138

राम० १३८

मीमांसासिद्धान्तचंद्रिका

४२..

वला ५

५९४
३६४
४०५०